A collection of prayers and amulets of Goddess Tripurāsundarī, from Rudrayāmala, Śaivapurāṇa, &c.

Beginning *of the Stavarāja.* श्रीमहाराजराजेश्वर्यै नमः ।

कल्याणमंदरायुर्भिकंदर्पानंतसुप्रभा ।
काकण्यमागराकारा क॰॰नदीपैकहारिणी ॥ १ ॥
कमला वाक्पती देवी कामितार्थप्रदायिनी ।
कस्तूरीतिलकीडामिवदना कमलालया ॥ २ ॥
कंबुकंठी कलाभोग्नी करवीरसुपूजिता ।
एकानंदपराशक्तिरेकानंदप्रदायिनी ।
एकानेकजगन्माता चैकभक्त्या सुपूजिता ॥ ३ ॥

End *of the Stavarāja.*

आकाशे (शि ?) सुप्रकाशे सकलगुणमयीं सुन्दरीं रक्तवेशां
नित्यां पद्मासनस्थां तरुणरविनिभां रक्तचंद्रप्रभा च
आत्मानं सर्व्वभावैः सकलगुणयुतां सर्व्वदा यो हि पश्येत्
साक्षाद्देवः शिवो वा मदनदहनकृत् खेचरो जायते सः ॥ १४९ ॥

Colophon. इति श्रीरुद्रयामले शिवकृत त्रिपुरासुन्दर्य्याःस्तवराजं पूर्ण (?) ॥

Beginning *of the Kavaca (Amulet)*

त्रैलोक्यमोहनं चेति नामतः परिकीर्त्तितं ।
इदानीं श्रोतुमिच्छामि सर्व्वार्थं कवचस्य हि ।
ईश्वर उवाच ।
शृणु देवि प्रवक्ष्यामि कवचं भुवनेश्वरी (?) ।
त्रैलोक्यमोहनं नाम महापातकनाशनम् ॥

End. न शस्त्राघातमाप्नोति स चिरान्मृत्युमाप्नुयात् ।
तस्मात् सर्व्वप्रयत्नेन कवचं प्रपठेत् सुधीः ॥

Colophon. इति श्रीरुद्रयामले उमामहेश्वरसंवादे त्रैलोक्यमोहनं कवचं संपूर्णम् ॥ छ ॥

विवरणम्—पुस्तकेऽस्मिन् त्रिपुरासुन्दर्य्याःस्तोत्राणि कवचश्चैकं वर्त्तते ।

No. 33. दत्तात्रेयतन्त्रम्। Dattātreyatantram. Substance, country-made white paper, 15×5 inches. Folia, 8. Lines, 13–14 in a page. Character, Nāgara. Date, ? Appearance, very old, and torn. Verse. Not correct. Complete.

A Tāntrika work on mystic subjects, entitled Dattātreya-tantra, composed by Śiva at the request of Dattātreya. Noticed by Dr. R. Mitra in his Notices of Sanskrit MSS., No. 1850.

Beginning. श्रीगणेशाय नमः। श्रीगुरुचरणाभ्यां नमः।

श्रीदत्तात्रेय उवाच।

कैलासशिखरासीन देवदेव महेश्वरं।
दत्तात्रेय पप्रच्छ शङ्करं लोकशंकरम्॥ १॥
कृताञ्जलिपुटो भूत्वा पृच्छतो भक्तवत्सल।
भक्तानां च हितार्थाय कल्पतन्त्रस्य कथ्यते॥
कलौ सिद्धमहाकल्पं तंत्रविद्याविधानकम्॥
कथयस्व महादेव देवदेव महेश्वर।
सन्ति नानाविधा लोके यंत्रमंत्रविचारकाः (?)।
आगमोक्ता (?) पुराणोक्तवेदोक्ता डामरे तथा।
उड्डीशे आदितन्त्रे च कालचंडेश्वरे मते।
रावणतंत्रे च उच्छिष्टे रावणतन्त्रे मतेश्वरे।
तत् सर्व्वं कीलनं कलौ वीर्य्यविवर्ज्जिता॥
ब्राह्मणो (?) कामक्रोधौ च तस्य कारणहेतवे।
विना कीलनमंत्राय तंत्रविद्या कथं शिव।
तन्त्रविद्या कथं सिद्धिक्रिया कुरु मम प्रभो॥

ईश्वर उवाच।

शृणु सिद्धिं महायोगिन् सर्व्वयोगविशारद।
तंत्रविद्या महागुह्य देवानामपि दुर्लभम्॥
तवाग्रे कथितं देव तंत्रविद्याशिरोमणे।
गुह्यादगुह्यं महागुह्यं गुह्य गुह्यं पुनः पुनः।
गुरुभक्ताय दातव्यं अभक्ते न कदाचन।
शिवभक्तिकमनसे दृढचित्ते समन्विते (?)।
शिरो दद्यात् सुतं दद्यान्न दद्यात् तंत्रकल्पकम्॥
अक्ले अक्ले न दातव्यं नान्यथा शंकरोदितम्।

अथातः संप्रवक्ष्यामि दत्तात्रेय तन्त्रं शृणु ।
कलौ सिद्धिप्रदातन्त्रं विना कौलेन कथ्यते ॥
न तिथिर्न च नक्षत्रं नियमो नास्ति वासरः ।
केवलं तंत्रमात्रेण औषधी सिद्धिरूपिणी ।
यस्य साधनमात्रेण क्षणं सिद्धिश्च जायते ॥
मारणं मोहनं स्तम्भं विद्वेषोच्चाटनं वशी ।
आकर्षणमिंद्रजाल यक्षणीरससाधनम् ॥
कालज्ञान अनाहारं साहारं च विधिदर्शनम् ।
वंध्यापुत्रवतीयोगं मृतवत्सासुजीवनम् ॥

End.

गृहीत्वा ग्न्यनक्षत्रे अमृतामूलकं हरेत् ।
तन्मालां धारयेत् कंठे सर्पबाधाभयं नहि ॥
गृहीत्वा शुभनक्षत्रे धुस्तूरमूलकं तथा ।
धारयेद्दक्षिणे बाहौ व्याघ्रबाधाभयं नहि ॥
गृहीत्वा शुभनक्षत्रे अपामार्गस्य मूलकं ।
धारयेत् दक्षिणे कर्णे वृश्चिकाद्भयनाशनम् ॥
गृहीत्वा रविवारे तु श्वेतकर्वीरमूलकं ।
धारयेद्दक्षिणे हस्ते अग्निबाधाभयं नहि ॥

Colophon. इति श्रीदत्तात्रेयतन्त्रे दत्तात्रेयईश्वरसंवादे सिंहव्याघ्रादिनिवारणं नाम विंशत्पटलम् ।

विवरणम्—दत्तात्रेयतन्त्रस्वरूपोऽयं निबन्धः । अत्र खलु दत्तात्रेयेण हरो भगवान्मारणोच्चाटनवशीकरणादिप्रयोगाननुपदिष्टवान् ।

No. 37. दक्षिणामूर्त्तिसंहिता । Dakṣiṇāmūrtisaṁhitā. **Substance**, country made white paper, 12×5 inches. **Folia**, 75. **Lines**, 7–11 in a page. **Character**, Nāgara. **Date**, ? **Appearance**, old, and slightly worm-eaten throughout. **Verse**. Generally correct. **Complete**.

An original work on Tāntrika worship by means of mystic formulas, entitled Dakṣiṇāmūrti-saṁhitā, complete in 66 paṭalas, of which the first three paṭalas treat of the worship of Lakṣmī in her several aspects, and the fourth, of the worship of the Goddess of

the Empire. We find in the fifth and sixth chapters the worship of Brahmavidyā; in the seventh, that of Ajapā, and in the eighth, that of Mātṛikā. The ninth chapter is called Pūrvāmnāyavivaraṇam. The tenth chapter treats of the Goddess Lalitā, and the eleventh of Kāmeśvarī, &c. See the Catalogue of the India Office, No. 2583, p. 887, part IV.

Beginning. श्रीमत्रिपुराम्बिकायै नमः ॥

श्रीमच्छ्रीकौलहृदय पंचसिंहासनात्मक ।
कल्पकल्पलतानां तु पंचरत्नस्य रत्नकम् ॥ १ ॥
चतुरायतनानंदिचतुरन्वयकौलगं ।
नित्यानंदिपरब्रह्मधामं (?) नौमि सुखाप्तये ॥

श्रीदेव्युवाच ।

दयां कुरु महादेव कथयानन्दमंदिर ।
किं तद्ब्रह्ममय धाम श्रोतुमिच्छामि तत्त्वतः ॥ २ ॥
कथं श्रीसहित देव श्रीकौलहृदयं कथ ।
कथमाम्नायसंसेव्यं कथं नित्यात्मकं प्रभो ॥

ईश्वर उवाच ॥

एतत् सर्वात्मकं वस्तु त्रिपुरा परमेश्वरी ॥
चतुर्भ्यश्रीसेव्यमानाभेदा कामदुघावरा ॥

End. ततः स्वगुरुमभ्यर्च्य पुष्पभूषांबरादिभिः ।
दत्वा दमनकं तस्मै नमस्कृत्य प्रसाद्य च ॥ २६ ॥
अलंकोत्तिः ततः कुर्यात् सार्द्धं समयिभिः सुखं ।
अन्नदानं प्रकुर्वीत रसैः षड्भिः समन्वितम् ॥ २७ ॥
एवं च कुरुते विद्वान् दमनारोपणे क्रमम् ॥
तस्य सांवत्सरी पूजा विद्याधिष्ठिता भवेत् ॥ २८ ॥

Colophon. इति श्रीदक्षिणामूर्त्तिसंहितायां दमनारोपणनैमित्तिकाभिधानं नाम ६६ पटलं ॥ श्री ॥

विषय:—दक्षिणामूर्त्तिसंहितानामकोऽयं तान्त्रिकनिबन्धः ।

No. 38. दाशरथीयतन्त्रम् । Dāśarathīyatantram. Substance, country-made white paper, 14×4 inches. Folia, 364. Lines, 3-10 in a page Character, Nāgara Date, ? Appearance, old. Verse. Not correct Complete.

A Tāntrika work based on Vedik principles, entitled Dāśarathīya Tantra or Vedārtha saṁgraha, originally proclaimed by Rāma, the son of king Daśaratha, before Ṛṣis, Lokapālas, &c., who had gone to Ayodhyā to render homage to Rāma Afterwards Ṛṣyaśṛṅga related it to a large assemblage of Ṛṣis who occasionally met at his Siddhyāśrama. It consists of two parts, Pūrva, the first, and Uttara, the last The former contains sixty chapters, and the latter forty. See the Catalogue of the India Office, Nos. 2557, 2558, p. 866, part IV.

Beginning. श्रीगणेशाय नमः । श्रीसाम्बशिवाय नमः ॥

वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे ।
यन्नत्वा कृतकृत्याः स्युस्तन्नमामि गजाननम् ॥ १ ॥
श्रीरामकौसपादाब्जद्वन्द्वभक्तं जितेन्द्रियं ।
विभाण्डकसुतं शान्ताभर्त्तारं तपसान्निधिम् ॥ २ ॥
सिद्धाश्रमे समासीनमृष्यशृङ्गमकल्मषं ॥
उद्दालक उदंकश्च मौद्गल्यो गालवस्तथा ॥ ३ ॥
गौतमस्य सुतः साक्षाच्छतानंदो महातपाः ।
तीर्थयात्राप्रसङ्गेन सिद्धाश्रममुपागताः ॥ ४ ॥
तत्र सिद्धाश्रमे पुण्यतीर्थे स्नात्वा तपस्विनः ।
ऋष्यशृङ्ग तपोराशिमपश्यन् वीतकल्मषाः ॥ ५ ॥
योगारूढं महात्मानं ज्वलन्तं तपसा मुनिं ।
दृष्ट्वा प्रणेमु साष्टाङ्गं कृताञ्जलिपुटा द्विजाः ॥ ६ ॥
तान् दृष्ट्वा योगिवर्य्यो(र्यो ?)ऽसौ शान्ताभर्त्ता महातपाः ।
पृष्ट्वा कुशलमव्ययमासनेषूपवेशयत् ॥ ७ ॥
मौद्गल्योद्दालकौदंकशतानन्दादयो द्विजाः ।
आसीना आसनेष्वे(स्वे ?)ते विभाण्डकसुतं द्विजं ॥ ८ ॥
धर्म्मजिज्ञासया वाक्यमिदं प्रोचुस्तपोधनाः ।

ऋषय ऊचुः ।

विभाण्डकसुत स्वामिन् सर्व्वज्ञ तपसान्निधे ॥ ९ ॥

...भिर्मत्रुपकार सर्वं सफलमद्य मे ।
...मद्य मता अद्य पितरौ नः पितामहाः ॥ १० ॥
अद्याखाभिर्मद्दाग्नं सर्व्वं त्वत्पाददर्शनात् ।
अद्य धन्याः कृतार्थाः स्म व्रतानि सफलानि नः ॥ ११ ॥
त्वत्पाभ(दाभी ?)वद्दवंदर्शनं पुण्यराशिभि ।
बहुजन्माच्चितैर्लभ्यं नान्यथा तपसानिधेः ॥ १२ ॥
रामएव परं ब्रह्म हुद्रो (?) विष्णु प्रजापति ।
साक्षान्नारायणोनंतो वामनो नरकेसरी ॥
तदुक्तमेतत् परम तत्वं गुह्यतरं शुभं (?) ॥ ३ ॥
श्राव्यमाचार्य्यवक्त्राच्छ्रिष्येण नियतात्मना ।
श्रुत्वा गुह्यतम शास्त्रमिद दाशरथीरितम् ॥ ३१ ॥
देशिकं पूजयेदर्थैर्वस्त्रैराभरणैरपि ।
देशिक शास्त्रवक्तारमसपूज्य विमूढधीः ॥ ३२ ॥
क्रियाहानिमवाप्नोति कार्य्यसिद्धिं न विंदति ।
यः पूजयति वक्तार शास्त्रस्यास्य महात्मना ॥ ३३ ॥
शाश्वतं पदमाप्नोति पुनरावृत्तिवर्ज्जितं ।
कुटुंबवृद्धि धनधान्यवृद्धि सौभाग्यवृद्धिं च सुभानि (?) नित्यं ।
अवाप्य शास्त्रश्रवणेन पश्चात् पर पद याति रमाधिवासं ॥ ३४ ॥
ऋष्यशृंग उवाच ।
इत्युक्तं गिरिजादेव्यै शिवेन परमात्मना ॥ ३५ ॥
चित्कलामनुमाहात्म्यमारभ्यैतद्रहस्यकं ।
पूर्व्वं नारायणेनोक्तमुत्तरं शंकरेरित ॥ ३६ ॥
तत्त्वं दाशरथीयाख्यं वेदसारार्थसंयुते ।
अर्थैकमपि वाध्यायमर्थज्ञानपुरःसरं ॥ ३७ ॥
पठेद्य शृणुयाद्वापि विमुक्तः पापराशिभिः (?) ।
प्रयाति परमं धाम सनातनमनुत्तमम् ॥ ३८ ॥
ऋष्यशृंगमुखाम्भोजाच्छ्रुत्वैतत् परमर्षयः ।
मत्वात्मान परं ब्रह्म रामं नारायणं विभुं ॥ ३९ ॥
ऋष्यशृंगं समाभाष्य ज्ञात्वा धर्मरहस्यकं ।
कृतकृत्यास्ततोजग्मुः स्वाश्रमान् मुदितात्मना ॥ ४० ॥
इदं तत्वं महद्गुह्यं तारकब्रह्मरूपिणा ।
जानकीपतिना प्रोक्तं जगदानंदहेतुकम् ॥ ४१ ॥

Colophon. इति श्रीमदुत्तरत्र्याम्नायतत्त्वरत्नाख्ये दाशरथीये तंत्रे वैदसाराद्वैतसंपत्ते उत्तरभागे सौभाग्यविद्योदये राजराजविद्यामाहात्म्ये प्रास्वरत्नकथनं नाम पंचपञ्चाशत्तमोऽध्यायः ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

No. 39. नारदपञ्चरात्रं (पौष्करसंहिता) । Nāradapañcarātram (Pauṣkarasaṁhitā). Substance, country-made white paper, 10×5 inches. Folia, 1098 (of which fol. 1 is wanting). Lines, 10-11 in a page. Character, Nāgara. Date, ? Appearance, old, worn out, and slightly worm-eaten in parts. Verse. Not correct. Incomplete.

A Tāntrika work consisting of 43 adhyāyas in which Puṣkara is instructed by Bhagavat in sacrificial rites. See the Catalogue of the India Office, No. 2531, p. 846, part IV.

Beginning. नास्ति ।

End. नास्ति ।

Colophon. इति श्रीनारदपञ्चरात्रे पौष्करसंहितायां चतुर्विंशतिर्नाम त्रयश्चत्वारिंशोऽध्यायः ॥

विवरणम्—नारदपञ्चरात्रान्तर्गतः पौष्करसंहिताभिधस्तान्त्रिकनिबन्धविशेषः । पौष्करं प्रति भगवदुपदेशसद्भावात् पौष्करसंहितेति नामधेयमस्य ।

No. 40. नारायणार्चारत्नमाला । Nārāyaṇārcāratnamālā. Substance, country-made white paper, 10×4 inches. Folia, 104. Lines, 5-7 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, partly torn, and worm-eaten throughout. Verse. Generally correct. Complete.

A guide to the worship of God Nārāyaṇa, entitled Nārāyaṇārcāratnamālā, by Bhagavanta Gosvāmin.

Beginning. श्रीगणेशाय नमः ।

नारायणं परं धाम नौमि मोक्षसुखाप्तये ।
यन्नामार्कोदयो हंति मायामोहतमस्तिमीं ॥

प्रातः प्रबुध्य गुरुं देवं च नमस्कृत्य बह्माड़ीपदेनोत्थाय स्वस्तिकाद्यासने नोपविश्य मूलादिब्रह्मरंध्रांतं ज्योतिर्मयं देवं ध्यात्वा संप्राप्यावश्यकं निर्वर्त्य शौचं दंतधावनं च कृत्वा मूलमंत्रेण मुखं प्रक्षाल्याचम्य मंत्राभिषेकपूतदेहः देवनिर्माल्यमपाकृत्य पुष्पादिनाभ्यर्च्य स्नायात्।

End.

अथवान्यप्रकारेण पुरश्चरणमुच्यते।
यद्वर्कस्य चेंद्वोर्वा शुचिः पूर्व्वमुपोषितः॥
नद्यां समुद्रगामिन्यां नाभिमात्रे जले स्थितः।
ग्रासादिमोक्षपर्यंतं जपेन्मंत्रं समाहितः॥
अनंतरं तद्दशांशक्रमाद्धोमादिकं चरेत्।
तदंते मंत्रसिद्ध्यर्थं गुरुं संपूज्य तोषयेत्।
ततश्च मंत्रसिद्धिः स्याद्देवता च प्रसीदति।
अथवा देवतारूपं गुरुं भक्त्या प्रतोषयेत्।
पुरश्चरणहीनोऽपि मंत्रो सिध्येन्न संशयः।
एवं साधितमंत्रस्तु काम्यकर्माण्यथाचरेदिति॥

Colophon. इति श्रीभगवंतगोस्वामिना कृता नारायणार्चारत्नमाला संपूर्णं (?)। श्रीशिवपरमात्मने नमः श्रीरस्तु शुभमस्तु॥

विवरणम्—श्रीभगवंतगोस्वामिकृतनारायणार्चारत्नमालानामकतान्त्रिकोक्तवैतिकरणकनारायणपूजापद्धतिरूपोऽयं प्रबन्धः॥

No. 41. नारायणार्चारत्नमाला। Nārāyaṇārcāratnamālā. Substance, country-made white paper, 16×7 inches. Folia, 35. Lines, 5-12 in a page. Character, Nāgara. Date, Saṁvat 1955. Appearance, fresh. Verse. Not correct. Complete.

Another copy of the same work.

विवरणमूक्तपूर्व्वम्।

No. 42. निगमकल्पद्रुमः। Nigamakalpadrumaḥ. Substance, country-made yellow paper, 18×4 inches. Folia, 32. Lines, 6 in a page. Character, Bengali. Date, ? Appearance, old, and worn out. Verse. Generally correct. Complete.

A Tāntrika work on the Kaula system, entitled **Nigamakalpadruma**, spoken by Pārvatī at the request of Mahādeva, consisting of 13 chapters or paṭalas. It has been noticed by Dr. R. Mitra in his *Notices*, No. 293.

Beginning. ओँ नमो कालिकायै ॥

कैलासशिखरे रम्ये क्रीड़न्तीं नगनन्दिनीम् ।
शर्व्वः प्रणम्य सम्प्रेम्य भगवान् शङ्करोऽब्रवीत् ॥
मातर्द्देवि महाभागे सर्व्वकल्याणकारिणि ।
त्वन्मुखाम्भोज बहुधा श्रुतं बहुविधं मया ।
इदानीं सारभूतं यत् कलौ कार्य्यं तदुच्यताम् ।
तव प्रीतिकरं देवि सुगोप्यं यत्नतः शिवे ।
वद मे सर्व्वकल्याणि यदि स्नेहोऽस्ति मां प्रति ॥

श्रीदेव्युवाच ।

शृणु देव महाभाग तत्तेन कथयाम्यहम् ।
तव स्नेहेन वक्ष्यामि सत्यं सत्यं न संशयः ॥
न वक्तव्यं कदाचित्तु पश्चाराग्रे पुनः पुनः ।
प्रकाशात् सिद्धिहानिः स्यात् सत्यमेतद्ब्रवीमि ते ॥
येन त्वं शिवतां प्राप्तो विष्णोर्विष्णुत्वमेव च ।
ब्रह्मत्वं ब्रह्मणश्चैव देवानाञ्चैव देवता ॥
तदुपायं वदिष्यामि स्वर्गे मर्त्ये रसातले ।
सिद्धानां सिद्धिर्य्येनैव कामिनां काममेव च ॥
शृणु त्वं वदतां श्रेष्ठ ह्यतिगोप्यं वदाम्यहम् ।
सकामश्चैव निष्कामो द्विधा लोकः प्रकीर्त्तितः ।
सकामः कामनायुक्तो निष्कामः केवलः शिवः ॥

End.

तव तद्दिवसे रात्रौ मारीयोगे कुलेश्वर ।
सहस्रं वा तदर्द्धं वा शतं वापि प्रयत्नतः ।
तथा सिद्धिमवाप्नोति सर्व्वथैव कुलेश्वर ।
इति ते कथितं देव मन्त्रसाधनमुत्तमं ।

असाध्ये यदि गृह्णीयात्तदा नैव फलं लभेत् ॥
एतत् क्रमयोगेन सर्व्वसिद्धिः प्रजायते ।
तस्मिन् स्वर्णेन कवचं कृत्वा कण्ठे विधारयेत् ॥
ततः प्रत्यक्षफलदो मन्त्रो भवति शङ्कर ।
स्वर्णाधिद्रूपमाश्रित्य छायायां मनपानयं (?) ।
मां पश्यति मायकेन्द्र सर्व्वार्थेन कुलेश्वर ।

Colophon. इति निगमकल्पद्रुमे चतुर्दशः पटलः ॥ ॥ श्रीगुरुचरणे मम भक्तिरस्तु ।

विवरणम्--निगमकल्पद्रुमाभिधोऽयं कौलाचारविषयकस्तान्त्रिकनिबन्धविशेषः ।

No. 43. नित्याषोडशिकाम्बुधिः । Nityāṣoḍaśikāmbudhiḥ. Substance, country made white paper, 10×5 inches. Folia, 185 (of which the last fol. is torn). Lines, 4-10 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, torn, worm-eaten throughout, and written by different hands. Verse. Not correct. Complete.

This work has been already noticed under the name of Tantra Rāja, see No. 26, and also noticed in the India Office Catalogue under the name of Kādimata tantra, No. 2538, page 854, part IV.

विवरणमनुक्तपूर्व्वम् ।

No. 44. नित्याषोडशिकाम्बुधिव्याख्यानम् । Nityāṣoḍaśikāmbudhivyākhyānam. Substance, country made colourless paper, 10×4 inches. Folia, 83. Lines, 13-19 in a page. Character, Nagara. Date, ? Appearance, old, worn out, and written by different hands. Prose. Generally correct. Incomplete.

A commentary on the above mentioned work, entitled Setubandha, by Bhāskara, complete in eight chapters.

Beginning. श्रीमद्गुरुज्ञानानन्दनाथचरणकमलेभ्यो नमः ॥

श्रीगम्भीरविपश्चितः पितृरभूद् यः कोनमाम्बोदरे ।
विद्याष्टादशकस्य मर्म्मभिदभूद् यः श्रीनृसिंहाद् गुरोः ।
यस्य(श्च ?) शिवदत्तशुक्लचरणैः पूर्णाभिषिक्तोऽभवत्

सर्वे तां त्रिपुरावयीति मनुते तामेकनाथमयीं ॥ १ ॥
वामकेश्वरतंत्रस्थं नित्याषोडशिकार्णवे ।
पूर्व्वोत्तरचतुःशत्यौ व्याचष्टे भास्करः सुधीः ॥ २ ॥
नित्याषोडशिकार्णवनामनि तंत्रे शिवैकपरतंत्रे ।
अतिगहने फणिपदजं संचरितुमपि कः क्षमी मनुजः ॥ ३ ॥
यद्यप्यदमथापि तु पूर्वाचार्य्यैः प्रदर्शितं सेदम् ।
दृष्ट्वैव(?)स्फुरत्तु गुरुमतैरेव चरितास्मि बलात् ॥ ४ ॥
नित्याषोडशिकाम्भोधिः परं पारं यियासवः ।
विश्रामैरष्टभिर्युक्तां सेतुं बंधे मनोज्ञमम् ॥ ५ ॥
आप्रातः कामरूपाद्दिवमुतनद (?) प्रान्तताद्वा प्रतीचो
गांधारात् सिंधमाद्रीडस्यपुत्र (?) स्वरिताद्वा च सेतोरवाचः
आ केदाराद्दीचत्पविनगहनतः संति विद्वत्समाजा
ये ये तानेष यत्नः सुखयतु समस्तान् कृश्मनुबन्धगोष्टे ॥ ६ ॥
इह खलु निखिलजगाभिलषितो(?)यमेवं (नपर्णीयं ? सुखमेव पुरुषार्थः । तच्च ऋचिसमक्रदिसं चेति द्विविधकर्मेण कामभोगपदाङ्गमभिलष्यते। तदुभयसाधनत्वाद्धर्मो धर्म्मसाधनत्वादर्थोऽपि मनोभिर्लक्षित एवेति परस्परं तारतम्य भावापन्ना अपि पुरुषैरर्थ्यमानत्वाविशेषाच्चत्वारोऽपि पुरुषार्थ एव ।

End. नास्ति ।

Colophon. इति श्रीभास्करीयौति नित्याषोडशिकाम्बुधिव्याख्याने सेतुबंधरूपे विश्रामः पंचमोऽभवत् ॥

विवरणम्—श्रीभास्करविरचितसेतुबन्धाभिधनित्याषोडशिकाम्बुधिव्याख्यानरूपोऽयं निबन्धः ।

No. 45. नित्याषोडशिकार्णवः । Nityasodasikārnavaḥ. Substance country made, colourless paper, 12×4 inches. Folia, 28. Lines, 7–10 in a page. Character, Nāgara. Date, Samvat 1629. Appearance, very old, worn out, and torn in most parts. Verse. Generally correct. Complete.

A Tāntrika work, entitled Nityāsoḍasikārṇava, complete in five chapters or paṭalas, by Vāmakeśvara.

Beginning. श्रीगणेशाय नमः । श्रीं नमो भगवत्यै ॥ * * योगिनीं शशिरूपिणीं । देवीं मंत्रमयीं + + + मातृका पीतरूपिणीं ॥ १ ॥ प्रणमामि महादेवीं मातृकां

परमेश्वरीं। कालहृल्लीलहृल्लीलकल्मनाशनकारिणीम् ॥ २ ॥ यदक्षरैक-मात्रेऽपि संसिद्धे स्पर्द्धते नरः। रवितार्क्ष्येन्दुकंदर्पशंकरानलविष्णुभिः ॥ ३ ॥ यदक्षरशशिज्योत्स्नामंडितं भुवनत्रयं वंदे सर्वेश्वरीं देवीं महाश्रीसिद्ध-मातृकां ॥४॥ यदक्षरमहासूत्र । । मृ.न .ये। ब्रह्माद्यादि—कटाक्षांतं तां वंदे सिद्धरूपिणीम् ॥ ५ ॥ यदेकादशमाधारबीजं कोणत्रय । । । कटा-क्षांतजगद्यापि दृश्यते ॥ ६ ॥

End. *Not legible.*

Colophon. इति श्रीवामकेश्वरतंत्रे नित्याषोडशकार्णवे विद्याव्याप्तिसंदर्शनं चतुर्थं पटलं ॥

विवरणम्—नित्याषोडशिकार्णवाख्योऽयं तान्त्रिकनिबन्धः।

No. 46. नित्योत्सवनिबन्धः। Nityotsavanibandhaḥ. Substance, country-made white paper, 10 × 4 inches. Folia, 11. Lines, 6-9 in a page. Character, Nāgara. Date, ? Appearance, old, and slightly worm-eaten in parts. Prose. Generally correct. Incomplete.

A Tāntrika work, compiled from Paraśurāmasūtra, Vaiśampāyana saṁhitā, Sārasaṁgraha, and Bhargavatantra, treating of Dīkṣā, pūjā, &c., by Umānanda-nātha. This codex contains only the first chapter of the work.

Beginning. श्रीमहागणपतये नमः। श्रीपरदेवतायै नमः। श्रीगुरवे नमः।

नत्वा नाथपरंपरां शिवमुखां विघ्नेश्वरं श्रीमहा-
राज्ञीं तन्मसिवां तदीयपृतनानाथां तदंतः परां।
एषामावृतिदेवताः परिचतान्रश्मिव्रजांश्चित्तरान्
वीरांश्च प्रणत्य निबध्नमिदं नाथापि नित्योत्सवं ॥ १ ॥
श्रुत वमता शर्मार्नवतारेणाकृतस्य पठेन।
प्रत्यर्थिकल्पसूत्रं पीत्वा रामण्य र नन्दितोऽयं ॥ २ ॥
काश्मीरीन्नान् देशमेत्य कादियज्ञविद्यारणा।
नाथेन भासुरानंदनाथेनैषाश्च योजितः ॥ ३ ॥
यस्यादृष्टो नास्ति भूमंडलाशा
यस्या दाक्षी विद्यते न क्षितीशः।
यस्याज्ञातं नैव शास्त्रं किमन्यै-
र्यस्याकारः सपरा शक्तिरेव ॥ ४ ॥

भगुरामभत आलदामग्रप्रसरस्य मे विजयेष्ट ।
पार्थिवमीक्रधुर्याणां गुरुचरणस्मरणमेव मार्गाकरं ॥ ५ ॥
आरंभतरुणयौवनप्रौढतदंतोत्मनानवस्थादौः
सर्वादितस्त समभिक्रासैराश्रितेह विश्रांतिः ॥ ६ ॥
येषु दीक्षागणाग्रयोग्यामाक्रीडोपराक्रमाः ।
सामान्यच क्रमोऽन्यथा क्रमेण प्रतिपादिताः ॥ ७ ॥
प्रतिपाद्येषु गुरुत्वमंगतान्यत्र यद्भवेत् ।
तत्सर्वं श्रीगुरुप्रोक्तं रहस्यार्थोऽधिगम्यतां ॥ ८ ॥
नान्योपसंहृतैरंगैः प्रयुंजानस्य मे क्रमात् ।
भ्रम (भम ?) प्रमादस्खलितं समादधतु तद्विदः ॥ ९ ॥
सूत्रसंसूचितानुक्तविरुद्धांगीति कथ्यता ।
तंत्रांतरात् संप्रदायादप्युक्तेह क्वचित् क्वचित् ॥ १० ॥
इह क्रमाणां सर्वेषां श्रीक्रमः प्रकृतिर्मतः ।
अतिदिश्य तमन्यत्र विशेषस्तु निरूप्यते ॥ ११ ॥
ग्रंथोऽर्थिनः साधकस्य सांगे श्रीसुंदरीक्रमे ।
आवश्यकत्वात् प्रथमे दीक्षाविधिरुदीर्यते ॥ १२ ॥

End. नास्ति

Colophon. इति श्रीभासुरानंदनाथचरविंद (चरणारविंद ?) मिलिंदायमानमानसेनो-मानदनाथे (?) निर्मितेऽस्मिनवे कल्पसूत्रानुसारिणि (?) नित्योत्सवनिबंधे दीक्षासमारंभनिरूपणोनामारंभोल्लासः प्रथमः संपूर्णः ॥ श्री ॥

विवरणम्—नित्योत्सवाभिधः कश्चित् तांत्रिकःनिबंधविशेषः श्रीउमानंदनाथविरचितः ।

No. 47. पार्थिवलिङ्गपूजाविधिः । Parthivalingapūjāvidhiḥ. Substance, country made white paper, 12 × 4 inches. Folia, 8. Lines, 6-8 in a page. Character, Nagara. Date, ? Appearance, old, and worn out. Prose. Generally correct. Incomplete.

A guide to the worship of the earthen image of God Śiva, compiled from Rudrayāmala and other Tāntrika works. Anonymous.

Beginning. श्रीगणेशाय नमः । श्रीं नमः शिवाय । अथ पार्थिवलिंगपूजाविधि-र्लिख्यते । अस्य श्रीपार्थिवेश्वरचिंतामणिविद्यामंत्रस्य निषद्धानुषङ्कर्षा

ब्रह्मा ऋषिः कामदुघा देवता गायत्रीच्छंदः श्रीप्रवरदस्वरूपिणी पार्थिवेश्वर-चिंतामणिर्देवता ओं ह्रीं बीजं ह्रीं शक्तिः नम कीलकं ममाभीष्टसिद्धर्थे जपे विनियोगः ॥ ओं ह्रीं ह्रीं सर्व्वज्ञानाय शिवाय अंगुष्ठाभ्यां नमः। ओं ह्रीं ह्रीं सर्व्वतृप्ताय शिवाय तर्ज्जनीभ्यां नमः। ओं ह्रीं ह्रीं नित्यसुप्तशक्ति-शिवाय मध्यमाभ्यां नमः। ओं ह्रीं ह्रीं सर्व्वज्ञानशक्तये अनामिकाभ्यां नमः। ओं ह्रीं ह्रीं नित्यानंदशक्तये कनिष्ठाकाभ्यां (?) नमः॥ ओं ह्रीं ह्रीं अनंतशक्तिशिवाय करतलकरपृष्ठाभ्यां नमः। एवं हृदयादिषडंगं। कर्पूरगौरं करुणावतारं संसारसारं भुजगेंद्रहारं॥ सदा रमंत हृदयार-विंदे (न्दे ?) भवं भवानीशमहं नमामि॥ १॥

End. नास्ति

Colophon. नास्ति

विवरणम् - शिवपूजापद्धतिरूपोऽयं निबन्धः।

No. 48. पुरश्चरणरसोल्लासः। Puraścaraṇarasollāsaḥ. Substance, country made colourless paper, 18×4 inches. Folia, 10. Lines, 11×13 in a page. Character, Nagara. Date, Śaka 1686. Appearance, old, and worn out. Verse. Generally correct. Complete.

A Tāntrika work, in the form of a dialogue between Pārvatī and Mahadeva, on acquiring proficiency in mantras and on the practice of Purascarana, which is a kind of worship, entitled Purascaraṇollāsa. Noticed by Dr. R. Mitra in his Notices of Sanskrit MSS., No. 453.

Beginning. ओं श्रीनाथगुरवे नमः॥

देव्युवाच।

देवपूज्य महाबाहो संसारार्णवतारक।

रहस्यं देवदेवेश पुरश्चरणकर्म्मणः॥

अतिगोप्यं महागुह्यं हृदये विद्यते तव।

कृपया कथयेशान अनुग्राह्याप्यहं यदि॥

श्रीदेव उवाच।

अतिगुह्यं महत्पुण्यं सारात्सारं शुचिस्मिते।

सुषुम्नागर्भमध्यस्थं सर्व्वयोगमयं प्रिये॥

पुरश्चरणरसोल्लासं तन्त्रं ब्रह्ममयं सदा ।
यत्कृत्वा साधकौ याति दुर्लभं परमं पदम् ॥
अचिन्त्यमनघं तत्त्वं सदा हृदि मम स्थितम् ।
एतत्तन्त्रमविज्ञाय पुरश्चर्यां करोति यः ।
स भ्रष्टः स च पापिष्ठः कथं सिद्धिमवाप्नुयात् ।
एतत्तन्त्रानुसारेण पुरश्चर्यां करोति यः ॥
स सिद्धः सगणः सोऽपि स च विष्णुर्न संशयः ॥
दिव्यं वीरं गुरुं मत्वा दीक्षां कृत्वा विचक्षणः ।
ततः समाहितो भूत्वा पुरश्चर्यां करिष्यति ॥
किं तस्य ध्यानपूजायां तस्य सिद्धिरदूरतः ।
न च दीक्षापरं ज्ञानं न च दीक्षापरं तपः ॥
न च दीक्षासमः कामस्तस्माद्दीक्षा गरीयसी ।
दीक्षायां चक्षणापाङ्गे न कालनियमः क्वचित् ॥
सद्गुरोर्दर्शनेनैव सुखपक्षे उपस्थितम् ॥
शिष्यमाहूय गुरुणा कृपया दीयते यदि ।
तदा नासादिकं भद्रे न विचार्यं न चान्यथा ॥
गुरोर्दर्शनमासाद्य दीक्षाकालं विचारयेत् ।
तत्क्षणाच्चक्षणापाङ्गे स शिष्यः पातकी भवेत् ॥
अन्ते च चक्षणापाङ्गे रौरवं नरकं व्रजेत् ।
गुरोराज्ञां मूर्द्ध्नि कृत्वा दीक्षां कुर्य्याद्विचक्षणः ।
न तत्र कालनियमो न होमं श्राद्धमेव वा ॥
भुक्त्वा मनोरमान् भोगान् ततो मोक्षपुरं व्रजेत् ।
नहि भोगं विना देवि जायते मोक्षमव्ययम् ।
अतएव महेशानि कृत्वा भोगं सुदुष्करं ।
महामोक्षं ततो गत्वा शिवशक्तिमयो भवेत् ॥
शिवशक्तिमयं यत्तु महामोक्षं तदुच्यते ।
महामोक्षं विना देवि महाज्ञाने न युज्यते ॥
अनन्तशक्तिसयुक्तं महामोक्षं नगात्मजे ।
दशनेत्रयुतो देवि यदाहं नगनन्दिनि ।
तदैवाहं वरारोहे भवामि सुरपूजिते ॥
तदैव सहसा देवि शिवोऽहं नान्यथा क्वचित् ।
यदा भवाम्यहं देवि रहितो दशचक्षुषा ।

सदैव सहसा भद्रे मायातमात्रतरं सदा ॥
कलारूपेण सा देवी ईश्वरी ब्रह्मरूपिणी ।
यदि भाग्यवशाद्देवि तस्य विद्या च सिध्यति ॥
श्रीगस्य पूर्व्ववद्देवि किञ्चिद्भवति भारते ।
इति ते कथितं सर्व्वं तव स्नेहाद्वरानने ।
न देयं कस्यचिद्भद्रे यदीच्छेदात्मनो हितम् ॥

Colophon. इति पुरश्चरणरसोल्लासे देवीश्वरसंवादे दशमः पटलः । समाप्तोऽयं ग्रन्थः ॥
श्रीरस्तु मयि लेखके सदा । शकाब्दाः १६८६ ॥

विवरणम्—पुरश्चरणरसोल्लासाभिधः पुरश्चरणविषयकोऽयं निबन्धः ।

No. 49. प्रबोधमिहिरोदयः । Prabodhamihirodayah. Substance, foolscap paper, 12×4 inches. Folia, 205. Lines, 2 7 in a page. Character, Bengali. Date, ? Appearance, not old, but written by different hands. Prose. Not correct. Complete.

A treatise on knowledge, compiled from several Tāntrika, Smārta, and Paurāṇika works, entitled Prabodhamihirodaya, by Rāmeśvara Tattwānanda, a kāyastha of the Mitra family. Complete in eight chapters. In the first chapter, false knowledge (अज्ञान) is refuted. The second chapter treats of cause, action and actor, the third dwells on Parabrahma, the fourth on the creation, existence, and destruction of the universe, the fifth on Jiva, the sixth on Brahmavidyā, the seventh on worship, and the eighth on Ācāra. The authorities quoted in the book are Rudrayāmala, Tattwayāmala, Viṣṇupurāṇa, Gitā, Uttaragīta, Kulārṇavatantra, Yogavāśiṣṭha, &c.

Beginning. श्रीगुरवे नमः ॥
सच्चित्कमलमध्यविद्वंसपीठकृतासनं ।
ब्रह्मविष्णुशिवाकारं श्रीगुरुं सततं भजे ॥
कल्याणसन्ने ।
सहस्रदलपङ्कजे शकलशीतरश्मिप्रभं ।
वराभयकराम्बुजं विमलपुष्पगन्धोदयं ।
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं ।
स्मरेत् शिरसि हंसगं तदविधानपूर्व्वं गुरुम् ॥

ब्रह्मरन्ध्रसरसीरुहोदरे नित्यलग्नमवदातमद्भुतम्।
कुण्डलीविवरकाण्डमण्डितं द्वादशार्णसरसीरुहं भजे।
तस्य कन्दलितकर्णिकापुटे क्लृप्तरेखमकथादिरेखया।
कोणलक्षितहलक्षमण्डलीभावलक्ष्यमबलालयं भजे।
तत्पुटे पटुतडित्कडारिम-
स्पर्द्धमानमणिपाटलप्रभं।
चिन्तयामि हृदि चिन्मयं वपु-
र्विन्दुनादमणिपीठमण्डलम्॥
ऊर्द्धमस्य हुतभुक्शिखात्रयं
तद्विलासपरिवृंहणास्पदं।
विश्वघस्मरमहोच्चिदोत्कटं
व्यामृशामि युगमादिहंसयोः॥

तत्त्वयामले।

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः।
तस्मिन् तुष्टे तु संतुष्टा ब्रह्मविष्णुशिवादयः।
आचार्य्यं मां विजानीयान्नावमन्येत कर्हिचित्।
न मर्त्यबुद्ध्याऽसूयेत सर्वदेवमयो गुरुः॥

* * * *

अथ तत्त्वज्ञानार्थं सकलशास्त्रतात्पर्य्यसाधा-
रणार्थग्रहः सर्वाभिमतीहितादर्थं प्रकटीक्रियते॥
संसारे विषयागारे दम्भादिकण्टकावृते।
अज्ञानतिमिराच्छन्ने कस्य न स्यादमार्गगः॥
अतः प्रवृत्ते शास्त्रान् सर्वाभिमीहितोदयः।
यस्य प्रकाशमात्रेन (?) सन्मार्गदर्शनं भवेत्॥
अवकाशाष्टके नास्य प्रदीपे पूर्णता भवेत्।
तत्रावकाशः प्रथमः भ्रमज्ञाननिवारणः।
कारणस्य च कार्य्यस्य कर्त्तुश्चैव विवेचनं।
द्वितीयः परमेशस्य निर्णयस्तु तृतीयकः।
ब्रह्माण्डजन्मसंस्थानसंहाराणां विनिर्णयः।
अवकाशश्चतुर्थोऽत्र पञ्चमो जीवसंस्थितः।
षष्ठावकाशकश्चात्र ब्रह्मविद्याविनिर्णयः।

अभ्यर्चनविधानञ्च सप्तमः परिकीर्त्तितः ।
आचारश्चाष्टमः प्रोक्तो भावेन परिनिश्चितः ॥
अवकाशाष्टकाः प्रोक्ताः प्रबोधमिहिरोदये ।
अज्ञानतिमिरध्वंसान्मुक्तिमार्गो भवत्यसौ ।
* * शास्त्रारम्भं कृत्वा तदर्थं प्रतिजानीते ।
वक्ष्येऽहं सर्व्वशास्त्राणां सिद्धान्तं ज्ञानकारणं ।
प्रमाणिकं गतं चार्थं सिद्धान्तं सर्व्वसम्मतम् ॥

End. वेशे नागाङ्कवागीन्दु (१५९७, शक) विंशतिवासरे ।
साधकानां हितार्थेन संग्रहः पूर्णतां गतः ॥
कामदेवमोहनासीत (?) कुलीनः सर्व्वशास्त्रवित् ।
तत्पुत्रो नन्दनः श्रीमान् कुलतन्त्रविशारदः ।
राजेन्द्ररघुनाथाचौ (?) तत्सुतौ पुण्यभाजनौ ।
रघुनाथसुतश्रीमान् मिश्रो रामेश्वरः स्वय ।
सम्वीक्ष्य मोहमग्नानां मनुजानां दुराशयं ॥
आत्मनः प्रकृतिं चोक्ता स्तम्भितश्च धावतां ।
सन्मार्गदर्शने तेषां प्रबोधमिहिरोदयम् ॥
सारमाकृष्य शास्त्राणामकरोत् कृपया भुवि ॥

Colophon. इति तत्त्वानन्दप्रकटीकृते प्रबोधमिहिरोदये आचारविवरणं नामाष्टावकाशः ।
इति विन्ध्यपुरवास्तव्यसर्व्वविद्यामहामहोपाध्यायश्रीऊतर्कवागीशभट्टाचार्य्य-चरणानुगृहीतः कायस्थमिश्ररामेश्वराख्यतत्त्वानन्देन प्रकटितं सकलशास्त्र-तात्पर्य्यसाधारणोमयहं तत्त्वज्ञानप्रदायकं प्रबोधमिहिरोदयं समाप्तम् ॥ ० ॥

विवरणम्—प्रबोधमिहिरोदयनामकश्रीरामेश्वरमिश्रतत्त्वानन्दविरचितोऽयं ज्ञानविषयकोऽयं प्रबन्धः ।

No. 50. प्रपञ्चसारसंग्रहः । Prapañcasārasaṁgrahaḥ. Substance, country-made white paper, 14×5 inches. Folia, 54. Lines, 10 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, torn, and writing effaced in parts. Prose. Not correct. Incomplete.

A digest of Tāntrika religious duties by Gīrvāṇendra.

Beginning. श्रीगणेशाय नमः ।

नत्वा श्रीशङ्कराचार्यमभरेन्द्रयतीश्वरम् ।
कुर्वे प्रपञ्चसारस्य सारसंग्रहमुत्तमम् ॥

End. नास्ति ।

Colophon. नास्ति ।

विवरणम् —तान्त्रिकपूजादिविषयकोऽयं निबन्धः ।

No. 51. भूतडामरतन्त्रम् । Bhūtaḍāmaratantram. Substance, country made colourless paper, 10×4 inches Folia, 16 Lines, 4-7 in a page Character, Nagara. Date, ? Appearance, old, worn out, and torn in parts Verse. Not correct. Incomplete.

One of the sixty-four original Tantras. It has been very largely quoted by Tāntrika compilers, but complete MSS. of the work are exceedingly rare and its extent is unknown. The codex under notice contains the sixth patala only. Noticed by Dr. R. Mitra in his Notices of Sanskrit MSS., No. 1598. See also the India Office Catalogue, No. 2551, p. 863, part IV.

Colophon. इति षष्ठ (?) पटलः ।

विवरणम् —भूतडामराभिधोऽयं सुप्रसिद्धस्तान्त्रिकनिबन्धः ।

No. 52. पञ्चचक्रपूजनम् । Pancacakrapūjanam. Substance, country made white paper, 4×2 inches. Folia, 3. Lines, 5-7 in a page. Character, Nagara. Date, ? Appearance, old. Verse, Not correct. Incomplete

A part of the Rudrayāmala on the worship of Cakras or circles, which are five in number, viz., Rāja, Mahā, Deva, Vira and Pasu.

Beginning. श्रीगणेशाय नमः ॥ अथ पंचचक्र पूजेन विचार (?)

देवदेव जगन्नाथ सर्वविद्याविशारद ॥
कौलिकानां (?) हितार्थाय चक्रभेदं वद प्रभो ॥
ईश्वरोवाच ।
चक्रं पंचविधं प्रोक्तं शास्त्रे रुद्रयामले ।
विधिना पूजयच्चक्रं सौख्यमोक्षफलोदयं ॥

राजचक्रं महाचक्रं देवचक्रं तथापरं ।
विर (?) चक्र चतुर्थं (?) स्यात् पद्मचक्रं च पंचमं ॥
पूजाद्रव्यं राजचक्रे वदामि शृणु पार्वति ।
चतुर्वर्णा षोडश वर्षा (?) सुरूपा सुमनोहरा ॥ ४ ॥
तदभावे कुमारी च या काचिद्विधिनार्चयेत् ।
शवनि (?) योगिनी चैव रजकी श्वपची (?) तथा ॥ ५
कैवर्त्तकसमुत्पन्ना पंचशक्तिकदाहृता ॥
एता (?) प्रशस्ता सर्व्वासु साधकेन नियोजिता ॥ ६ ॥
ऋतुमंवाभिषेकासु सर्व्वकामफलप्रदा ।

End. नास्ति ।

Colophon. नास्ति ।

विवरणम्—पद्मचक्रपूजनविषयकोऽयं निबन्ध: ।

No. 53. भगवतीपूजाविधि: । Bhagavatīpūjāvidhiḥ. Substance, country made white paper, 8×5 inches, bound like an ordinary book. Folia, 42. Lines, 12-13 in a page. Character, Nagara. Date. ? Appearance, very old, and worn out. Prose. Not correct. Incomplete.

A guide to the worship of the Goddess Durgā. Anonymous.

Beginning. श्रीगणेशाय नम: ॥ अथ श्रीगणपीठपूजा: । सामान्यार्घोदकेन श्रीचक्रमभ्युक्ष्य स्ववामत: पीठोपरि ४ श्रीगुरुपादुकाविद्यामूलार्थे श्रीअमुकानन्दनाथ सर्व्वाधारादारभ्यादितत्त्वादिसमृपातालस्वभावनार्थोपर्युपरि ॥ ४ ॥ ४ ॥ मं मंडूकाय नम: । ४ । कां कालाग्निरुद्राय नम: ॥ मू मूलप्रकृत्यै नम: । ४ । कं कूर्माय नम: ॥ ४ ॥ अं अनंताय नम: ॥ ४ ॥ वं वराहाय नम: तदुपरि ४ । पृं पृथिव्यै नम: पृथिव्या ।

End. नास्ति ।

Colophon. नास्ति ।

विवरणम्—श्रीभगवतीपूजाविषयकोऽयं निबन्ध: ।

No. 54. **महाशैवतन्त्रम्।** Mahāśaivatantram. Substance, country-made colourless paper, 14 × 6 inches. Folia, 48. Lines, 12-16 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, and writing effaced in parts. Verse. Not correct. Incomplete (a part only).

A part of the Mahāśaivatantra, entitled Ākāśabhairavakalpa, on the greatness and worship of Goddess Śūlinī (Durgā), spoken by Śiva at the request of Nārada. Complete in 20 chapters.

Beginning. श्रीगणेशाय नमः। दचिणार्त्तिरूप (दचिणामूर्त्तिरूप ?) गुरुभ्यो नमः ॥

कैलासाद्रेस्तु शिखरे नानाहृद्यमनोहरे ॥ १ ॥
नानापचिगणामोदे नानापचिविनादिते ॥
नानाम्रगकुले दिव्ये नानाजननिषेविते ॥ २ ॥
सहकारोडवोदृष्टसरोवनसमन्विते ।
अमरप्रवरावासे सिद्धगंधर्व्वसेविते ॥ ३ ॥
मंत्री * * पःसिद्ध (मंत्रौषधतपःसिद्ध ?) मुनिवर्यनिषेविते।
कल्पद्रुमहालक्ष्मीहासदघटस्य वै।
नानारत्नविचित्राभिस्तूले कांचनविष्टरे ॥ ४ ॥
आस्थे (?) तत् पुष्पमालाभिविस्तृते सत्कृते शुभे ।
आसीनं तु महादेव देवदानवपूजितम् ॥ ५ ॥
उपास्यमानं मुनिभिर्भक्तिनम्रशिरोधरैः।
कृपया परया युक्तं त्र्यचिणं सचिणं हरं ॥ ६ ॥
प्रणम्य दंडवद्भूमौ नारदः प्राह तं वचः।
भगवन् श्रोतुमिच्छामि माहात्म्यं शूलिनीमनोः ॥ ७ ॥
किं वर्णोऽस्य किमंगं च किं रूपं मंत्रिणो मुनिः।
किं विधिः किं करः किं च किमुद्धारं किमात्मकम्।
सर्व्वेषामपि मंत्राणां हृदयं वेत्थ शङ्कर।
त्वत्तः श्रुतं मया सर्व्वं यद्गुह्यं तु सुगोपनम् ॥ ८ ॥
आस्तिकस्य प्रपन्नस्य ब्रूहि शङ्कर विस्तरात्।

शंकरोवाच (?)।

साधु पृष्टं त्वया ब्रह्मन् साधकानां हितैषिणं (?) ॥ १० ॥
वक्ष्ये दाचिण्यभावत्वादक्षयं फलमश्नुते ॥
प्रतीकारक्षयकरं स्वरचाकरमुत्तमम् ॥ ११ ॥
आत्मसंपत्करं नित्यं सर्व्वव्याधिमहारिपुं।

ज्वरभूतमहातंकनिर्म्मूलनकरं परम् ॥ १२ ॥
ज्ञानमात्रेण सर्व्वेषां विमुक्तिफलदं मुने ।
अज्ञात मुनिभिः श्रेष्ठ देवैश्चापि समाहितैः ॥
मुने मन्वंतरे * * पुनर्विप्रस्य नाम च ।
अविज्ञातं सुदुर्गाद्यैर्भगवद्भक्तिवर्ज्जितैः ॥ १४ ॥
अतिगुह्यतमं साध्वी समाहितमनाः शृणु ॥

End.

एककाके समारूढ़े त्वन्यैर्मेवारिभिर्यथा ।
आगता यदि तत् कार्य्यं मैवद्वदेषद्गतथा ॥
शुभाशुभेषु सर्व्वेषु वायसा बहवस्तथा ॥
आगताश्चेत् तथैवैतत् फलमाप्नोत्यसंशयः (?)
काकागमनतः पूर्व्वमन्यपचि (?) समागतः ।
अनर्थनिश्चितं तेषां मासात्तस्य दैविकं (?) ॥
शिघ्रवया वायसेन पचिणोन्ये समागताः ।
यदि गच्छंति तत् कार्य्यं सोपाधिकमितीरितम् ॥
आगत्य शिवसंतस्ते न गच्छंति शिवाश्रया ।
विपत्तैस्तस्य (?) तत् कार्य्यं न सिध्यति कदाचन ॥
यथाचिराद् गृहीतं (?) तत् तथाकालेन सिध्यति ॥
एवमन्यैश्च विविधैर्नानाशास्त्रोक्तलक्षणैः ।
परीक्ष्य सकलं मंत्री सर्व्वकार्य्याणि साधयेत् ॥
संताने भोगभोग्ये रिपुगतविजये राजकार्य्येऽर्थलाभे
नानाकार्य्येष्वभीष्टे कलयतु मतिमान् वायसैः सूचितानि ॥
चिह्नान्यालोक्य सूक्ष्मं सुलभमसुलभं वीतदोषं सदोषं
मिचारिक्रांतमन्यद्बहुगुणजनितं दैविकं भौतिकं च ॥

Colophon. इति श्रीमहाशैवतंत्रे ह्वक्तिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमा-महेश्वरसंवादे दुर्गाविघ्नचालनविधाने शुभाशुभसूचकवायसबलिविधानं नाम विंशांऽदेशः ॥ श्रीगुरुदक्षिणामूर्त्तये नमः ॥ शिव शिव ।

विवरणम्—पुस्तकेऽस्मिन् महाशैवतन्त्रस्याकाशभैरवकल्पाख्यांशविशेषो वर्त्तते ।

No. 55. महानिर्व्वाणतन्त्रम् । Mahānirvāṇatantram. Substance, country-made yellow paper, 16×4 inches. Folia, 111. Lines, 3-7 in a page. Character, Bengali. Date, ? Appearance, old. Verse. Generally correct. Incomplete.

An original Tāntrika work and the most revered of all the Tantras attributed to Mahādeva. The codex under notice contains only the first half of the text in 14 chapters. Noticed by Dr. R. Mitra in his Notices of Sanskrit MSS., No. 289.

Beginning. ओँ नमः परदेवतायै ॥

गिरीन्द्रशिखरे रम्ये नानारत्नोपशोभिते ।
नानावृक्षलताकीर्णे नानापक्षिरवैर्युते ।
सर्व्वर्त्तुकुसुमामोदमुदिते सुमनोहरे ।
शैत्यसौगन्ध्यमान्द्याख्यमरुद्भिरुपवीजिते ।
अप्सरोगणसंगीतकलध्वनिनिनादिते ।
स्थिरच्छायाद्रुमच्छायाच्छादिते स्निग्धमञ्जुले ।
मत्तकोटिल (कोकिल ?) सन्दोहसंघुष्टविपिनान्तरे ।
सर्व्वदा स्वगणैः सार्द्धं ऋतुराजनिषेविते ।
सिद्धचारणगन्धर्व्वगाणपत्यगणैर्वृते ।
तत्र मौनधरं देवं चराचरजगद्गुरुं ।
सदाशिवं सदानन्दं करुणामृतसागरं ॥
कर्पूरकुन्दधवलं शुद्धसत्त्वमयं विभुं ।
दिगम्बरं दीननाथं योगीन्द्रं योगिवल्लभम् ।
* * * *
सर्व्वेषां हितकर्त्तारं देवदेवं निरामयं ।
प्रसन्नवदनं वीक्ष्य लोकानां हितकाम्यया ।
विनयावनता देवी पार्व्वती शिवमब्रवीत् ,

श्रीपार्व्वत्युवाच ।

देवदेव जगन्नाथ मन्नाथ करुणानिधे ।
त्वदधीनास्मि देवेश तवाज्ञाकारिणी सदा ॥
विनाज्ञया मया किञ्चिद्भाषितं नैव शक्यते ।
कृपावलिश्री मयि चेत् स्नेहोस्ति यदि मां प्रति ।
तदा निवेद्यते किञ्चित् मनसा यद्विचारितम् ॥

तदन्यः संशयस्यास्य कश्चिल्लोक्या महेश्वर।
छेत्ता भवितुमर्हो वा सर्व्वज्ञः सर्व्वशास्त्रवित्॥

श्रीसदाशिव उवाच।

किमुच्यते महाप्राज्ञे कथ्यतां प्राणवल्लभे।
यदकथ्यं गणेशेऽपि स्कन्दे सेनापतावपि॥
तवाग्र कथयिष्यामि सुगोप्यमपि यद्भवेत्।
किमस्ति त्रिषु लोकेषु गोपनीय तवाग्रतः॥
मम रूपासि देवि त्वं न भेदोस्ति त्वया मम॥
सर्व्वज्ञापि न जानासि अनभिज्ञेव पृच्छसि।
इति देववचः श्रुत्वा पार्व्वती हृष्टमानसा।
विनयावनता देवी परिपृच्छसि (?) शङ्करम्॥

श्रीआद्योवाच।

भगवन् सर्व्वभूतेश सर्व्वधर्म्मविदांवर।
कृपावता भगवता ब्रह्मान्तर्यामिना पुरा॥
प्रकाशिताश्चतुर्व्वेदाः सर्व्वधर्म्मोपबृंहिताः।
वर्णाश्रमादिनियमा यत्र वेदे प्रतिष्ठिताः।
तदुक्तयोगयोगाद्यैः कर्म्मभिर्भुवि मानवाः।
देवान् पितॄन् प्रीणयन्तः पुण्यशीला. कृते युगे॥
* * * * * *

आयाते पापिनि कलौ सर्व्वधर्म्मविलोपिनि।
दुराचारे दुष्प्रपञ्चे दुष्टकर्म्मप्रवर्त्तके।
न वेदाः प्रभवन्त्यत्र स्मृतीनां स्मरणं कुतः।
नानेतिहासयुक्तानां नानामार्गप्रदर्शिनां।
बहुनानापुराणानां विनाशो भविता विभो॥
तदा लोका भविष्यन्ति धर्म्मकर्म्मबहिर्मुखाः।
उत्शृङ्खला (?) मदोन्मत्ताः पापकर्म्मरताः सदा॥
कामुका लोलुपाः क्रूरा निष्ठुरा दुर्मुखाः शठाः।
स्वल्पायुर्मन्दमतयो रोगशोकसमाकुलाः।
* * * * *

युगधर्म्मप्रभावेन स्वभावेन कलौ नराः।
भविष्यन्त्यतिदुर्वृत्ताः सर्व्वथा पापकारिणः।

तेषामुपायं देवेश कृपया कथय प्रभो ॥
आयुरारोग्यवर्चसं बलवीर्य्यविवर्द्धनम् ।
विद्याबुद्धिप्रदं नृणामप्रयत्नशुभङ्करम् ॥
येन लोका भविष्यन्ति महाबलपराक्रमाः ।
शुद्धचित्ताः परहिता मातापित्रोः प्रियङ्कराः ।
स्वदारनिरताः पुरुषाः परस्त्रीषु पराङ्मुखाः ।
देवतागुरुभक्ताश्च पुत्रस्वजनपोषकाः ।
ब्रह्मज्ञा ब्रह्मविद्याश्च ब्रह्मचिन्तनमानसाः ।
सिद्ध्यर्थं लोकयात्रायाः कथयस्व हिताय यत् ।
कर्त्तव्यं यदकर्त्तव्यं वर्णाश्रमविभेदतः ।
विना त्वां सर्व्वलोकानां कस्त्राता भुवनत्रये ॥ ० ॥

End. इति ते कथितं देवि सर्व्वधर्म्मविनिर्णयः ।
महानिर्व्वाणतन्त्रस्य पूर्व्वार्द्धं कौलपावनम् ॥

* * * * *

परार्द्धमस्य यो वेत्ति स सर्व्वज्ञो न संशयः ।
परार्द्धसहितं ग्रन्थमेनं जानन्हरो भवेत् ॥
त्रिकालवार्त्तां त्रैलोक्यवार्त्तान्तं कथितुं क्षमः ।
सन्ति तन्त्राणि बहुधा शास्त्राणि विविधान्यपि ।
महानिर्व्वाणतन्त्रस्य कलां नार्हन्ति षोड़शीम् ।
महानिर्व्वाणतन्त्रस्य माहात्म्यं किं ब्रवीमि ते ।
विदित्वैतन्महातन्त्रं ब्रह्मनिर्व्वाणमाप्नुयात् ॥०॥

Colophon. इति श्रीमहानिर्व्वाणतन्त्रे सर्व्वतन्त्रोत्तमोत्तमे सर्व्वधर्म्मनिर्णयसारे श्रीमदाद्यासदाशिवसम्वादे पूर्व्वकाण्डे शिवलिङ्गस्थापनचतुर्व्विधावधूतविवरणकथनं नाम चतुर्द्दशोल्लासः ॥*॥०॥

विवरणम्—महानिर्व्वाणतन्त्रं नाम खण्डद्वयविभक्तं वर्त्तते। अत्र पूर्व्वार्द्धमात्रं वर्त्तते, तत्र च चतुर्द्दशोल्लासाः सन्ति। तत्र प्रथमोल्लासे कलिकालाधःपतितजीवनिस्तारोपायविषयको भगवत्याः महादेवं प्रति प्रश्नः। २ये महादेवस्य परब्रह्मोपासनक्रमविषयकमुत्तरम्। ३ये परब्रह्मोपासनकथनम्। ४र्थे प्रकृतिसाधनोपक्रमः। ५मे मन्त्रोद्धारसंस्कारादयः। ६ष्ठे श्रीपात्रस्थापनहोमचक्रानुष्ठानकथनं। ७मे कुलतत्त्वकथनं। ८मे वर्णाश्रमाचारकथनं। ९मे कुशण्डिकादशविधसंस्कारविधिकथनं। १०मे वृद्धिश्राद्धादिपूर्णाभिषेककथनं। ११शे स्वपरानिष्टजनकपापप्रायश्चित्तकथनं। १२शे सनातनव्यवहार-

कथनं १३शे वास्तुग्रहयागअन्नाशयादिदिवसहृदामसविष्टंप्रतिष्ठादिकथनं, १४शे शिवलिङ्गस्थापन-चतुर्विधजवभूतविवरणकथनं। तस्मिदं वङ्गानुवादसहितं समुद्रितमभवत्।

No. 56. **मन्त्रमहोदधिः।** Mantramahodadhiḥ. **Substance,** country-made white paper, 12×4 inches, bound like an ordinary book. Folia, 181. Lines, 8-17 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, and slightly worm-eaten throughout. Verse. Not correct. Complete.

An exposition of Tāntrika worship, complete in 25 chapters or taraṅgas, by Mahīdhara, son of Nāṭṭu Bhaṭṭa, and grandson of Ratnākara, a commentator of the white Yayurveda, under the patronage of Rājā Lakṣmi Nrisiṁha. See the Catalogue of the India Office, Nos. 2576, 2577, p. 885, part IV. Noticed by Dr. R. Mitra in his *Notices*, No. 1256.

Beginning. श्रीगणेशाय नमः॥

प्रणम्य लक्ष्मीनृहरिं महागणपतिं गुरुं।
तंत्राण्यनेकान्यालोक्य वक्ष्ये मंत्रमहोदधिं॥ १॥
प्रातरुत्थाय शिरसि ध्यात्वा गुरुपदाम्बुजम्।
आवश्यकं विनिर्वर्त्य स्नातुं यायात् सरित्तटे॥ २॥
श्रोतेन विधिना स्नात्वा मंत्रस्नानं समाचरेत्।
स्मार्तसंध्यां मत्रसंध्यां कृत्वा देवं विचिंतयेत्॥
गृहद्वारमथागत्य द्वारपूजां समाचरेत्।
द्वारं वस्त्राम्बुना प्रोक्ष्य गणेशं चोर्द्धतो यजेत्॥ ४॥
महालक्ष्मीं दक्षभागे वामभागे सरस्वतीं।
पुनर्दक्षे यजेद्विघ्नं गङ्गाञ्च यमुनामपि॥ ५॥
पुनर्वामे क्षेत्रपालं स्वःसिंधुयमुने अपि।
पुनर्दक्षे तु धातारं विधातारं च वामतः॥ ६॥
तद्वच्छ्रियौ शंखपद्मौ ततोऽर्च्ये द्वारपालकाम्।
द्वारपूजा (?) विधायेत्थं प्रविश्यार्च्चनमंदिरम्॥ ७॥
उपविश्यासने नत्वा गणेशगुरुदेवताः।
प्राणानायम्य तारेण पूरककुंभकरेचकैः॥ ८॥

वाविंशता चतुःषष्ट्या क्रमात् षोडशसंख्यया ।
देवार्चायोग्यताप्राप्त्यै भूतशुद्धिं समाचरेत् ॥ ३ ॥

End.

विलोक्य नानातंत्राणि प्रार्थितो द्विजसत्तमैः ।
स्वमतेरनुसारेणाकार्षं मंत्रमहोदधिम् ॥ ४ ॥
भूतशुद्धिस्तथाप्राणप्रतिष्ठा न्यसनं लिपेः ।
पुरश्चर्या होमविधिस्तर्पणाद्य ईरितं (?) ॥ ५ ॥
द्वितीयोर्म्मौ गणेशस्य मन्त्राः सम्यक् समीरिताः ।
काली काली भेदनीना (?) सुमुखीति तृतीयके ॥ ६ ॥
तारा तुरीये संप्रोक्ता ताराभेदास्तु पंचमे ।
षष्ठे तरंगे कथिता छिन्नमस्ता शवर्य्यपि ॥ ७ ॥
स्वयंवरा मधुमती प्रमोदा च प्रमोदया ।
बं * बंधनहारीति सप्तमे वररूपिणी ॥ ८ ॥
तथा भेदाश्च वाराही ज्येष्ठा कर्णपिशाचिनी ।
स्वप्नेश्वरी च मातंगी वाणेशी मदनेश्वरी ॥ ९ ॥
अष्टमे विस्तरात् प्रोक्ता बाला बालभिदा अपि ।
नवमे त्वन्नपूर्णोक्ता तद्भेदा मोहना द्विजाः ॥ १० ॥
ज्येष्ठ-लक्ष्मीरवमंत्रा उक्ता प्रत्यंगिरादिह (?) ।
दशमे वगला प्रोक्ता वाराहीद्वितयं तथा ॥ १२ ॥
श्रीविद्यैकादशे प्रोक्ता द्वादशे तु तदावृतिः ।
त्रयोदशे तु हनुमान् विस्तरात् प्रतिपादितः ॥ १३ ॥
चतुर्दशे नारसिंहो गोपालो गरुडोपि च ।
अथ पंचदशे मर्य्यो भौमो जीवः सितो मुनिः ॥ १४ ॥
षोडशोर्म्मौ महामृत्युं जयो रुद्रो धनेश्वरः ।
जाह्नवी मणिकर्णीति प्रोक्ता सप्तदशेऽर्ज्जुनः ॥ १५ ॥
अष्टादशे कान्तराविर्य्यडिकाश्च नवाक्षरः ।
एकोनविंशे चरणायुधः शास्तृसमन्वितः ॥ १६ ॥
पार्थिवार्चनकौनाशचित्रगुप्तासुरी विधिः ।
विंशे तरंगे यंत्राणि स्वर्णकर्षणभैरवः ॥ १७ ॥
स्नानादिरन्त्ययागांत एकविंशेर्च्चनो विधिः ।
द्वाविंशे धर्म्ममारभ्य पूजनं तद्भिदा अपि ॥ १८ ॥
त्रयोविंशे तु दमनैः पवित्रैश्च समर्चनं ।
चतुर्विंशे चक्रभेदैर्मंत्राणां परिशोधनम् ॥ १९ ॥

सप्तमे ऽष्टमे प्रोक्तं कर्मषट्कमनुक्रमात् ।
एवं मंत्रोदधावस्मिन् पंचविंशतिरूर्मय: ॥ २० ॥
विशोधनीया विद्वद्भि: श्रोतव्यं साहसं मम ।
आपन्नं निजबालानां क्षमते जननी यथा ॥ २१ ॥
अहिच्छत्रं द्विजच्छत्रे वत्सगोत्रसमुद्भव: ।
आसीद्रत्नाकरो नाम विद्वत्ख्यातो धरातले ।
तत्तनुजो रामभक्त: पूर्णभद्राभिधोऽभवत् ॥ २२ ॥
महीधरस्तदुत्पन्न: संसारासारतां विदन् ।
निजदेशं परित्यज्य गतो वाराणसीं पुरीं ॥ २३ ॥
सेवमानो नरहरिं तत्रैग्रंथमिमं व्यधात् ॥ २४ ॥
* * * * * *

Colophon. इति श्रीमहीधरविरचिते मंत्रमहोदधौ षट्कर्मनिरूपणं नाम पंचविंशस्तरंग: ॥

विवरणम्—श्रीमहीधरविरचितमन्त्रमहोदधिर्नाम तान्त्रिको निबन्ध: । एतदालोचितविषयास्तु-शेषवाक्ये प्रदर्शिता: ।

No. 57. मन्त्रमहोदधि: । Mantramahodadhiḥ. Substance, country-made colourless paper, 15×5 inches. Folia, 82. Lines, 10-20 in a page. Character, Nāgara. Date, Saṁvat 1862. Appearance, very old, worn out, torn in parts, and written by different hands. Verse. Not correct. Complete.

Another copy of the same book.

End. व्याख्यानाभिधपत्रेण तथान्यै (?) द्विजसत्तमै: ।
अनेकानागमग्रंथान्विलोकितुमनीश्वरै: ॥ २४ ॥
एकग्रंथस्थितं सर्व्वं मंत्राणां सारमिच्छुभि: ।
संप्रार्थितस (: स्व ?) मत्यार्सी नाम्ना मन्त्रमहोदधिम् ॥ २५ ॥
अविच्छिन्नान्वया: सन्तु निजधर्मपरायणा: ।
मंगलानि प्रयच्छन्तु सर्व्वे द्रोहपराङ्मुखा: ॥ २६ ॥
हरि: करोतु कल्याणं सर्व्वेषां जगदीश्वर: ।
प्रवर्त्त * * * मंत्रं ग्रं यावद्दद्दी रति: ॥ २७ ॥

नरसिंहो महादेवे * * * र्गिनाशन: ॥
सुर्द वंशे महालक्ष्मा देवचार मतीभु मे ॥ २८ ॥
नृसिंह उत्संगसमुद्रजौं मा
समुद्रजादीपरटेह निषण्ण: ।
समुद्रजोहो नमति सदाव्यात्
समद्रभक्ताखिलसिद्धिदायी ॥ २९ ॥
राजा लक्ष्मीनृसिंहो जयति सुखकरं श्रीनृसिंहं भजेय
दैत्याधीशा महांतो महता नृहरिणा श्रीनृसिंहाय नौमि ।
सेव्यो लक्ष्मीनृसिंहादपर इह नहि श्रीनृसिंहस्य पादौ
सेवे लक्ष्मीनृसिंहे वसतु मम मन: श्रीनृसिंहा च भक्तम् ॥ ३० ॥
विश्वेशो गिरिजा विंदुमाधवो मणिकर्णिका ।
भैरवी जाह्नवी दण्डपाणिर्मे तन्वतां शिवं ॥ ३१ ॥
अब्दे विक्रमतो याते बाणवेदनृपैर्मिते ।
ज्येष्ठायां शिवस्याग्रे पूर्णमंत्रमहोदधि: ॥

Colophon. इति श्रीमहीधरविरचिते मंत्रमहोदधौ षट्कर्मनिरूपणंनाम पंचविंशस्तरंग: ॥ २५ ॥ संवत् १८६२ मिति वैसाष (ख) सुदी २ वार बुधको लिखालिखतं माधोपुरी गोसाइ वट् नाम सोमनाथसमिप काश्यां मध्ये लीषितं (?) ॥ छ छ छ छ छ छ छ ।

विवरणमूलपूर्व्वम् ।

No. 58. मन्त्रमहोदधि: । Mantramahodadhiḥ. Substance, country-made colourless paper, 10×2½ inches. Folia, 146. Lines, 7 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, and torn in parts. Verse. Generally correct. Incomplete.

Another copy of the same work.

विवरणमूलपूर्व्वम्

No. 59. **मन्त्रमहोदधिटीका।** Mantramahodadhiṭīkā. Substance, country-made white paper, 14×5 inches. Folia, 39. Lines, 13 in a page. Character, Nāgara. Date, ? Appearance, old. Prose. Not correct. Incomplete.

A commentary on the Mantramahodadhi by the author himself, entitled Naukā. Both the text and the commentary were composed in Saṁvat 1645 (वर्षे सायकवेदषट्पमिते). At the beginning of the codex is a śloka by one Maheśvara, who claims to be the author of the commentary, but a short examination of the work soon convinces one that it is identical with Mahīdhara's Naukā.

विवरणम्—पुस्तकेऽस्मिन् नौकानाममन्त्रमहोदधिटीकाऽसंपूर्णा वर्त्तते ।

No. 60. **मन्त्रमहोदधिः सटीकः।** Mantramahodadhiḥ saṭīkaḥ. Substance, country-made colourless paper, 10×6 inches. Folia, 191. Lines, 10–13 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, torn, and writing effaced in parts. Prose and verse. Generally correct. Complete.

This codex contains the text of the Mantramahodadhi with the author's own commentary, entitled Naukā, in the margin.

विवरणम्—पुस्तकेऽस्मिन् नौकाभिधटीकासहितो मन्त्रमहोदधिर्वर्त्तते ॥

No. 61. **मन्त्रमुक्तावली।** Mantramuktāvalī. Substance, country-made yellow paper, 12×2 inches. Folia, 10. Lines, 5–7 in a page. Character, Bengali. Date, ? Appearance, old. Prose. Generally correct. Incomplete.

This codex contains only a part of the Mantramuktāvalī, viz., that on the daily rites.

Beginning. प्रातःकृत्यं । ब्राह्मे मुहूर्त्ते उत्थाय सुप्तस्वाप: सहस्रदलकमलावस्थितं श्वेतवर्णं द्विभुजं वराभयकरं श्वेतमाल्यानुलेपनं स्वप्रकाशस्वरूपं स्ववामस्थितसुरक्तशक्त्या स्वप्रकाशस्वरूपया सहितं गुरुं विभाव्य मानसोपचारैराराध्य नमस्कुर्य्यात् । अखण्डमण्डलाकारमित्यादिना ।

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥
ततो मूलादिब्रह्मरन्ध्रान्तं मूलविद्यां विभावयेत् ॥
उद्यद्दिनकरोद्यतां यावच्छ्वासं (?) हृदाग्रतः ॥
अशेषाशुभशान्त्यर्थं समाहितमनाः शिवं ।
तत्प्रभापटलव्याप्तं शरीरमपि चिन्तयेत् ।

अस्य नित्यत्वमाह गौतमीये ।

इदानीं पूर्व्वकृत्यञ्च प्रसङ्गात् कथयामि ते ।
यत्कृत्वाधिकारितां मन्त्री मन्त्रार्च्चनादिषु ।
येन विना न सिद्धिः स्यान्नरकञ्च प्रपद्यते ॥

यामले च ।

प्रातःकृत्यमकृत्वा तु यो देवीं भक्तितो यजेत् ।
निष्फला तस्य पूजा स्यात् शौचहीना यथा क्रिया ॥

अथ स्नानविधिः ॥

End. अस्य मन्त्रस्याक्षोभ्य ऋषिर्बृहतीच्छन्दः महानीलसरस्वती देवता चतुर्व्वर्गसिद्धये विनियोगः । शिरसि अक्षोभ्यऋषये नमः मुखे बृहतीच्छन्दसे नमः हृदि महानीलसरस्वतीदेवतायै नमः । * * * * * ध्यानपूजादिकं पूर्व्ववत् पुरश्चरणं लक्षमेकं ध्यानं । श्रीं प्रत्यालीढपदार्पितांघ्रिशवहृद्घोराट्टहासा परा । खड्गेन्दीवरकर्तृकर्परभुजा * * भवा खर्व्वा नीलविशालपिङ्गलजटाजूटै कनागैर्युता वाभ्यन्यस्य (?) कपालके त्रिजगतां हन्त्युग्रतारा स्वयं ॥

Colophon. इति मन्त्रमुक्तावल्यां महा * * *

विवरणम्—पुस्तकेऽस्मिन् मन्त्रमुक्तावल्यां नित्यपूजादिविषयकोऽशेषविशेषो वर्णित ।

No. 62. मन्त्रमुक्तावली । Mantramuktāvalī. Substance, country-made colourless paper, 14×6 inches. Folia, 78. Lines, 14–22 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, torn in parts, and written by different hands. Verse and prose. Not correct. Incomplete.

An exposition of Tāntrika rites and formulas. Anonymous. It has been quoted as an authority in Mantraratnāvalī. The codex

does not agree with that noticed in the India Office Catalogue, No. 2582, p. 887, part IV. The Tāntrika works mentioned in it are Prapañcasāra, Yāmala, Yoginī, Bhairavī, Ḍāmara, &c.

Beginning. श्रीगणेशाय नमः ॥ श्रीगुरवे नमः ॥

जयदन्ति (?) जगधीशाधीश्वरी सा भवानी
गुणपदमधिरूढ़ा भूतमुक्तावली या
हिमकरविर्योगार्दतया ब्रह्मरन्ध्रा
भुजकुहरकलया (?) प्रीणमंती दशार्णा (१) ॥
विद्यापंकजबंधुमीधितमहापद्मप्रबद्धासना
मुद्रामुद्रितलीचनाम्बुजयुगासद्योगमुद्रा (?) धरा ।
देहोन्नि (?) लितनीलनीरजविभात्याधुतमन्मोहभृ
राजा कापि मया पदे बलमयी मूर्धा समुज्जृभती (?) ॥ २ ॥
मन्नायनेताञ्जनमन्दिरायै
तद्दृष्टिपाताद्विविजृंभनायै ।
निशेष (?) पापक्षिद्रप्रभायै
तुभ्यं नमः श्रीभवबोधमुद्दे (?) ॥
स्मरामि ताराधिपधाय (?) गौरं
समुल्लसत्पन्नगभूषभूषम् ।
कपर्दिनं सुंदरनीलकण्ठ
मदीयनाथं गिरिजासहायै (?) ॥ ३ ॥
संसारशांववरीवः वारणदारुणोपि (?) ।
यत्संप्रदायतरणि करणीकरोति (?) ॥ ४ ॥
अस्माद्दशेषु भुवि शङ्करपूज्यपादान्
वंदामहे गुरुपदस्य गुरुत्रमस्यां (न् ?) ।
यस्मिन्ना निकुरं च (?) कैरवसुहृद्बिम्बेन्तरुन्मीलति
प्रौढामंदसुधांशुधी मरुहलती तन्वती ॥
लीनं यत्स निदानमेतदखिलं लोष्टं जगज्जालकं
श्रीकाशीनगरी मुनैरगुदिशं तत्पादपद्मं नमः ॥
यदमलयशः (?) कासारेऽस्मिन् विभाति हरेः पदं (?)
सरमविधिनी सरसीविधुः सरसीरुहं ।
अपि च रुचिरं ताराचक्रं समुल्लार (?) परा
सततमिह तं वाणीतीर्थं गुरुं समुपास्महे ॥

*श्रीमत्प्रपं (च) साराञ्जलधे-
रुपदेशपर्ब्बिगर्भे जातमनुमुक्ताफलानां
सन्मतिभूषार्थमुद्धराम्येतान् ॥
क्वापि क्वापि महागमनिकरांकरजनि मंत्ररत्नानि।
मत्संप्रदायगंफैर्ग्रथितानिव (?) प्राप्स्यंति ॥

End. नास्ति ।

Colophon. इति मुक्तावल्यां एकोनविंशतिपटलः ।

विवरणम्—पुस्तकमिदमसंपूर्णं किञ्चिदधिकैकोनविंशपटलपर्य्यन्तं वर्त्तते। तत्र प्रथमे पटले गुरुशिष्यादिलक्षणनिर्द्देशपूर्व्वकं दीक्षाविचारो वर्त्तते। द्वितीयपटले मन्त्राणामक्षरविचारः स्वरूपनिर्द्देशश्च वर्त्तते। तृतीयपटले दीक्षाप्रकारो वर्त्तते। चतुर्थे प्राणायामादिविचारो वर्त्तते पञ्चमे देवताविशेषमन्त्रादिविचारः एवमन्यत्र ज्ञेयम् ।

No. 63. मन्त्रमुक्तावली। Mantramuktāvalī. Substance, country-made colourless paper, 10 × 4 inches. Folia, 9. Lines, 5-7 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, and torn in parts. Prose and verse. Not correct. Incomplete.

This codex contains only a part of the Mantramuktāvalī with a Prākrita translation.

पुस्तकेऽस्मिन् प्राकृतानुवादसहिता मन्त्रमुक्तावल्या अंशविशेषो वर्त्तते ।

No. 64. मन्त्राभिधानम् । Mantrābhidhānam. Substance, country-made yellow paper, 16 × 4 inches. Folia, 13. Lines, 6-7 in a page. Character, Bengali. Date, ? Appearance, old. Verse. Generally correct. Complete.

A lexicon of letters used in Mantras or mystic words, entitled Mantrābhidhāna, compiled by Nandana Bhaṭṭācāryya.

Beginning. श्रीश्रीदुर्गा ॥ भैरव उवाच ।

निर्घण्टमातृकां देवि कथयस्व प्रसादतः ।
यया विज्ञातया देवि सर्व्वज्ञत्वं प्रजायते ॥
यथा जानामि देवेशि निर्घण्टं कथयस्व मे ॥

श्रीभैरव्युवाच ॥

साधु साधु महाबाहो लोकानां हितकारक ।
एवं गूढ़ं निगूढ़ञ्च निर्घण्टमातृकाक्षरं ।
गुरोः परम्पराज्ञातं सवाह्याभ्यन्तरस्थितं ।
नहि जानन्ति ये मूढ़ाः फलं न स्यात् महेश्वर ।
मन्त्रोद्धारप्रसङ्गञ्च पूजाखण्डं गुरुक्रमः ।
मालिनीशक्तिशङ्केतं सिद्धान्तवामदक्षिणं ।
गारुड़ं भूततन्त्रञ्च भैरवं सारसंग्रहं ।
निर्घण्टकं मया प्रोक्तं शतकोटिप्रविस्तरं ॥

श्रीभैरव उवाच ।

स्वच्छन्दगतिसद्भावं भेदनिन्दाविसर्पिणं ।
किञ्चित् किञ्चिच्च जानामि न जानामि च मातृकाम् ।

भैरव्युवाच ।

अङ्गहीनमन्त्रं जानीयात् हीनमन्त्रञ्च मातृकां ।
गोत्रहीनं च संस्थानं गुरुहीनं पदे पदे ॥
तव स्थो(खे ?)हात् प्रवक्ष्यामि निर्घण्टमातृकां शृणु ॥
सर्व्वादौ प्रणवो मन्त्रस्तदुद्धारं शृणु प्रिय ॥
ओंकारं वर्त्तुलं तारं बिन्दुशक्तिस्त्रितत्त्वकं ।
प्रणवं चन्द्रमाद्यञ्च पञ्चदेवं ध्रुवं त्रिकं ॥ ओं ॥
श्रीकण्ठ आद्यजो ऋक्षो ब्रह्म चैवादिमातृका ।
सुरेशश्चैव वागीशः सारस्वतो ललाटजः ॥ (च) ॥
अनन्तश्चान्तको वक्त्रविश्रान्तश्वरुजः कृतः ।
क्षीरोदधिः पयोदश्च दीर्घच्छायी विधानकः ॥ आ ॥
इकारश्चन्द्रसूक्ष्मो च दक्षनेत्रसुगुह्यकः ।
रुद्रस्यः कोटरश्चैव नासिका परिकीर्त्तितः ॥ इ ॥
ईस्त्रिमूर्त्तिर्वामनेत्रं शेखरकोटरस्तथा ।
वाग्मी शुद्धश्च जिह्वाख्यो मायाविष्णुः प्रकाशितः ॥ ई ॥

End.

स्वाहा पशु द्विवभीज्यं ठद्वयं चन्द्रयुग्मकं ।
भुवी हविर्देवमाता देवास्यं वह्निसुन्दरी ॥ स्वाहा ॥
शिखा वषट् शिरोमध्यशक्तिमाता हरप्रिया ॥ वषट् ॥

औधाख्यौष्ठं तनुपश्च मज्जाद्यौ रिपुसंज्ञकः ।
ह्रौंमनुश्च तथा वौषट् मकरध्वजमेव च ॥ वौषट् ॥
चस्त्रादौ फट् छोटिका स्यादस्त्रान्तः सुदर्शनः ॥ फट् ॥

Colophon. इति मन्मथभट्टाचार्यविरचितं मन्त्राभिधानं समाप्तं ॥ * ॥

विवरणम्—पुस्तकेऽस्मिन् मन्त्रव्यवहृतमातृकावर्णानामभिधानानि वर्त्तन्ते ।

No. 65. मातृकाकोषः । Mātṛikākoṣaḥ. Substance, country-made white paper, 8 × 3 inches. Folia, 7. Lines, 6 in a page. Character, Nāgara. Date, ? Appearance, very old. Verse. Not correct. Complete.

Another work on the same subject. Anonymous.

Beginning. श्रीगणेशाय नमः ॥

श्रीनृसिंहं गणेशानं भारतीमीश्वरं शिव ।
नत्वा वक्ष्ये मातृकाया निघंटुं बालबुद्धये ॥ १ ॥
भुवनाद्यास्थिरश्चश्च वेदादिस्तारकोऽव्यय. ।
प्रणवश्च चिमात्रोपि ओंकारो ज्योतिरादिमः ॥ २ ॥
संवर्त्तको नृसिंहश्च हृदयान्मुखमस्थित. ।
अनंतः परमात्मा च वज्रकोर्मोतिमः (?) क्रमः ॥ ३ ॥

End. इति मातृकाकोशः ।

अथ कादिमते प्रोक्ताः शंकरेण शिवां प्रति ।
अकारादिक्षकारान्ता वर्णसंज्ञाः क्रमादमुवेः ॥ १ ॥
वाती मदश्चाविवह्निधरात्माजलवारिणः ।
विभुः खं चचरः शुची (?) भुवनं खं च शक्तियुक् ॥ २ ॥
प्राणस्तेजस्थिरावायुर्भुवायुश्चापि भाव्यकाः ।
वायव्यं नादद्वावौ च कृपार्थोव्योमतीरवः ॥ ३ ॥
शिखी गीधा तोयशून्यजवोद्युतिरर्घो स्मृतः ।
भूमीरसौभवश्चैव व्याप्त छाद्यो रसाश्च च ॥ ४ ॥
विपत्प्रणश्च ध्वजकः स्वरूपे (?) सः ॥
ज्ञात्वाऽमृताः (?) मातृकावर्णसंज्ञास्तु
तान् ज्ञात्वा योवरेन्मनून् ॥

अथैव श्रीकमलाख्या १ श्रीं बं श्रीं कं श्रीं बं ४ श्रीं ब श्रीं ब श्री बं ए
श्रीं बं श्रीं बं ३ श्रीं श्रीं बं बं बं बं बं श्रीं बं बं बं बं श्रीं
[illegible] श्रीं श्रीं बं बं बं बं बं ५ मूल बं मूलं [illegible] ।

Colophon. [illegible]ख्याति ।

विवरणम्—पुस्तकेऽस्मिन् मातृकावर्णानामभिधानं वर्त्तते।

No. 66. मन्त्ररत्नावली। Mantraratnāvalī. Substance, country-made white paper, 14 × 4 inches. Folia, 360. Lines, 7–10 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, torn, and writing effaced in parts. Verse. Not correct. Complete.

An exposition of Tāntrika rites and formulas complete in 45 chapters or ullāsas, compiled by Bhaskara Misra for king Kīrti Simha.* Noticed in the India Office Catalogue, No. 2580, p. 886, part IV. The authorities quoted are Jñānārṇava, Jayadratha Yāmala, Mantramuktāvalī, Tantrarāja, Pañcaratnatantra, Prapañcasāra, Sāradātilaka, &c.

Beginning.

नत्वा श्रीगुरुलक्ष्मणनाथचरणौ सर्व्वार्थसिद्धिप्रदौ
विघ्नध्वान्तदिवाकरं गणपतिं देवीं च वाणीश्वरी।
यद्ग्रंथेषु सुगोपितं गुरुमुखाद्बुद्धा मुदे मन्त्रिणां
सम्यक् क्रियते मया स्वनविधौ श्रीमंत्ररत्नावली ॥
अमलकमलनेत्रा पूर्णशीतांशुवक्त्राद् (?)
दनुजमनुजदेवैः पूजिता सिद्धसंघैः।
उदिततरणितेजोमंडला रक्तकान्ति-
र्दिशतु सकलसिद्धिं सुंदरी साधकेभ्यः ॥ २ ॥
सौन्दर्य्ये कीर्त्तिसिंहो रिपुबलमथनप्रोद्धतः कीर्त्तिसिंहः
औदार्य्ये कीर्त्तिसिंहो विभवविसरणाडम्बरे कीर्त्तिसिंहः।
सत्कीर्त्तौ कीर्त्तिसिंहः सुजनजनमनोवल्लभः कीर्त्तिसिंहः
सद्विद्याकीर्त्तिसिंहः त्रिभुवनभवने कीर्त्तिसिंहात् परः कः।

---

* In the colophon, however, the work is attributed to Kīrti Simha.

मिश्रश्रीभास्कराख्येन कीर्त्तिसिंहस्य चाज्ञया ।
मंत्ररत्नावलीनाम क्रियते बालबोधिनी ॥ ४ ॥

End. अंकयंत्रश्रीविद्यया + + बीजस्य प्रस्तारक्रमणात् स्वर अंकसंख्या + + कोष्ठे विद्यागर्भे अंकलिखनीयमित्युपरार: संप्र + + तथापि आज्ञया लिखितमिति

Colophon. इति श्रीमहाराजाधिराजश्रीमत्कीर्त्तिसिंहविरचितायां मंत्ररत्नावल्यां पंचचत्वारिंशोल्लास' (?) । ग्रन्थ ७००० ।

विवरणम्—श्रीभास्करमिश्रविरचितमन्त्ररत्नावलीनामकोऽयं तान्त्रिकनिबन्धविशेषः ।

No. 67. मन्त्ररत्नावली । Mantraratnāvalī. Substance, country made white paper, 14 × 7 inches. Folia, 115. Lines, 12–15 in a page. Character, Nāgara. Date, ? Appearance, fresh. Verse. Not correct. Complete.

Another copy of the same work recently copied by the order of Mahāmahopādhyāya Nīlamaṇi Nyāyalaṅkāra, late principal of the College.

विवरणमुक्तपूर्व्वम् ।

No. 68. मातृकानिर्घण्टुः । Mātṛkānirghaṇṭuḥ. Substance, country-made colourless paper, 12 × 4 inches. Folia, 4. Lines, 8–9 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, torn, and writing effaced in parts. Verse. Not correct. Complete.

Another copy of the work noticed in No. 64 of this vol.

विवरणमुक्तपूर्व्वम् ।

No. 69. मेरुतन्त्रम् । Merutantram. Substance, country-made white paper, 18 × 6 inches. Folia, 483. Lines, 9 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, torn, worm-eaten, and writing effaced in parts. Verse. Not correct. Incomplete.

A Tāntrika work in a conversational form between Śiva and Pārvatī, in which its teachings and precepts are set forth before an assembly of Gods and Munis who had taken refuge in mount Meru. Complete in 30 chapters (prakāśas). It is so named because it is supposed to overtop all other Tantras. Noticed in the India Office Catalogue, No. 2570, p. 880, part IV; also by Dr. R. Mitra in his Bik. Series, No. 596.

Beginning. श्रीगणेशाय नमः ।

यथा सत् सदिवाभाति न च भाति कदापि सत् (प्यसत् ?)
यस्मिं (?) ज्ञानेन सा भाति तस्मै तस्मै नमो नमः ॥ १ ॥
जलंधरेण विजिते सुरासुरनरेखिलं ।
सूक्ष्मरूपेण ते सर्व्वे महेशं शरणं गताः ॥ २ ॥
+ + + महस्राणि समाधिस्थं विलोक्य तां ।
प्रार्थिता चार्चिता तैस्तु वामदक्षिणमार्गिभिः ।
अंबा तदा बोधयुता नत्वा तं संव्यजिज्ञपत् (?) ।
ध्यायंति विधिवद्ध्यायात्वां त्वं ध्यायसि कं पुनः ।
मां वदंति प + + + वदंति परं शिवम् ॥
आवयोरपि किं ध्येयं तत्त्वं मे कृपया वद ।
इति श्रुत्वा वचस्तस्याः स्मित्वा किंचिन्महेश्वरः ।
उपवेश्य विधींद्रादीन् वाक्यमेतदुवाच ह ॥
नराणां परमं ह्येरायुः मीराः शतं दशः ।
+ + + + योगीनां दिनमायुश्च तच्छतं ।
उच्यते परमं तस्य मानं कलियुगस्य तत् ।
धर्मार्थसार्धसंपूर्णं धर्मणा तं प्रमाणतः ।

End. इति भो कथितं देवा दीपदानं महोचितुः ।
अतःपरं किं वक्तव्यं तत् पृच्छत सुरोत्तमाः ॥

Colophon. इति श्रीमहामायामहाकालानुमते मेरुतंत्रे शिवप्रणीते कार्त्तवीर्यमंत्रकथनं नाम पंचत्रिंशत्प्रकाशः ।

मेरौ शिव प्रणीतेऽस्मि (?) मेरुणा प्रकटीकृतं ।
मेरुभूते च मंत्राणां महेशभुनिनिर्णयः ॥

इति मेरुतंत्र समाप्त (?) ।

The concluding verse clearly indicates that the work is not complete. There must be another chapter at least.

विवरणम्—मेरुतन्त्रमिदं जगदीश्वरविजयानन्तरं सुमेरुपर्व्वतमिलितानां देवानां पुरतः पार्व्वतीं प्रति महादेवेन कथितम्। सुमेरुपर्व्वते कथितत्वात् सर्व्वतन्त्रश्रेष्ठत्वाच्चास्य मेरुतन्त्रमिति संज्ञाऽभवत्। अत्रालोचितविषयाः व्यवस्थाप्रकाशः, संस्कारः, दीक्षा, होमविधिः, चाक्रिकलक्षणं, पुरश्चर्य्या, सिद्धिस्थिरीकरणं, मुद्रालक्षणं, पार्थिवपूजाविधिः, पुरश्चर्य्याकौलिकाचारः, इत्यादयः।

No. 70. योगिनीतन्त्रम् (कामरूपाधिकारः)। Yoginītantram (Kāmarupādhikāraḥ). Substance, country-made white paper, 10 × 4 inches. Folia, 35. Lines, 7–8 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, torn, worm-eaten, and writing effaced in parts. Verse. Not correct. Incomplete.

An original Tantra of the Śākta class in two parts. The first part consists of 19 paṭalas, while the second, entitled Kāmarupādhikāra or Kāmarupanirṇaya, is complete in 14 chapters or paṭalas. The codex under notice contains the second part only. The Yoginītantra is noticed in the India Office Catalogue, No. 2555, p. 866, part IV; also by Dr. R. Mitra in his *Notices*, No. 2213.

Beginning. श्रीगणेशाय नमः॥

प्रधानसाधारविकल्पसत्ता
स्वभावभावा भुवनत्रयस्य।
साविद्यया (व्यया ?) व्यक्तमपीह माया
ज्योतिश्चरं पातु जगंति नित्यम्॥ १॥

श्रीदेव्युवाच।

उड्डियानादिकं पीठं श्रुताऽहं तारपीठकम्।
इदानीं श्रोतुमिच्छामि कामरूपस्य निर्णयम्॥ २॥
यदुक्तं तत्त्वया नाथ घोरपापविनाशनम्।
कामाख्यासंज्ञकं पीठं प्रकाशं तु कलौ गतम्॥
कलिसर्पप्रदंष्ट्राणां विषितानां चिकित्सकम्।
भेषजं परमं देव किंरूपं कथ्यतां विभो॥ ४॥

श्रीभगवानुवाच ।

सत्ययुगे प्राचस्य देवेशि प्रादुर्भावः कृते युगे ।
पूर्णगिरेश्च संभूतिस्त्रेतायुगमुपेऽभवत् ॥ ५ ॥
द्वापरे ज्वालगिरेश्च कामाख्यस्य कलौ युगे ।
घोरस्य कलिपापस्य विनाशाय महेश्वरी । ६ ॥
प्रतिवर्षं तारपीठमुपपीठं युगं युगम् ।
त्र्यं त्र्यं महाक्षेत्रं पुण्यारण्यत्रयं त्र्यं ॥ ७ ॥
प्रतिपीठे महादेवः प्रतिपीठे च पार्व्वती ।
प्रतिपीठं स्थिता गङ्गा प्रतिपीठे चतुर्भुजः ॥ ८ ॥

End. गान्ति ।

Colophon. इति श्रीयोगिनीतन्त्रे सर्व्वतन्त्रोत्तमे द्वाविंशतिसाहस्रे कामरूपीय पटा (?) धिकारे प्रथमतमे द्वितीयभागे प्रथमः पटलः ।

विवरणम्—योगिनीतन्त्रमिदं भागद्वयेन विभक्तं । तत्रास्तीयपुस्तकमिदं कामरूपाधिकाराभिध-द्वितीयभागस्यांशमात्रम् ।

No. 71. भुवनेश्वरीपूजा । Bhuvaneśvarīpūjā. Substance, country-made yellow paper, 10 × 3 inches. Folia, 18. Lines, 2–7 in a page. Character, Bengali. Date, ? Appearance, not very old. Prose. Generally correct. Complete.

A guide to the worship of the Goddess Bhuvaneśvarī, as also to the Puraścaraṇa ceremony to be performed at an eclipse. It contains also the Vījas of several gods in the concluding part.

पुस्तकेऽस्मिन् श्रीभुवनेश्वरीपूजनग्रहणपुरश्चरणनानादेवताबीजानि वर्त्तन्ते ।

No. 72. योगिनीहृदयदीपिका । Yoginīhṛidayadīpikā. Substance, country-made, white paper, 10 × 4 inches. Folia, 116 (of which foll. 1 and 2 are wanting). Lines, 8–11 in a page. Character, Nāgara. Date, Samvat 1715. Appearance, very old, worn out, and written by different hands. Prose. Not correct. Incomplete.

A commentary on the Yôginîhṛidaya by Amṛitânanda, noticed by Dr. R. Mitra in his *Notices*, No. 283.

End. सर्व्वत्र सर्व्वत्र समभावं कथंचिन्न पश्येदित्यर्थः ।
शिवेणातिरहस्यत्वादविस्पष्टतयोदिता ।
तद्रूपनाथचरणात् विज्ञतं मोक्षमच्युतम् ॥

Colophon. इति श्रीमत्परमयोगीन्द्रपुरीश्वनन्दशिष्यामृतानंदनाथयोगिप्रवरविरचितायां योगिनीहृदयदीपिकायां पूजासङ्केतस्तृतीयः समाप्तः ॥ शुभमस्तु ॥ सं १७१५ । भाद्र ।

विवरणम्—योगिनीहृदयाभिधतान्त्रिकनिबन्धस्य टीकारूपोऽयं निबन्धः ।

No. 73. **रश्मिमालामंत्रः ।** Raśmimālāmaṁtraḥ. Substance, country-made yellow paper, 12 × 5 inches. Folia, 6. Lines, 6–9 in a page. Character, Nâgara, Date, ? Appearance, somewhat old. Verse and prose. Not correct. Complete.

A collection of hymns as well as of mystic words. Anonymous.

Beginning. श्रीगणेशाय नमः । अथ रश्मिमालामंत्रः । तत्र वेदोक्तेषु (?) स्वरपूर्व्वकाः ओं भूर्भुव सुरः (?) तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ इति त्रिंशदर्णा गायत्रि (?) । ओं ओं यत इंद्र भयामहे ततो नो अभयं कृर्धि ॥ मघं वं शग्धितवन्तन्न उत यवि द्विषो विमृधो महि ॥ स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी ॥ वृषेंद्रः पुरएतु नः स्वस्तिदा अभयंकरः ॥ इत्यैंद्री सप्तचत्वर्णा संकरेयनाशिनी (?) । ओं घृणी सूर्य्य आदित्यो इत्यष्टार्णा सौरितेजोविद्या ॥ ओं इति प्रणवः केवला ब्रह्मविद्या मुक्तिप्रदा ॥ ओं परो रजसे सावदों ॥ इति अष्टार्णा तुरीया गायत्री ।

End. श्यामवर्णां मदाघूर्णां मदाकुलितलोचनां ।
मनोहराभ्यां दोर्भ्यां च खर्जुरीकुंभधारिणीं ॥
इति ध्यात्वा मुद्राः प्रदर्शयेत् ॥ खङ्ग । कुंभ । किरीट । मकरकुंडल । पंचोपचारैः संपूज्य श्रीमन्मो भगवतीति महामाये सर्व्वशत्रुमानय (?) तिरस्कारं कुरु कुरु स्वाहा । इति

Colophon नास्ति ।

विवरणम्—गायत्र्यादिमन्त्रसंग्रहरूपोऽयं निबन्धः ।

No. 74. रामार्चनचन्द्रिका। Rāmārcanacandrikā. Substance, country-made yellow paper, 12 × 6 inches. Folia, 162. Lines, 2-7 in a page. Character, Nāgara. Date, Śaka 1769; Bengali Era 1254; A. D. 1847. Appearance, somewhat old. Prose. Not correct. Complete.

A manual for the worship of Rāma, complete in five chapters or paṭalas, by Ānandavana, pupil of Mukundavana. The authorities quoted are Agastisaṁhitā, Atharvaṇarahasya, Śrīrāmottaratāpanīya, Gautamīyatantram, Devyāgama, Nāradatantra, &c. Noticed in the India Office Catalogue, No. 2607, p. 905, part IV; also by Dr. R. Mitra in his *Notices*, No. 2010.

Beginning. श्रीगणेशाय नमः।

नन्‌ (तर्न्‌ ?) संसृतिवारिधिं विजगतां गौ नामरजस्य प्रभौ (?)
यंमेदं सकलं विभाति सततं जातं स्थितं संहृतम्‌।
यस्मान्नो निगमा भवंति न मनोमानं च धारायनो (?)
तं वंदे सहजप्रकाशममलं श्रीरामचंद्रं परम्‌।
विश्वव्यापितनोः शुभा रघुपतेर्मूर्त्तिव मूर्त्तिस्तु यो
वाक्यार्थप्रतिबोधनैकचतुरः शांत्यादिशीलः सु(शु ?)चिः।
अज्ञानांध्यनिवारणैकतरणिर्विज्ञानचिंतामणि-
र्नित्यानंदद्वर्गोदकभू (?) विजयते श्रीमन्मुकुंदो मुनिः॥ १॥
वेदांतवाक्यार्थतरिर्विराजते
यस्मिन्‌ गजाः काममदद्वयो (?) नहि
बुधाः सदानंद प्रपेदिरे (?)
वंदे मुकुंदाख्यवनं गुरुं परम्‌॥ ३॥
पूर्व्वं चोत्तरतापनीयमखिलं कल्पं वरं माहते
ब्रह्मागस्त्विवसिष्ठव्यासवयुजाः (?) कल्पांस्तथा संहिताः।
शास्त्रं मंत्रमयं महाकुवलयं त्वालोक्य सौ (गौ ?) तादिकम्‌
श्रीरामार्च्चनचंद्रिका कलिमलप्रध्वंसिका रच्यते॥ ४॥

End. रामोऽस्मीत्यतियत्नधीरनिरतं रामं भज .हचे
यद्रामेण नियुक्तमेतदखिलं रामापत् श्रेयो
रामादेतदभिन्नमेव चरितं कोवेत्ति रामस्य तत्‌॥
रामे सर्व्वमिदं विलीयत इतो मे रामसाम्यं तनु॥
कार्लाश्य' दशकंधरो रघुपतेः
सम्राईनं मैथिलोदारवं च।

विभीषणो बहुविधं ओजं पुनः सांप्रतं
संसारदावानलतापशांत्यै श्रीमत्नंदनः ॥ (१)
स्वामित्वं ह्नुमानुपेत्य प्रकृतिं देवा वियोगं प्रिया
कौपानुगसंवुधिवयमपि मैयां प्रिसम चंद्रार्चनचंद्रिकेयं (१)
स्यात् संश्रितामार्गेसुपाश्रयश्रिसंश्रदिभिर्निर्वितनौषधं यथा ॥ (१)
पटलैः पंचभिः प्रोक्ता श्रीरामार्चनचंद्रिका ।
आनंदवननाम्ना हि कविना हरितुष्टये ॥ ४ ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमन्मुकुंदवनश्रीचरणशिष्यानंदवन-विरचितायां श्रीरामार्चनचंद्रिकायां पंचमः पटलः समाप्तश्चायं ग्रंथः ॥ शुभ-मस्तु शकाब्दा १७६९ सन १२५४ इं १८४७ । ७ जुलाइ । २४ आषाढ ।

विवरणम्—श्रीआनन्दवनविरचितरामार्चनचन्द्रिकाभिधस्तान्त्रिकनिबन्धविशेषः । अत्र पञ्च-पटलाः सन्ति । तत्र प्रथमपटले, पूजानियमरामसन्त्रोद्धारश्च वर्ण्यते । द्वितीये नित्यक्रिया । तृतीये होमपात्रसाधनान्तर्यागपीठपूजास्तोत्राणि । चतुर्थे यन्त्रोल्लेखः । पञ्चमे व्रतानि ।

No. 75. रामार्चनचन्द्रिका । Rāmārcanacandrikā. Substance, country-made white paper, 10 × 4 inches. Folia, 56. Lines, 1–12 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, and torn in parts. Prose. Generally correct. Complete.

Another complete copy of the same work.

विवरणमुक्तपूर्व्वम् ।

No. 76. राधातन्त्रम् । Rādhātantram. Substance, country-made colourless paper, 16 × 3 inches. Folia, 8. Lines, 8 in a page. Character, Bengali. Date, ? Appearance, very old, and worn out. Verse. Not correct. Incomplete.

A Tāntrika work on rites and observances for the guidance of Śākta worshippers, in the form of a dialogue between Hara and Pārvatī. But in the colophons of the first three chapters occur the words वासुदेवत्रिपुरासंवादे. The codex has five chapters only.

Noticed by Dr. R. Mitra in his *Notices*, No. 383. But the words at the beginning of his codex do not agree with ours.

Beginning. श्रीं नमः शिवाभ्यां । श्रीपार्व्वत्युवाच ॥

नमो नन्दिचन्द्रेशविष्णुना परिसेवित
देवदेव महादेव मृत्युञ्जय सनातन ।
रहस्यं वासुदेवस्य राधातन्त्र मनोहरं ।
पूर्व्वं हि सूचितं देव कथामात्रेण शङ्कर ॥
कृपया कथयेशान तन्त्रं परमदुर्लभं ।
ईश्वर उवाच ।
रहस्यं वासुदेवस्य राधातन्त्रं वरानने ।
अत्यन्तं गोपनं तन्त्रं विशुद्धं निर्म्मलं सदा ॥
कालीतन्त्रं यथा देवि तोड़लञ्च तथा प्रिये ।
सर्व्वशक्तिमयं तन्त्रं विद्यायाः साधनाय वै ॥
निगदामि वरारोहे सावधानावधारय ।
वासुदेवो हृषीकेशः सततं मम सन्निधिं ।
आगत्य परमेशानि यदुक्तं तत् शृणु प्रिये ॥

End. नास्ति ।

Colophon. इति वासुदेवरहस्ये राधातन्त्रे शिवपार्व्वतीसंवादे पञ्चमः पटलः ।

विवरणम्—राधातन्त्रं नाम शाक्तपूजादिविषयकसाम्प्रिकनिबन्धविशेषोऽसंपूर्णत्वादेतद्वाक्षीभ्य-विषयाः न सम्यक् प्रदर्शिताः ।

Besides Rādhātantra, the codex contains also (1) Yantracintāmaṇi, (2) Dakṣiṇācāravidhi, (3) Tārārahasyavṛitti, (4) Kumārīhṛidaya, (5) Tārātantra.

(1) यन्त्रचिन्तामणि । Yantracintāmaṇi. Same paper. Folia, 27, (of which fol. 1 is wanting). Lines, 4–10 in a page. Character, Bengali. Date, Śaka 1689. Appearance, very old. Generally correct. Complete.

A work treating of several mystic figures (यन्त्र), complete in 9 chapters, by Dāmodara Paṇḍita.

Beginning. नास्ति ।

End. श्रीशिव उवाच।

अथातः संप्रवक्ष्यामि दुष्टसत्त्वात् प्रमोचनम्।
यदरण्ये महादुर्गे दुष्टसत्त्वैस्तु वेष्टितः।
तदा यन्त्रं प्रकुर्व्वीत वामहस्ततलोपरि।
निष्ठीवनेन क्रोंकारं लिखित्वा मन्त्रमार्ज्जयेत्॥
अनामिकोष्ठवरक्तेन चतुर्द्दिक्षु प्रसेचयेत्।
तत्क्षणान्मुच्यते जन्तुर्यावद्दीपिमहोरगैः।
वृश्चयूकैश्च करिभिर्वन्यैर्दुष्टैर्न संशयः॥

Colophon. इति शान्त्यधिकारे नवमपीठिकायां दुष्टसत्त्वविमोचनं नाम विंशं यन्त्रम्॥०॥ ॥०॥०॥०॥ ग्रहे गजे ऋतौ चन्द्र इति शाके मितेऽपि च मार्गशीर्षस्य संक्रान्तौ शनैश्चरदिने निशि लिखितोऽयं सुयत्नेन यन्त्रचिंतामणिः खलु। ओं श्रीगुरवे नमः॥ श्रीशान्तिको नाम महाधिकारः पूर्णः क्रमः सप्तमकः सुयत्नः। सुखप्रबोधानि तु कीर्त्तितानि यन्त्राणि दामोदरपण्डितेन॥ इति शान्त्यधिकारः समाप्तश्चायं ग्रन्थः॥ श्रीदुर्गा जयतु। श्रीसदाशिवदेवशर्म्मणः पुस्तकमिदं स्वाक्षरञ्च।

पुस्तकं हरते यस्तु कार्णो दुष्टो भवेन्नरः।
मृतः स्वर्गं न गच्छेत्तु पितरं नरकं नयेत्॥

विवरणम्—श्रीदामोदरपण्डितविरचितमारणोच्चाटनवशीकरणविपद्विमोचनादिबहुविषयकविषयको यन्त्रचूडामणिर्नाम निबन्धोऽयम्।

---

(2) **दक्षिणाचारविधिः।** Dakṣiṇācāravidhiḥ. Same paper. Folia, 3. Lines, 5-7 in a page. Character, Bengali Date, 1691 Appearance, very old. Verse. Generally correct. Complete.

A portion of the Kālīrahasyatantra treating of both the Vāma and Dakṣiṇa ways of the worship of Goddess Kālī.

Beginning. ॐ श्रीदुर्गा। अथ दक्षिणाचारविधिः। गोरक्षसंहितायां॥

अथात. सम्प्रवक्ष्यामि पुण्यं वै दक्षिणाविधिम्।
सर्व्वसिद्धिप्रदं साक्षान्महापातकनाशनम्॥
एकलिङ्गे श्मशाने च शून्यागारे चतुष्पथे।
शवोपरि चितास्थो वा शय्यास्थो मैथुने रतः॥
परयोषां योनियन्त्रे पूजयेत् परदेवताम्॥

End.

वामागमे महेशानि यथाश्रुतिविधानतः ।
आमामलकथिता पूर्व्वं या पूजा मातृमांसकैः ॥
आसुरी सा समाख्याता सा ज्ञेयान्यावसायिनाम् ।
यदि वामागमे देवि द्विजातीनां मनोरतिः ।
मद्यवर्ज्जं तदा कार्य्या तव पूजा यथाश्रुति ॥
मद्यस्थाने महेशानि द्विजातिर्वीरभावतः ।
तदा गुड़ार्द्रकं दद्यात् तक्रं वा गुड़मिश्रितम् ॥
नारिकेलोदकं कांस्ये ताम्रे वा विशुद्धेष्वपि ॥
विधिद्वयं समाख्यातं तव पूजाविधौ प्रिये ।
तत् कर्त्तव्यं सदा भक्त्या यस्य यत्र मनोरतिः ॥
इति ते कथितं देवि पशुभावमनुत्तमम् ।
गोपनीयं प्रयत्नेन न कदाचित् प्रकाशयेत् ॥

Colophon. इति कालीरहस्ये दक्षिणाविधिर्नाम चतुर्थः पटलः ॥ ० ॥ ० ॥ शकाब्दाः १६९१ माह आश्विन २८ रोज ॥

विवरणम्—श्रीकालीरहस्यान्तर्गतदक्षिणाचारविधिरूपोऽयं निबन्धविशेषः ॥

---

(3) ताराहस्यवृत्तिः । Tārārahasyavṛittiḥ. Substance, same paper. Folia, 66. Lines, 8–9 in a page. Character, Bengali. Date, ? Appearance, very old. Prose. Generally correct. Incomplete.

A commentary on the Tārārahasya, complete in 15 paṭalas or chapters. It treats in the first chapter of Nityapūjā, in the second of Dīkṣāvidhi, in the third of Puraścaraṇa, in the fourth and fifth of Kāmyanirṇaya, in the sixth of Rahasyanirṇaya, in the seventh of Kumārī worship, in the eighth of Puraścaraṇarahasya, in the ninth of Mantranirṇaya, Stotra, and so forth. The authorities quoted are Nīlatantra, Vīratantra, Matsyasūkta, Bhairavītantra, Mahābhairavatantra, Vijñāneśvarāsaṁhitā, Viśuddheśvaratantra, Kulacūḍāmaṇi. Noticed in the India Office Catalogue, No. 2603, p. 903, part IV.

विवरणन्ताराहस्याख्यतन्त्रटीकारूपोऽयं निबन्धः ।

---

(4) कुमारीहृदयम् । Kumārīhṛidayam. Same paper. Folia, 4. Lines, 8 in a page. Character, Bengali. Date, Śaka 1691. Appearance, old. Verse. Generally correct. Complete.

An original Tāntrika work on the worship of Śakti, especially of Kumārī, revealed by Durgā to Nārada at the request of Śiva. Complete in five paṭalas.

Beginning. ओँ नमः परदेवतायै ॥

एकदोषसि चोत्थाय नारदो ब्रह्मसम्भवः ।
श्रीमन्तारं समभ्यस्य स्वर्ग्दोमगमत् द्रुतम् ।
तत्र स्नातं शिवो देव्या सार्द्धं स्वीयगणैर्गणैः ।
समागता नीरदिव्यं चक्रुः सर्व्वे परस्परम् ॥
शिवे शिव इति सदा जगुरानन्दसंप्लवाः ।
नारदः परमं दृष्ट्वा हरक्रीडनमद्भुतम् ।
हरनामोच्चसंरावैर्वेणुदण्डरवेण च ॥
जगौ कलमतीवाथ ननर्त्त च पुनः पुनः ॥
न्तिं चक्रे ननामासौ समुत्थौ धरणीं गतः ।
शिवोऽथ परया दृष्ट्या सर्व्वकारुणिकोत्तमः ॥
प्रोवाच भगवान् शम्भुर्नारदमृषिसत्तमम् ॥
अहो नारद ब्रह्मर्षे कथं स्तौषि वदस्व मे ।
किमदेयं सुभक्ताय शैवाय वैष्णवाय च ॥
किमिच्छामि हि कथय वदाम्यात्मविशुद्धये ।
श्रुत्वाऽथ नारदो वाक्यं नीलदेहसमुद्भवं ॥
नारदः परमप्रीतो जहर्ष च ननन्द च ॥
प्रणम्य भक्त्या ब्रह्मर्षिः प्रोवाच ललितं वचः ॥
यस्याः कटाक्षलक्ष्योऽपि जगत्पतिर्विलुम्पति ।
सा वामाङ्गङ्गता देवी तस्या भर्त्ता त्वमेव हि ॥
केनैव च विधानेन कृपाऽस्या जायते परा ।
ज्ञातुमित्थं परं तत्त्वं तत्त्वज्ञानेन शङ्कर ॥
तद्वदस्व महादेव गुरो ब्रह्ममय प्रभो ।

End. पूजयित्वा सहस्रं हि जप्त्वा तु पूजयेत् पुनः ।
तस्याः कर्णपुटे सम्यक् स्तोत्राणि कवचानि च ।
पठेत्तां देवताबुद्ध्या प्रणम्य च पुनः पुनः ।

स्थापयेत्तां सुगन्ध्यायां मासमात्रं यदा वशी ।
बीजमेकाक्षरमेवैव जपेत् प्रयतमानसः ॥
विंशाशात् कथ्यते सर्व्वं समासं वा यदिष्यते ॥
सुप्तया च तया रात्रिशेषे यत् कथ्यतेऽबला ।
तद्वाक्यश्रुतिमात्रेण दैवीवाक्यश्रुतिर्भवेत् ॥
शुभाशुभं च विज्ञेयं तेनैव नात्र संशयः ॥
एवं यः कुरुते भक्तः सम्यक् सुस्थिरमानसः ।
तद्देहं शिवसेद्देवी स मुक्तः शिव एव सः ॥
सिद्धमन्त्री यत्र वाथ नानान्या तु विवेचना ।
इति ते कथितं सम्यक् सुगोप्यमिति निश्चितम् ॥

Colophon. इति कुमारीहृदये पञ्चमः पटलः ॥०॥०॥० समाप्तश्चायं ग्रन्थः शकाब्दाः १६९१ ॥ विधौ ग्रहे ऋतौ चन्द्रे शाके परिमितेऽपि च । फाल्गुणस्य सिते पक्षे त्रयोदश्यां महानिशि कुमारीहृदयं तन्त्रं लिखितं भृगुवासरे । चाश्रित्य श्रीगोकुलचन्द्रं धान्यस्टहनिवासिना लिखितं तु प्रयत्नेन सदापूर्व्व-शिवेन हि ॥०॥०॥० ओँ तत् सत् ॥ श्रीगुरोः प्रसादादिष्टदेव्या सदा प्रसन्नास्तु ॥

विवरणम्—कुमारीहृदयाभिधतान्त्रिकनिबन्धोऽयं यत्र, कुमारीपूजनविधिर्वर्त्तते ।

---

(5) तारातन्त्रम् । Tārātantram. Same paper. Folia, 7. Lines, 8 in a page. Character, Bengali. Date, 1691 Śaka. Appearance, old. Verse. Generally correct. Complete.

A Tāntrika work on the worship of Tārā, complete in six chapters or paṭalas.

Beginning ओँ नमः परदेवतायै ॥

कैलासशिखरे रम्ये देवदेवं महेश्वरं ।
पप्रच्छ भैरवी देवी शयनीयसुखोषिता ॥
पुरा यौ कथितौ बुद्धवशिष्ठौ कुलभैरवौ ।
केन मन्त्रेण देवेश सिद्धौ तौ वद मे प्रभो ।
इति पृष्टः स देवेशो भैरवीं वाक्यमब्रवीत् ।

भैरव उवाच ।

स एव परमो देवी शुद्धरूपी जनार्द्दनः ॥

उग्रतारामहामन्त्रं पञ्चार्णं परिजप्य च ॥

सृष्ट्यादिकर्म्मकर्त्ता च अजरामरतां ययौ ।

वाशिष्ठोप्येनमाराध्य नक्षत्रलोकमागतः ।

योगसिद्धीश्वरो भूत्वा योगतन्त्रेऽपि वञ्चते ॥

End. इति ते कथितं तत्त्वं मनुश्चैव समासतः ।

दर्शनाद्दक्षशात्काय सुखं ते परिभुञ्जते ॥

तारातन्त्रं चीनतन्त्रं कालीतन्त्रं गुरूदितम् ।

सर्व्वथा गोपनायैव शक्तिवक्त्रःस्मृतेऽर्पयेत् ॥

देयं शिष्याय शान्ताय साधकाय महात्मने ।

विलासिने स्वतन्त्राय गुरुतन्त्राय सुव्रते ॥

अन्यथाम्नीकमतापि तत् सर्व्वं गुरुवक्त्रतः ।

विरुद्धं वेदवादेऽपि श्रोतव्यं नात्र संशयः ।

Colophon. इति भैरवभैरवीसंवादे तारातन्त्रे षष्ठः पटलः । समाप्तश्चायं तारातन्त्राख्यो ग्रन्थः ॥०॥०॥ शकाब्दा १६११ चित्तौ यद्द ऋतामिन्दौ शाके परिमिते तिथि लिखितं तारिणीतन्त्रं श्रीसदाशिवशर्म्मणा ॥ चैत्रे मासि नवमदिवसे सोमवारेऽथ रात्रौ पक्षे कृष्णे नवम्यां लिखितमिदमपूर्व्वं तारिणीतन्त्रकञ्च ।

विवरणम्—तारातन्त्राभिधतारापूजादिविषयकोऽयं निबन्धः ।

No. 77. रुद्रयामलं (कालीपूजापद्धतिः) । Rudrayāmalaṁ (Kālī-pūjāpaddhatiḥ). Substance, country-made colourless paper, 5 × 8 inches. Folia, 26. Lines, 5-9 in a page. Character, Nāgara. Date, ? Appearance, old. Prose. Generally correct. Complete.

A portion of the Rudrayāmalatantra treating of the worship of Kālī.

Beginning. अथ कालीपूजापद्धतिः ॥ श्रीं ब्राह्मे मुहूर्ते उत्थाय बद्धपद्मासनः सुधीः शिरस्थसहस्रारान्धीसुखशुक्लवर्णकमलकर्णिकान्तर्गतचंद्रमंडलस्थहंसपीठे निज-गुरुं शुक्लवर्णं शुक्लालङ्कारभूषितं । आनानंदमुदितमानसं वराभयकरं

पाणि धृतं रक्तोत्पलया प्रियया शोभितं गुरु' (?) दक्षिणहस्तेन धृतवाङ्कलेवरं शांतं त्रिनयनं सुगुरुणा संप्रदायक्रतनामपूर्व्वकं ध्यात्वा मानसैरुपचारैराराध्य श्रीं क्रीं श्रीं हसक्ष्में ह सरच मल यूह सरफ्रें ॥ अमुकानंदनाथश्रीपादुकां पूजयामि नमः ॥ इति दशधा विमृष्य दंडवत् प्रणामं भूमौ कुर्य्यात् ॥

End. अमुकदेवि क्षमस्वेति संहारमुद्रया स्वहृदि देवीं समानीय तन्मनीभूत्वा निर्म्माल्येन ऐशान्यां दिशि चडेश्वर्य्यै नमः इति संपूज्य निर्म्माल्यादिकं विनियोज्य गुरु' नमस्कृत्य यथासुखं विहरेत् ॥ भूतस्योपेक्षानर्हत्वं प्रसंगः ॥ उपोद्घातचिंतां चिंताप्रकृतिसिद्धार्थमुपोद्घातं विदुर्बुधाः हेतुत्वं (?) कारणत्वं प्रिय्यजिज्ञास्यनिश्चितरवसरः ॥ निर्व्वाहकत्वं संपादकत्वं एककार्य्यकत्वं। कार्य्यकारणभावः ॥

Colophon. इति श्रीरुद्रयामले तंत्रे महारहस्ये कालीपूजापद्धतिः समाप्तः (?) ॥

विवरणम्—रुद्रयामलान्तर्गतकालीपूजापद्धतिरूपोऽयं निबन्धः।

No. 78. रुद्रयामलं (ज्वालाकवचं)। Rudrayāmalaṁ (Jvālākavacaṁ). Substance, country-made white paper, 12 × 5 inches. Folia, 3. Lines, 4–11 in a page. Character, Nāgara. Date, ? Appearance, old, torn, and writing effaced in parts. Verse. Generally correct. Complete.

A portion of Rudrayāmala on the Jvālāmukhīkavacha.

पुस्तकेऽस्मिन् रुद्रयामलान्तर्गतं ज्वालामुखीकवचं वर्त्तते।

No. 79. ज्वालामुखीस्तवराजः। Jvālāmukhīstavarājaḥ. Substance, country-made colourless paper, 14 × 5 inches. Folia, 2. Lines, 9 in a page. Character, Nāgara. Date, ? Appearance, old. Verse. Generally correct. Complete.

A portion of the Rudrayāmala containing a prayer to the Goddess Jvālāmukhī.

Beginning. श्रीं नमो ज्वालामुख्यै।

भैरव उवाच ।

ओं तारं यो भजते मातर्बीजं तव सुधारसं ।

पारावारसुता नित्यं निश्चला तद्गृहे वसेत् ॥ १ ॥

शून्यं यो दहनादिरुढ़ममलं वामाक्षि संसेवितं ।

सेंदुं बिंदुयुतं भवानि वरदे स्वांते स्मरेत् साधकः ।

मुखस्यापि (?) सुरेंद्रसिंधुजलतद्वाग्देवता भारती ।

सद्यः पद्यमयी निरर्गलतरा मातर्मुखे तिष्ठति ॥

End. इति श्रीपरमाज्वालातत्त्वं पंचांगमीरितं ।

परारहस्यकं श्यामामर्थस्वं कुलसंदरि ।

गोप्यं गुह्यतमं सारं शिवदं पुण्यवर्द्धनं ।

कोटियज्ञफलं प्राप्य कुलाचार्यैककारणं ।

स्तुतं योगापदं दिव्यं सर्वैश्वर्यप्रदायकं ॥

सर्वस्वभूतं देवेशि रहस्यं मम पार्वती ॥

परशिष्याय नोदेयं दत्त्वा हानिर्भवेन्मनोः ।

गुरुपूजां विधायादौ गुरुं संतोष्य यत्नतः ।

गृह्णीयात् परमेशानि ज्वालामुख्या यथाविधि ॥

पंचांगमखिलं दिव्यं रहस्यं परदैवतं ।

इदं रहस्यं परमं भक्त्या तव मयोदितं ।

पंचांगमखिलं देवि गोपनीयं स्वयोनिवत् ॥

Colophon. इति श्रीरुद्रयामले तंत्रे ज्वालाशेष * : ज्वालामुखीस्तवराजः संपूर्णः ।

विवरणम्—रुद्रयामलान्तर्गतज्वालामुखीस्तवरूपोऽयं निबन्धः ।

No. 80. रुद्रयामलं ज्वालापटलम् । Rudrayāmalaṁ Jvālā patalam. Substance, country-made colourless paper, 12 × 6 inches. Folia, 5. Lines, 10 in a page. Character, Nāgara. Date, ? Appearance, very old. The papers stick together and the writing is effaced. Verse. Generally correct. Complete.

A portion of the Rudrayāmala, being a guide to the worship of Jvālāmukhī.

पुस्तकेऽस्मिन् ज्वालामुखीपूजापद्धतिर्वर्त्तते ।

No. 81. रुद्रयामलं ज्वालासहस्रनाम। Rudrayāmalam̐ Jvālāsahasranāma. Substance, country-made colourless paper, 12 × 6 inches. Folia, 11. Lines, 2–9 in a page. Character, Nāgara. Date, Saṁvat 1879. Appearance, very old, slightly worm-eaten, and torn. Verse. Generally correct. Complete.

A portion of the Rudruyāmala giving the thousand names of Goddess Jvālāmukhī.

Beginning. श्रीगणेशाय नमः। श्रीं नमो गुरवे सरस्वतीरूपाय।

भगवन् सर्वधर्मज्ञ भक्तानामभयंकर।
पुरा मे यत्त्वया दत्तो वरः कैलाश (स ?) मानतः।
कृपया परया नाथ तं मे दातुं क्षमं (?) भव॥

भैरव उवाच।

सत्यमेतत्त्वया प्रोक्तं वरं वरय पार्वति।
तं प्रयच्छामि संसिद्धै मनस (?) यदभीप्सित।

श्रीदेव्युवाच।

ज्वालामुख्या त्वया देव सहस्राणि (?) तत्त्वतः।
प्रोक्तानि ब्रूहि मे भक्त्या यदि मे त्वत्कृपा भवेत्॥

End. इदं श्रुत्वा सत्यवादी गत्वा रणधरां प्रति।
निर्जित्य शत्रु (सु ?) संघांस्तां प्रत्यायति गृहं (?)॥
वारं (र ?) त्रयं पठेन्नित्यं शत्रुनाशाय पार्वति।
वारत्रयं पठेल्लक्ष्मी (क्ष्मो ?) मुक्त्यै तु शतधा पठेत्॥
वश्यार्थं दशधा नित्यं मारणार्थं च विंशति॥
स्तंभनार्थं पठेन्मंत्री सप्तमांत्रिको क्रमः (?)।
भूम्यर्थं विंशता देवि पठेन्नामसहस्रकं।
प्रत्यहमेकवारांतं मतो मोक्षमवाप्नुयात्।
अप्रकाश्यमदातव्यमवक्तव्यमभक्तिषु।
असद्भाय कुलीनाय कुपुत्राय दुरात्मने।
गुरुभक्तिविहीनाय दीक्षाहीनाय पार्वति।
दत्त्वा कुष्ठी भवेल्लोके परत्र नरकं व्रजेत्।
श्रद्धायुक्ताय भक्ताय साधकाय महात्मने।
सच्चराय सुशीलाय दत्त्वा मोक्षमवाप्नुयात्॥

Colophon. इति श्रीरुद्रयामले तंत्रे ज्वालासहस्रनामा (?) संपूर्णं संवत् १८७९ लिखितं ब्राह्मभीमराम जेष्ठ कृष्णपक्षे १४ ।

विवरणम्—रुद्रयामलान्तर्गतज्वालासहस्रनामानि पुस्तकेऽस्मिन्नुदाहृतानि ।

No. 82. रुद्रयामलं सारोद्धारः । Rudrayāmalaṁ Sāroddhāraḥ. Substance, country-made white paper, 15 × 5 inches. Folia, 23. Lines, 4–14 in a page. Character, Nāgara. Date, Saṁvat 1850. Appearance, very old, worn out, torn, and slightly worm-eaten throughout. Verse. Not correct. Complete as regards a part.

A portion of the Rudrayāmala on the different kinds of clouds and their actions under a dialogue between Umā and Maheśvara, in 11 adhyāyas.

Beginning. श्रीगणेशाय नमः ।

कैलासशिखरासीनं भैरवं परमेश्वर ।
गणकोटिसमाकीर्णं अप्सरोद्गीतकिन्नरैः ॥ १ ।
अर्द्धांगे ललितादेवी वामभागेन संस्थिता ।
ललाटे चंद्रमा चैव वासुकिः कण्ठमाश्रितः ।
तं दृष्टा संभवो देवि (?) पार्व्वती परिपृच्छति ।
ओं नमो वरदेवाय देवाधिपतये नमः ॥

पार्व्वत्युवाच ।

देवाधिदेवता चैव अनादिपरमेश्वर ।
विख्यातस्त्रिषु लोकेषु सृष्टि (?) संहारकारकः ॥
मेघान् कीदृशा देव कथं विद्युत् प्रजायते ।
कीदृशं वर्णरूपं तु शरीरं तस्य कीदृशं ॥

ईश्वरोवाच (?)

शृणु देवि परं गुह्यं मेघमाला यथाक्रमम् ।
वादशानां सहस्रेषु उद्धृतं चोद्धृतं मया ॥
मेघवर्णं प्रवक्ष्यामो सर्वशस्यक्षयं (?)
चतुर्वर्णानि मेघानि विशेषेनाधुना शृणु ।
पूर्व्वाह्णे जायते विप्र मध्याह्ने क्षत्रियस्तथा ।
अपराह्णे तथा वैश्यः शूद्रश्चास्तमिते रवौ ॥

मेघयोङल (?) रूपेण वर्त्ततेपि च गोचरे ।
ब्राह्मण: श्वेतवर्णश्च चत्रियोरक्तवर्णक: ।
पीतवर्णो भवेद्वैश्य: शूद्र: कृष्ण उदाहृतं (?) ।
... सर्व्ववर्णानां (?) विप्रश्चाण्डालमुच्यते ।
मधुरो गर्ज्जति विप्र: चत्रियो गुमगुमायते ।
वैश्यस्य गर्ज्जनं घोरं शूद्रष्टमटमायते ॥

End. कृष्णग्रीवा धूवं (?) विंद्यात् मध्यमं चाधूर्वं भवेत् ।
संधं च ब्राह्मणी विंद्यात् चत्रियश्च दिनचये ।
सततावेण वैश्य शूद्रस्य दर्शनेन तु (?) ॥

Colophon. इति श्रीरुद्रयामले सारोद्वारो (?) उमामहेश्वरसम्वादे मेघमाला मार्घ (?) कांडे (?) काकरुद्रफलाध्यायो नामैकादशोध्याय: ॥ १ ॥ संवत् १८५० कार्त्तिकशुक्ले १ सोमवासरे काशीमध्ये श्रीगंगातटे श्रीसोमेश्वराय नम: ॥ श्रीविश्वेश्वराय नम: लिख्यतं भवांडो वखतराम श्रीरस्तु ॥

विवरणम् – रुद्रयामलान्तर्गतमेघप्रकारतत्कार्य्यादिविषयकोऽयं प्रबन्ध: ।

No. 83. लिङ्गार्च्चनतन्त्रम् । Liṅgārcanatantram. Substance, country-made yellow paper, 15 × 3 inches. Folia, 10. Lines, 6–7 in a page. Character, Bengali. Date, ? Appearance, not old. Verse. Not correct. Complete.

An original Tāntrika work on the worship of Śivaliṅga under a dialogue between Pārvatī and Śiva, complete in 18 paṭalas. It is called also Jñānaprakāśa.

Beginning. ओँ नम: शिवाय । श्रीदेव्युवाच ।

कामरूपं समासीनं शङ्करं त्रिदशेश्वरं ।
पप्रच्छ सादरं देवी योगमाया जगन्मयी ॥
तपोधन महादेव सर्व्वेषामीश्वर प्रभो ।
पुरा यत् सूचितं देव शिवलिङ्गार्च्चनं प्रभो ॥
हृदये विद्यते देव मम शल्योपमं सदा ।
इदानीं परमेशान कृपया शल्यमुद्धर ॥
शिवलिङ्गार्च्चनं तत्वं विचार्य्य कथय प्रभो ॥

साङ्गोपाङ्गेन सहितं रहस्यं यत्र विद्यते ।
देवगन्धर्व्वमनुजा असुराराक्षसाश्च ये ।
ते सर्व्वे सिद्धिमायान्ति शिवलिङ्गार्च्चनात् प्रभो ॥
पूर्व्वं हि सूचितं देव वाक्यं मे वै महेश्वर
सर्व्वं हि कथयेशान यथाह तव वल्लभा (भा ?) ॥

ईश्वर उवाच ।
शृणु नगात्मजे प्रीते मेनकानगनन्दिनि ।
एतज्ज्ञानं महेशानि अज्ञानत्वं वरानने ॥

सर्व्वपूजासु देवेशि लिङ्गपूजापरं परम् ।
लिङ्गपूजां विना देवि अन्यपूजां करोति यः ॥
विफला तस्य पूजा स्यादन्ते नरकमाप्नुयात् ॥
अश्वविट् चविर्यो देवि यदि लिङ्गं न पूजयेत् ।
तत्त्यजात् परमेशानि चण्डचण्डालतां ब्रजेत् ॥
शिवार्च्चनन्तु पूजासु यद्गृहं वर्ज्जितं सदा ।
विष्ठागर्त्तसमं देवि तद्गृहं विद्धि पार्व्वति ॥
अन्नं विष्ठा पयो मूत्रं तस्य वेश्मनि कामिनि ।
शिवपूजां विना देवि अन्य पूजां करोति यः ॥
सर्व्वं विष्ठासमं तस्य पुष्पनैवेद्यमेव च ॥

\+ + + + +

गीयते परमेशानि प्रथमं शिवपूजनं ।
शिवपूजां विना देवि नास्ति पूजा कदाचन ॥
शिवपूजां विना देवि अन्यपूजां करोति यः ।
सएव रसनाहीनः कुष्ठीरी जायते प्रिये ॥

In the third paṭala, different kinds of liṅgas and their respective worshippers are thus enumerated.

चतुर्धा पार्थिवं लिङ्गं वर्णभेदेन पार्व्वति ।
शुक्लं रक्तं तथा पीतं कृष्णञ्च परमेश्वरि ।
शुक्लन्तु ब्राह्मणे शस्तं क्षत्रिये रक्तमिष्यते ।
हरितं वैश्यजातौ तु कृष्णं शूद्रे प्रकीर्त्तितम् ॥

End.

आदौ संपूज्य देवेशि पार्थिवं लिङ्गमद्भुतं ।
ततोऽन्यं पूजयेद्देवि अन्यथा निष्फलं भवेत् ॥
तत्रैव गुह्यं वक्ष्यामि पार्थिवस्य च पूजने ।
पार्थिवं पूजयेद् यस्तु मासि मासि वरानने ।
चतुर्द्दश्यां महेशानि शुक्लायां वरवर्णिनि ॥
कृष्णायाञ्चा महेशानि अमावस्यां विशेषतः ।
निर्म्माय चतुर्द्दश्यां (?) लिङ्गं भक्त्या च पूजयेत् ॥
सम्वत्सरे च देवेशि कृता पूजा च या प्रिये ।
सर्व्वं फलमवाप्नोति नान्यथा तु कदाचन ।
अपरैकं महागुह्यं सारात्सारं परात्परं ॥
शृणु वक्ष्यामि चार्व्वङ्गि येन ब्रह्मसमो भवेत् ॥
एकहस्ते महेशानि निर्म्माय पार्थिवं शिवं ।
पूर्व्वोक्तविधिना देवि पूजयेद्यस्तु पार्थिवम् ॥
दक्षिणे वामहस्ते वा निर्म्माय यं च पार्थिवं ।
तत्फलं परमेशानि जललिङ्गसमो (?) भवेत् ॥
पूजनान्न च लिङ्गानां यत्फलं लभते नरः ।
तत्फलं परमेशानि नान्यथा तु कदाचन ॥
लिङ्गपूजासमं ज्ञानं नम जाने न वर्त्तते ।
लिङ्गपूजा परं तत्वं लिङ्गपूजा परं तपः ।
लिङ्गपूजा परं ज्ञानं लिङ्गपूजा परात्परं ।
ब्रह्माण्डसकलं देवि सदा लिङ्गमयं प्रिये ।
अतएव महेशानि लिङ्गं यस्तु प्रपूजयेत् ।
ब्रह्माण्ड पूजयेत्तेन सततं परमेश्वरि ।
इदं लिङ्गार्च्चनं तन्त्र ज्ञानसारं (?) परात्परं ।
संपूर्ण (?) परमेशानि साक्षात्तीर्थो (?) शुचिस्मिते ।
एतत्तत्त्वं वरारोहे सततं मम मन्दिरे ।
सएव धन्यो देवेशि सएव श्रीसदाशिवः ।
कैलाससदृशाकारं पश्यामि तस्य मन्दिरम् ॥ *

Colophon. इति श्रीलिङ्गार्च्चनतन्त्रे ज्ञानप्रकाशे देवीश्वरसंवादे अष्टादशः पटलः ॥ * ॥ समाप्तोयं (?) लिङ्गार्च्चनतन्त्रं समाप्तं ॥ श्रीश्रीशिवचरणे मम भक्तिरस्तु ॥ श्रीश्रीदुर्गा श्रीश्रीहरिः शरणं श्रीश्रीदुर्गा श्रीश्रीकालि (?) चरणे मम भक्तिरस्तु ॥ श्रीश्रीनारायण । श्रीश्रीसरस्वत्यै देव्यै नमः । श्रीश्रीदुर्गा ।

विवरणम् -लिङ्गार्चनाभिधं मूलतन्त्रमत्र शिवलिङ्गार्चनविधिर्विहितः ।

No. 84. **वीरेश्वरसंवादः ।** Vīreśvarasaṁvādaḥ. Substance, country-made white and yellow paper, 10 × 3 inches. Folia, 4. Lines, 5-7 in a page. Character, Bengali. Date, ? Appearance, very old, worn out, and the papers stick together. Verse. Not correct. Complete.

A portion of the Kāśikhaṇḍa of the Skandapurāṇa on the worship etc. of Vīreśvara (God Śiva) as performed by women desirous of male children.

पुत्रकेऽस्मिन् वीरेश्वरपूजनव्रतं वर्त्तते ।

No. 85. **वरीवस्यारहस्यं प्रकाशसहितम् ।** Varīvasyārahasyaṁ prakāśasahitam. Substance, country-made white paper, 12 × 6 inches. Folia, 71. Lines, 7-9 in a page. Character, Nagara. Date, ? Appearance, old, and written by different hands. Prose and verse. Not correct. Incomplete.

Varivasyārahasya is a work on the mysteries of Tāntrika philosophy in verse by Bhāskara Rāya, surnamed Bhāskarānanda Nātha. The commentary on it, entitled Rahasya, is by the author himself. The codex contains both the text and commentary mixed together. The authorities quoted are Vāmakeśvara Tantra, Yoginīhṛidaya, Virupākṣa Pañcāśika, Śambhavānandakalpalatā, etc.

Beginning. श्रीगुरुर्जयतितराम् ॥

विद्यानां च मनूना मनुसंख्यानां च विद्यानां रहः ।
उपदेष्टा जयतितरां नरसिंहनंदनाथगुरुः ॥
वरीवस्यारहस्याख्यो ग्रंथो यः स्वेन निर्मितः ।
तत्र दुर्घटशब्दानामर्थः संक्षिप्य कथ्यते ॥

तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदाचार्यवान् पुरुषो वेदेत्यादिश्रुत्या गुरुप्रसदनस्य तत्त्वज्ञानजनकत्वात् प्रथमं सकलमंत्राधिष्ठातृदेवता एव परःरूपं गुरुत्रयविशेषं तद्दैवतं नारसिंहं च विघ्नविघाताय शास्त्रं यः संप्रदायं तदाश्रयैव प्रवर्त्तयति ।

The principle of creation is thus referred to:—

नैसर्गिकी स्फुरत्ता विमर्शरूपास्य वर्त्तते शक्तिः ।
यद्योगादेव शिवो जगदुत्पादयति संहरति ॥ ३ ॥
सावश्यं विज्ञेया यत्परिणामादभूदेषा ।
अर्थमयी शब्दमयी च क्रममयी देहमय्यपि च सृष्टिः ॥ ४ ॥

End. नास्ति ।

Colophon. इति श्रीनृसिंहानंदनाथचरणाराधकेन भास्कररायनाम्ना भासुरानंदनाथेनो-परचितो (?) वरीवस्यारहस्ये तत्प्रकाशे च प्रथमोऽंशः ॥ १ ॥

विवरणम्—वरीवस्यारहस्यं नाम तान्त्रिकनिबन्धोऽयं श्रीभास्कररायापरनामकश्रीभासुरानन्द-नाथविरचितः असंपूर्णत्वात् पुस्तकमिदं न सम्यगालोचनमर्हति ।

No. 86. मातृकाभेदतन्त्रम् । Mātṛikābhedatantram. Substance, country-made yellow paper, 18 × 5 inches. Folia, 22. Lines, 8–10 in a page. Character, Bengali Date, ? Appearance, old, and worn out. Verse. Generally correct. Complete.

An original Tāntrika work treating of the Śākta system as explained by Śiva at the request of Pārvati. Complete in 14 paṭalas. It begins with the rules of preparing gold chemically, etc., thus :—

Beginning. ओं नमो गणेशाय ।

कैलासशिखरे रम्ये नानारत्नोपशोभिते ।
पप्रच्छ परया भक्त्या भैरवं परमेश्वरं ॥
श्रीचण्डिकोवाच ।
त्रिपुरापूजनं नाम सर्व्वतन्त्रे विशेषतः ।
कालिकायां स्वर्णरत्नं गुप्तभावं तथा मणिः ॥
केनोपायेन देवेश स्वर्णरत्नादि लभ्यते ॥
तद्वदस्व विशेषेण यथा रत्नादिकं भवेत् ।
यथोक्तं सर्व्वतन्त्रेषु तद्वदस्व दयानिधे ॥
श्रीशङ्कर उवाच ।
शृणु देवि प्रवक्ष्यामि यथा रत्नादिकं भवेत् ॥
मतेजसा पारदेन किं रत्नं नहि लभ्यते ॥

The second paṭala begins with a description of how a child is born in the womb of its mother. At the request of Pārvatī, God Śiva says :—

मणिपूरे महापद्मं सुषुम्नामध्यसंस्थितं ।
तस्यान्नामेन देवेशि नाभिपद्मं मनोहरं ।
रम्भुत्रयसमायुक्तं सदाशुक्रविभूषित ।
ऊर्द्ध नाले सहस्रारे अतः शुक्रविभूषितं ।
तस्मादेवस्तनद्वन्द्वं वर्द्धमानं दिने दिने ।
मध्यनाले सुषुम्नान्तं रक्ताकारं सुशोतलं ।
यायोन्ययमधोनालं सदानन्दमयं शिवे ॥
नाभिपद्मस्तु यद्रूपं तत्शृणुष्व समाहिता ।
विन्दुस्थानं मध्यदेशे सदापद्मविराजितं ।
बाह्यदेशे चाष्टपत्रं चतुरस्रञ्च तद्बहिः ॥
चतुर्द्वारसमायुक्तं सुवर्णाभं सकन्तकम् ।
तत्पत्रेण भवेत् पुष्पकन्तयुक्तं त्रिपत्रकम् ॥
प्रफुल्ले तु त्रिपत्रारे वाह्ये रुधिरदर्शनम् ॥
याते शुक्रे पद्ममध्ये सन्ततिस्तेन जायते ॥

In the fourth paṭala drinking is thus recommended by Śiva :—

महापातकयुक्तेन कारणं पीयते यदा ।
ज्ञानान्मुक्तिर्भवेत् सत्यं जातिभेदादिकं नहि ॥
कारणं देवदेवेशि मोक्षदं सर्व्वजातिषु ॥

End. शृणु देवि प्रवक्ष्यामि साधिकायाश्च लक्षणं ।
दिव्यशक्तिर्वीरशक्तिर्गुरुशक्तिस्तथापरा ॥
कुलशक्तिः कामिनी च नरशक्तिः कुमारिका ।
श्रीगुरुं पूजयेद्भक्त्या स्वदेहदानपूर्व्वकं ।
अन्यथा तु स्वदेहस्य निग्रहो जायते ध्रुवम् ।
सप्तजन्मनि सा देवि पुंश्चलि जायते ध्रुवम् ।

Colophon. इति मातृकाभेदतन्त्रे चतुर्द्दशः पटलः ॥ ० ॥ ० ॥ ० ॥

विवरणम्—शक्त्युपासनाविषयकोमातृकाभेदतन्त्राभिधोऽयं निबन्धः ॥

No. 87. बालाकवचम् । Bālākavacam. Substance, country-made yellow paper, 10 × 5 inches. Folia, 19. Lines, 8–9 in a page. Character, Nāgara. Date, ? Appearance, old. Not correct. Incomplete.

A guide to the worship of Bālātripurasundarī, containing the formula of a kavaca or amulet in her name.

Beginning. श्रीरस्तु ॥ ओं श्रीबालायै नमः। अस्य श्रीबालापरमेश्वरीकवचमंत्रस्य रौद्रसिया मूर्त्ति (?) ऋषिः। ऐं क्लीं क्लूं क्लैं क्लौं क्लः पंक्तिछंदः ॥ ऐं क्लीं सौः श्रीबालापरमेश्वरीदेवता ऐं बीजं ॥ सौः शक्तिः ॥ क्लीं कीलकं मम चतुर्व्वर्गफलप्राप्त्यर्थं सर्व्वविघ्ननिवारणार्थं विनियोगः।

End. नास्ति ।

Colophon. नास्ति ।

विवरणम्—पुस्तकेऽस्मिन् बालात्रिपुरसुन्दर्या, कवचं पूजापद्धतिश्च विद्यते ॥

No. 88. परानंदतन्त्रम् । Parānamdatantram. Substance, country-made colourless paper, 9 × 3 inches. Folia, 11. Lines, 4–7 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, and writing slightly effaced in parts. Verse. Not correct. Incomplete.

This codex contains only a portion of the second chapter or pāda of the Parānandatantra on Dīkṣā.

Beginning. श्रीगणेशाय नमः ॥ श्रीशारदांबायै नमः ॥ श्रीगुरुभ्यो नमः ॥ श्रीत्रिपुरसुंदर्यै नमः ॥ अथ दीक्षां प्रवक्ष्यामि (?) देवि संक्षेपतश्शृणु (सक्षेपतः॰ श्रृणु ?)

वेदाभ्यासनिरत देवीभक्तिसमन्वितं । १

एव प्रकाशकं (?) शिष्यं (?) प्रपश्येद्गुरुपुंगव. ॥

End. तन्मुखासनकाले तु उच्छिष्टं देवि दीयताम् ।

श्रीपादांबुदमुद्रां स्वात्मपात्रेण पूरयेत् ॥ ५३ ॥

पूर्णाभिषेकसिद्ध्यर्थं दीयेत सह दीयता ॥ ५४ ॥

Colophon. इति श्रीपरानंदतंत्रे सपादलक्षग्रंथे मंत्रखंडे द्वितीयपादे द्वात्रिंशद्दीक्षाक्रमो नाम पंचमर्ंशिकः (?) संपूर्णः (?) ॥ श्रीगुरुदेवतार्पणमस्तु ॥ श्रीसांबशिवार्पणमस्तु ॥ छ ॥

विवरणम्- पुस्तकेऽस्मिन् परानन्दतन्त्रीयद्वितीयपादस्य पञ्चमाह्निकमात्रं वर्त्तते ।

No. 89. बालार्च्चाक्रमदीपिका । Bālārccākramadīpikā. Substance, country-made colourless paper, 10 × 5 inches. Folia, 32. Lines, 5 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, and torn in parts. Prose. Generally correct. Complete.

A guide to the Tāntrika rites and daily oblations enjoined upon the votaries of Bālātripurāsundarī, entitled Bālārccākramadīpikā. Anonymous.

Beginning. श्रीगणेशाय नमः ।

कृष्णानंदगुरुं नत्वा नत्वा श्रीपरदेवतां ।
क्रियते ऽत्मबोधाय बालार्चाक्रमदीपिका ॥ १ ॥
प्रातःकृत्यमकृत्वा तु यो देवीं भक्तितोर्चयेत् ।
तस्य पूजा तु विफला शौचहीना यथा क्रिया ॥ २ ॥

End. बालार्कायुततेजसं त्रिनयनां रक्तांबरोल्लासिनीं
नानालंकृतराजमानवपुषं बालोडुराट् (बालेन्दुराट् ?) शेखरां ।
हस्तैरिक्षुधनुःसृणिं सुमशरं पाशं मुदा बिभ्रतीं
श्रीचक्रस्थितसुंदरीं त्रिजगतामाधारभूतां स्मरेत् ॥

तदुक्तं सारदातिलके

सर्व्वैः पुष्पैः सदा पूज्या विहिताविहितैरपि ।
कार्त्तिक्या सर्व्वदेवानां भक्तियोगोऽत्र कारणं ॥

Colophon. इति श्रीबालार्चाक्रमदीपिकाया समाप्तं (?) ॥ शुभमस्तु ॥ श्रीरस्तुसमाप्तं च ॥

विवरणम्—बालात्रिपुरासुन्दरीपूजापद्धतिरूपोऽयं निबन्धः ।

No. 90. बालाजपः । Bālājapaḥ. Substance, country-made white paper, 6 × 2 inches. Folia, 4. Lines, 2 7 in a page. Character, Nagara. Date, ? Appearance, very old, and worn out. Prose. Not correct. Complete.

A guide for the utterance of the different *vījas* relating to Tripurāsundarī.

Beginning. श्रीगणेशाय नमः ॥ अथ बालायाः जपप्रकार (?)माह ॥ अस्य श्रीबालात्रिपुरसुंदरी (?) मन्त्रस्य दक्षिणामूर्तिः ॥ ऋषिः पंक्तिश्छन्दः बालात्रिपुरादेवता ऐं बीजं क्लीं कीलकं सौः शक्तिः बाला त्रिपुरसुंदरी प्रीत्यर्थं जपे विनियोगः ॥

End. गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात् त्वयि स्थिता (?)
इति देव्यावामकरे जपं समर्पयेत् ॥

Colophon. नास्ति ।

विवरणम्—बालात्रिपुरसुन्दरीमन्त्रजपविषयकोऽयं निबन्धः ॥

No. 91. बालादेवीपूजाप्रयोगः । Bālādevīpūjāprayogaḥ. Substance, country-made colourless paper, 8 × 5 inches. Folia, 8. Lines, 9–12 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, and slightly worm eaten in parts. Prose. Generally correct. Complete.

Another guide to the worship of Bālātripurāsundarī. Anonymous.

बालात्रिपुरसुन्दरीपूजाविषयकोऽयमपरो निबन्धः ।

No. 92. बालासहस्रनाम । Bālāsahasranāma. Substance, country-made white paper, 12 × 4 inches. Folia, 18. Lines, 1-8 in a page. Character, Nāgara. Date, ? Appearance, old. Verse. Not correct. Complete.

This is a part of Umā Mahesvarasaṁvāda, which again forms a part of the Rudrayāmala, containing one thousand names of Bālātripurāsundarī.

पुस्तकेऽस्मिन् रुद्रयामलीयोमामहेश्वरसंवादान्तर्गत बालात्रिपुरसुन्दरीसहस्रनामानि वर्त्तन्ते ।

No. 93. महाविद्या । Mahāvidyā. Substance, country-made colourless paper, 10 × 5 inches. Folia, 25. Lines, 5-13 in a page. Character, Nāgara. Date, ? Appearance, very old, and worn out. Prose. Generally correct. Complete.

A guide to the worship of Mahāvidyā, a goddess of a dark complexion and having five heads and ten hands, etc., as described in this work in her Dhyāna or meditation.

दंष्ट्राकरालकृष्णांगां पञ्चवक्त्रां त्रिलोचनां ।
महाविद्यां दशभुजां सर्वाभीमकृष्णाशुकां ।
खड्गं च मुसलं शूलं भालकं भल्लकं (?) बाणमेव च ।
शस्त्राण्येतानि बिभ्राणां दक्षिणाधः क्रमात् (?) ।
वामोर्ध्वहस्तभागस्थधनुःपाशं च बिभ्रतीम् ।
डमरुं खेटकं चैव कपालं सिंहगामिनीं ।
त्रिखंडमुद्रां बध्वा तु नमस्कारांश्च कारयेत् ॥

The goddess is worshipped for a charm to hold ferocious animals etc. spellbound (Stambhana), as we find at the beginning :—

ओं अस्य श्रीमहाविद्यावनदुर्गात्रिपुरमंदरीमंत्रराजमंत्रस्य अरण्य ईश्वर ऋषिः अनुष्टुप्छंदः श्रीअंतर्यामी नारायणी किरातरूपधारी श्रीमहाविद्यावनदुर्गा ईश्वरी देवता दुं बीजं ह्रीं शक्तिः स्वाहा कीलकं मम विरोधिसर्व्वदुष्टस्तम्भनार्थं श्रीमहाविद्यावनदुर्गात्रिपुरसुंदरीप्रसादसिद्धार्थसवजपे विनियोगः ॥

End. अहंत्रिपुरमंत्रं मे गोपायधम्पपश्वविदा विदुः । ऋचः सामानि यजूंषि मांहि श्रीरमृतायतां मंततं श्रोरमृ ॥ समस्त मंगलानि भवंतु ।

Colophon. इति श्रीमहाविद्या समाप्त (?) ॥ श्री ॥

विवरणम्—महाविद्योपासनाविषयकोऽयं निबन्धः ।

No. 94. शक्तिरत्नाकरः । Śaktiratnākaraḥ. Substance, country-made yellow paper, 16 × 3½ inches. Folia, 31. Lines, 5-8 in a page. Character, Bengali. Date, ? Appearance, old. Prose and verse. Generally correct. Complete.

A work treating of Śakti, compiled from several Paurāṇika and Tāntrika works, such as Devīpurāṇa, Kālīpurāṇa, Kurmapurāṇa,

Caṇḍīpurāṇa, Vṛihaddharmapurāṇa, Mārkaṇḍeyapurāṇa, Skanda purāṇa, Kulacūḍāmaṇi, Śaktiyāmala, Mantrakosa, Jñānārṇava, Śaivāgama, Vījamuktāvali, Śivarahasya, Radhātantra, etc., consisting of five ullāsas or chapters, of which the first chapter is called Brahmanirūpaṇa, the second Durgasvarūpanirūpaṇa, the third Durgāmāhātmyanirūpaṇa, the fourth Durgāpūjāmāhātmya, and the fifth Daśavidyā (nirūpaṇa ?), by Rājakiśora.

Beginning. श्री गणेशाय ॥

या शक्तिर्गिरिशस्य चन्द्रधिका दृष्टिः परा शाम्भवी
कर्णे गीः श्रवणं रवा च रसनामध्ये रसैकात्मिका ।
घ्राणे चापि च गन्धिका किमपरं प्राणात्मिका मानसे ।
वन्दे तां त्रिगुणैकवन्दितपदां भुक्त्यपवर्गप्रदाम् ॥
स्रष्टुः सृष्टिमयी हरेश्च नितरां त्वं पालयित्री परा
संहर्तुः कलनैककारणमयी निष्कारणं त्वं सदा ।
यत् त्वं सेर्हविलंपनान्मलभवी (?) ब्रह्मेति हेरम्बकी
ब्रह्मब्रह्ममयी त्वमेव परमाऽनुष्ठात्र्यहर्पोऽप्यमी ॥
ब्रह्माऽसौ हरिरीश्वरोऽमरपतीरुद्रोऽभवत् केशवो
ब्रह्मासौ गणनायकः करिमुखस्तत्पादसेवापरा (?) ।
मन्ये ते किल शाश्वतीमतिरहो वैरूप्यमेव गताः
प्रोद्दीऽप्यामभिशं विना न (?) कुशलः स्यातु सदा मातरि ॥
शैवायां शिवरूपिणोऽत्र मनसा पश्यन्ति विश्वात्मिकां
सर्वे विष्णुपरायणाश्च परमं ब्रह्मेति योगिव्रजाः ।
केचिद्विश्वनिदानशक्तिमपरे वर्णैकशक्तिं जना
वन्दे सर्वजगत्प्रियाश्च नियतं वाञ्छन्ति वित्तप्रदाम् ॥
तस्याः किञ्चिदहं समस्त जगतां सारैकशक्तेः कियान्
नानातन्त्रपुराणपुस्तकवरादाहृत्य चासौ ततः
कुर्वे पुस्तवरस्य रचनं (?) श्रीशक्तिरत्नाकरं
भक्त्या धारणपादपद्मविभां श्रीराज केशीरम् (?) ॥

End. श्रीभैरव उवाच ।

विद्याचतुष्टयी प्रोक्ता दुर्गाया मम भाविनि ।
तां विहाय कथं तारा प्रोक्ता सर्व्वजन प्रिये ॥

श्रीदेव्युवाच ।

साधु पृष्टं त्वया वत्स सर्व्वप्राणिहिते रत ।
यथा तारा तथा दुर्गा विभ्रमो नास्ति यद्यपि ।
तथापि तत्प्रकाशाय भयं जातं पदे पदे ।
शृणु वत्स महादेव गुरून् दुर्गामनूक्तवान् ।
परमा अपरानन्दः परमेष्ठी शुभोदयः ।
कृष्णः कालः कामनाथा दिव्यौघा भैरवादिनः (?) ।
नारदः काश्यपः शम्भुर्भार्गवः कुलकौशिकः ।
एते पञ्च महादेव सिद्धौघाः परिकीर्त्तिताः ॥
रुद्राचार्य्यः चमाचार्य्यः परमासनशैशकः ।
कुमारीशः शान्तिधरो मामानन्दः प्रभ[illegible]रः ।
हरिशर्म्मा विष्णुशर्म्मा दत्तात्रेयः प्रियम्वदः ।
वहूना शाकिनी देवी चर्य्यानाथः प्रकीर्त्तितः ॥

तथाच विश्वसारे

जमदग्निर्भरद्वाजो भृगुर्गौतमकाश्यपाः ।
विश्वामित्रः शिवो नन्दी काहलो स्थण्डिलस्तथा ।
एते च ऋषयः प्रोक्ता दुर्गामन्त्रस्य पार्व्वति ।
भाग्येन लभते विद्या सर्व्वसम्पत्प्रदायिनी ।
नातः परतरा विद्या तीर्थं नातःपरात्परम् ॥
विद्या चूडामणिर्देवि कथिता पद्मयोनिना ।
काश्यपः काहलिश्चैव शिवानन्दोऽथ गौतमः ।
च्यवनः शुक्रशक्रौ च पुलस्त्यः पुलहः क्रतुः ।
वशिष्ठश्चैव दुर्वासः शान्तनुः सगरः कृपः ।
सर्व्वे देवाश्च शाक्ताः (?) सर्व्वतत्त्वसमन्विताः ।
नहि शक्तिं विना देवि प्रकाश उपलभ्यते ।
ये शाक्तास्ते महात्मानः सर्व्वधर्म्मपरायणाः ।
ते शैवास्ते वैष्णवाः स्युस्ते सर्व्वे शिवपूजकाः ।
सर्व्वेव शिवरूपेण विचरन्ति महीतले ।
तेषां समानं देवेशि न कुत्रापि महीतले ।
देवकूटाम्बिका विद्या कथिता पद्मयोनिना ॥

Colophon. इति श्रीशक्तिरत्नाकरे पञ्चमोल्लासः समाप्तः ॥ ० ॥ ० ॥

विवरणम्—शक्तिरत्नाकरो नाम विविधपुराणतन्त्रशास्त्रसंगृहीतः शक्तिस्वरूपादिविषयकग्रन्थनिबन्धोऽयम्। पुस्तकेऽस्मिन् पञ्चोल्लासा वर्त्तन्ते। तत्र प्रथमोल्लासे ब्रह्मनिरूपणं। द्वितीये दुर्गास्वरूपनिरूपणं। तृतीये दुर्गामाहात्म्यनिरूपणं। चतुर्थे दुर्गापूजामाहात्म्यं। पञ्चमे च दशविद्यानिरूपणमस्ति ॥

No. 95. **शब्दार्थचिन्तामणिः।** Śabdārthacintāmaṇiḥ. Substance, country-made white paper, 16 x 7 inches. Folia, 354. Lines, 11-12 in a page. Character, Nāgara. Date, Saṁvat 1957. Appearance, fresh, and written by different hands. Prose. Not correct. Complete.

A commentary on the Śāradātilaka by Premanidhi Pantha.

Beginning. श्रीगणेशाय नमः।

यदीयांघ्रिद्वंद्वांबुजभजनतोवीजविधिका-
दपि श्रीमन्तः स्युर्झटिति गतभाग्या अपि जनाः।
अमुं माहिष्मत्याः पतिममलमन्यादिजननं
सदा वंदे वंदे कमपि कृतवीर्यात्मजमहं ॥ १ ॥
न तात्पर्यशोहं गिरिशवचसां नापि च दृशां
स पांथः संदेहं गमयति सुदूरं झटिति यः
तथाप्येतत्तत्त्वांबुनिधितरणे मे चपलता
कृपाभिः श्रीमर्त्तुर्नहि सदुपाय भवतु (?) ॥ २ ॥
शब्दार्थचिंतामणिरेष नामतो
ग्रंथोऽभवत् प्रेमनिधेर्द्विजाधिपात्।
न तत्र चित्रं कृतवीर्यनंदन
प्रसादलभ्यं किमिहास्ति नेप्सितं ॥ ३ ॥
शारदातिलकसंज्ञनिबंधे
टिप्पणानि बहुशः प्रचरंति।
तावतापि च परिश्रममेतं
सार्थकीकृरुत सारविदीशाः ॥ ४ ॥

End. क्वायं प्रेमनिधिर्यदापि पनिजो (?) ग्रंथो नवीनः क्व वा
क्वासौ परसंमतार्थविसरप्रोहूषणार्थस्पृहा ॥
यस्य श्रीतमती सती गुणवती मातापितोर्मायति (?)

आम प्रेमनिधीति पंथकुलभूः कूर्म्माचलीजन्मभूः ।
सूपास्य ' कृतवीर्य्यजाच्युतपदं वाराणसीवासभूः
तस्मे पूर्त्तिमगादिषुः विविंश (?) २५ पटलः शब्दार्थचिंतामणी ।
शम्वत् (?) १९५७ वैशाखशुक्लचतुर्थ्यां समाप्तोऽयं ॥

विवरणम्—कूर्म्माचलीयप्रेमनिधिपान्थविरचितशब्दार्थचिन्तामणिनामकोऽयं शारदातिलकाभिधतान्त्रिकनिबन्धटिप्पणिरूपोग्रन्थः ।

No. 96. शाक्तानन्दतरङ्गिणी । Śāktānandataraṅgiṇī. Substance, country-made paper of several colours, 16 × 3 inches. Folia, 110. Lines, 6–7 in a page. Character, Bengali. Date, ? Appearance, very old, worn out, and torn in parts. Prose. Generally correct. Complete.

A Tāntrika work on Śaktism, compiled from several Tāntrika and Paurāṇika works, such as Śāradātilaka, Yāmala, Sammohatantra, ürdhāmnāya, Mahātantra, Pūjāpradīpa, Bhaviṣyapurāṇa, Kulārṇava, Samayātantra, Rudrayamala, Viṣṇudharmottara, Markandeyapurāṇa, Skandapurāṇa, Liṅgapurāṇa, Kālikāpurāna, Yoginihṛdaya, Śṛkrama, Kulacuḍāmaṇi, Gandarvatantra, Vṛhatśṛkrama, Guptadikṣātantra, Sanatkumāratantra, Kumāritantra, Mundamālātantra, Gautamiyatantra, Muktāvali, Bhutaśuddhi, Kāmadhenutantra, Montrakōṣa &c. by Brahmānanda. It consists of 17 chapters or ullāsas, of which the first chapter treats of our body as created in the womb, the second of Dīkṣā, the 3rd of Yoganirṇaya, the 4th of our duties in the morning, the 5th of Āsana, the 6th of Yogavidhi, the 7th of Nityapūjā, and the 8th of the Mālāvidhāna, etc., and so on. Noticed by Dr. R. Mitra in his *Notices*, No. 3182.

Beginning. ओँ नमः परमदेवतायै ॥

प्रणम्य प्रकृतिं नित्यां परमात्मस्वरूपिणीं ।
तन्यते भक्तिमुक्त्यर्थं शाक्तानन्दतरङ्गिणी ॥

अथ का प्रकृतिः ॥ तथाहि गुणत्रयसाम्यावस्था प्रकृतिः ॥ तथाचोक्तं यामले ॥

तत्त्वं रजस्तम इति गुणत्रयमुदाहृतं ।
साम्यावस्थेति चैतेषामव्यक्तां प्रकृतिं विदुः ॥
सा एव मूला प्रकृतिः प्रधानं पुरुषोऽपि च ॥

End.
दुर्गैका परमा देवी दुर्गैका परमं पदम् ।
दुर्गैका परमं ज्ञानं दुर्गैका ज्ञानमेव च ॥
दुर्गैका परमं सत्यं दुर्गैका परमा गतिः ।
दुर्गैका परमं दैवं दुर्गैका परमौषधं ॥
दुर्गैका सुखमत्यन्तं दुर्गैका निर्वृतिः परा ॥
दुर्गैका परमा तुष्टिर्दुर्गैका परमं यशः ।
दुर्गैका परमं तत्त्वं दुर्गाभिन्नमिदं जगत् ॥

इति भविष्यपुराणवचनेभ्यः—
प्राणप्रयाणपाथेयं संसारव्याधिभेषजं ।
दुःखार्णवपरित्राणं दुर्गानामाचरद्वयम् ।

Colophon. इति शाक्तानन्दतरङ्गिण्यां होमनिर्णयोष्टादशोल्लासः समाप्तः ॥ ० ॥ समाप्तोऽयं ग्रन्थः ॥ श्रीदुर्गा जयति ।

विवरणम्—श्रीब्रह्मानन्दविरचितशाक्तानन्दतरङ्गिणीनामकः सुप्रसिद्धतान्त्रिकनिबन्धोऽयम् ।

No. 97. शारदातिलकम् । Sāradātilakam. Substance, country-made colourless paper, 12 × 4 inches. Folia, 164. Lines, 6–11 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, and written by different hands. Verse. Not correct. Complete.

A compiled Tāntrika work of great repute in Bengal, complete in 25 paṭalas or chapters, by Lakṣmaṇa Deśikendra, son of Śrīkṛṣṇa and grandson of Vijayācārya. This work has been noticed by Dr. R. Mitra in his *Notices*, No. 733, and also in the India Office Catalogue, Nos. 2542, 2543, 2544, page 857, part IV.

Beginning. श्रीगुरवे नमः ।
नित्यानंदवपुर्निरंतरगलत्पंचाशदर्णैः क्रमात्
व्याप्तं येन चराचरात्मकमिदं शब्दार्थरूपं जगत् ।
शब्दब्रह्म यदूचिरे सुकृतिनश्चैतन्यमन्तर्गतम्
तद्वोऽव्यादनिशं शशांकसदनं वाचामधीशं महः ॥ १

अन्नाङ्गिनीमिलितमिन्दुकलावतंस
मिन्दीवरोदरसहोदरमेचश्रीभि ।
हेतुस्त्रिलोकविभवस्य मवेंदुमौलि
रंत:पुरं दिशतु मंगलमादराद्व: ॥ - ॥
संसारसिंधोस्तरणैकहेतून्
वंदे गुरून् मूर्द्धि शिवस्वरूपान् ।
रजांसि येषां पदपङ्कजानां
ति (ती ?)र्थाभिषेकश्रियमावहंति ॥ २ ॥
सारं वक्ष्यामि तंत्राणां शारदातिलकं शुभम् ।
धर्म्मार्थकाममोक्षाणां प्राप्ते: प्रथमकारणं ।
शब्दार्थसृष्टिर्मुनिभिश्छन्दोभिर्दैवतै: सह ।
विधिश्च मंत्रयंत्राणां तंत्रेऽस्मिन्नभिधीयते ॥ ५ ॥

End.

तस्मादभूदखिलदेशिकवारणेन्द्र:
षट्कर्म्मसागरविहारविनोदशील: ।
यस्य त्रिलोकविदितं विजयाभिधान
माचार्य्यपण्डित इति प्रथयन्ति सन्त: ॥
तस्मान्दभो देशिकदेशिकोभू-
च्छ्रीकृष्ण इत्यभ्युदितप्रभाव: ।
यत्पादकारुण्यसुधाभिषेका-
ल्लक्ष्मीं परामश्नुवते कृतार्था: ॥
आचार्य्यविद्याविभवस्य तस्य
जात: प्रभोर्लक्ष्मणदेशिकेंद्र: ।
विद्यास्वशेषासु कलासु सर्व्वा-
स्वपि प्रथां यो महतीं प्रपेदे ॥
आदाय सारमखिलं निखिलागमेभ्य:
श्रीशारदातिलकनाम चकार तंत्रं ।
प्राप्त: स एव पटलैरिह तत्त्वसंख्यै:
प्रीतिप्रदानविधये विदुषां चिराय ॥
भगवंता शंभोर्वपुषि कलितार्द्धेन वपुषा
जगद्रूपं शश्वत् सृजति महनीयामपि गिरं

सदर्या सद्दार्थ (?) सनभरनता शंकरवधू-
र्भवद्भूत्यैभूयादवजनितदुःखौघशमनी ॥

Colophon. इति श्रीशारदातिलके पंचविंशः पटलः ॥

विवरणम्—शारदातिलकनामधेयस्तान्त्रिकनिबन्धविशेषः सुप्रसिद्ध एव ।

No. 98. शारदातिलकटीका । Śāradātilakaṭīkā. Substance, country-made white paper, 12 × 5 inches. Folia, 181. Lines, 9–10 in a page. Character, Nāgara. Date, ? Appearance, very old, and written by different hands. Prose. Not correct. Incomplete.

A commentary on the Śāradātilaka, entitled Padārthādarśa, by Rāghava.

Beginning. श्रीगणेशाय नमः ॥

श्रीकण्ठं निजनाथवनत (?) प्रोद्दामभीदादरं
पश्यत्यकृतक (?) दृतपिया (?) संभातभावं मुहुः ।
मन्दान्दोलितदुग्धसिन्धुलहरीलीलालसं लोचन-
प्रान्तालोकनमातनोतु भवतां भूतिं भवान्याः शुभम् ॥ १ ॥
संसेव्यमानमृषिभिः सनकादिमुख्यै-
र्योगैकगम्यमविनश्वरमादि भूतं ।
संसारदुविगमसारविचारसारं
शैवं महो मनसि मे सुदधातु (सुदमादधातु ?) ॥ २ ॥
भद्राय भवतां भूयाद्भारती भक्तिभाविता ।
सतैरुज्जृम्भते यस्या वाग्विलासिति (?) दुर्लभा ॥
शारदातिलके तंत्रे गुरूणामुपदेशतः ।
पदार्थादर्शटीकेयं राघवेण विरच्यते ॥
सम्प्रदायागतं किञ्चिद्दर्शितागमसम्मतं ।
यदुक्तमत्र तत् संतो विचारयितुमर्हथ ॥ ५ ॥

End. नास्ति

Colophon. इति शारदातिलकटीकायां चतुर्विंशः पटलः ।

विवरणम्—राघवकृतशारदातिलकटीकारूपोऽयं निबन्धः ।

No. 99. **श्यामारहस्यम्** । Śyāmārahasyam. Substance, country-made white paper, 10 × 4 inches. Folia, 31. Lines, 2-9 in a page. Character, Nāgara. Date, ? Appearance, rather old. Prose. Not correct. Incomplete.

Śyāmārahasya is a compendium of Tāntrika worship, complete in 22 chapters (prakāśas), compiled from various sources, by Pūrṇānanda Paramahaṁsa. Noticed in the India Office Catalogue, No. 2597, page 898, part IV; also by Dr. R. Mitra in his *Notices*, vol. II, page 43.

पुस्तकेऽस्मिन् श्यामारहस्यस्य प्रथमपरिच्छेदोऽप्यसंपूर्णो वर्त्तते ।

No. 100. **श्यामारहस्यं** । Śyāmārahasyaṁ. Substance, country-made yellow paper, 18 × 4 inches. Folia, 144. Lines, 2-7 in a page. Character, Bengali. Date, ? Appearance, old. Prose. Not correct. Complete.

A complete copy of the same work, complete in 22 prakāśas or chapters. The first chapter treats of the Nyāsavivaraṇa, the second of Antaryajanavivaraṇa, the third of pūjāparyāya, the fourth consists of several prayers and formulas of amulets, among which the most famous prayer, Karpūrādi, is quoted from the Umātantra, the fifth treats of Puraścaraṇa and so on. The authorities quoted are Kālītantra, Vīratantra, Kumārīkalpa, Bhairavītantra, Matsyasūkta, etc.

Beginning. ओं नमः परमदेवतायै ।

देवीं दानवदैत्यदर्पनिवहान्नुन्मूलयन्तीं शिवां
ब्रह्मानन्तमहेशमौलिमणिभिः संसेविताङ्घ्रिद्वयां ।
नत्वा श्रीगुरुपादपद्मपरमामोदाम्रतप्लावितः ।
पूर्णानन्दयतिस्तनोति विमलां श्यामारहस्याभिधाम् ॥
स्वतन्त्रं वीरतन्त्रञ्च तन्त्रं फेत्कारिणीं तथा ।
कालिकाकुलसर्व्वस्वं काली तन्त्रञ्च यामलम् ॥
कुलचूडामणिञ्चैव कुमारीतन्त्रमेव च ।
कुलार्णवं तथा कालीकल्पं भैरवतन्त्रकं ।
कालिकाकुलसद्भावं तथा चीनतन्त्रकं ।

गुरुणाञ्च मतं ज्ञात्वा साधकानां तथा मतम् ।
शुद्धबुद्धिस्वभावार्थं वक्ष्यामि नीलकारिणीम् ॥

Vīrāsana is thus defined in the first chapter :—

एकं पादमथैकस्मिन् विन्यस्योरौ च संस्थित ।
इतरस्मिंस्तथा चोरुं वीरासनमितीरितम् ॥

Fol 10.

Sacrificial objects are thus enumerated in the third chapter :—

कुमारीकल्पेपि

नराश्छागास्तथामेषामहिषा' शृगालास्तथा ।
एतेषाञ्चैव बक्राणि देयानि परमेश्वरीति ॥

मुण्डमालायाञ्च

ईषद्रक्तं दुग्धं घृतेनाक्तं निशायां दिवसेऽपि ।
बलिन्दद्यान्हिर्षेष कृष्णपक्षे शुभे दिने ॥
छागे दत्ते भवेद्वाग्मी मेषे दत्ते कविर्भुवम् ।
महिषे धनवृद्धि स्यान्मृगे भोगफलं भवेत् ॥
पक्षिदत्ते (?) महर्द्धि स्याद्गोधिकाया महाफलं ।
नरे दत्ते महर्द्धि. स्यादष्टसिद्धिरनुत्तमा ॥
ललाटहस्तहृदये शिरो भ्रूमध्यदेशत ।
स्वदेहरुधिरे दत्ते रुद्रदेह इहापर. ।
चण्डालबलिदानेन महासिद्धि. प्रजायते ॥

नरबलिस्तु विप्रेण न विधेय । तदुक्तं यामले—

राज्ञा नरबलिन्दद्याद्राज्योपि परमेश्वर ।
सिंहव्याघ्रनरान् दत्वा ब्राह्मणो यात्यधोगतिम् ॥

The famous Bhairavīcakra is thus described in the same chapter.

तत. सामयिकान् सर्व्वान् समाहूय निवेशयेत ।

अथ सामयिकैः सह पानादिकं कुर्य्यात् । यत्र चक्राकारेण पङ्क्त्याकारेण वा भिन्नभिन्नासने बद्धपद्मासन. शक्तियुक्तश्चेन युग्मयुग्मक्रमेणोपविशेत् । साधक: सामयिकललाटे चन्दनाक्तं दत्वा शिवशक्तिधिया पुष्पञ्च दद्यात् । ततो गुरुर्यदि तत्र तिष्ठति तद्वादौ गन्धपुष्पादिना तं प्रपूज्य तत्पात्रं तस्मै दत्वा प्रणमेत् । गुरोरभावे तत् पात्रं जले क्षिपेत् । ततः शक्तिपात्रं

शक्तिसंयुतं शक्तौ दत्त्वा, सामयिकेभ्योऽपि ओगाद्युक्तमेव परामृतं शक्तिसहितं दद्यात्। ततः सामयिकोऽपि भक्त्या हस्ताभ्यां गृहीत्वा मूलमन्त्रं तदुपर्य्यष्टधा प्रजप्य पूर्व्वोक्तमन्त्रेणानन्दभैरवेभ्यो गुरुदेवताय समर्प्य तत्स्वशुद्धिं कुर्य्यात् ततश्चक्रनायकसैः सह पात्रवन्दनमाचरेत्। अथास्य प्रमाणं यथा रुद्रयामले।

साधकेभ्यश्च शक्तिभ्योदद्यान्निर्माल्यचन्दनं।
सामयिकैः समं कुर्य्याद्देवि पानादिभक्षणम्॥

अन्यत्रापि।

निविशेच्चक्ररूपेण पङ्क्त्याकारेण वा यथा।
शक्तियुक्तो भवेद्वापि युग्मयुग्मविधानतः।
शिवशक्तिधिया सर्व्वान् चक्रमध्ये समर्चयेत्॥

अथ पात्रपरिमाणं यथा कुलसारे।

नयनाग्निबाणसंख्याकर्षैस्तु परमेश्वरि।
हेतुपानं प्रकर्त्तव्यं इत्युक्तं कुलशासने॥
इतोऽप्यधिकपात्रन्तु न कर्त्तव्यञ्च साधकैः॥

कर्षं लौकिकतोलकमित्यर्थः।

कुलार्णवे च

एकासने निविष्टा ये भुञ्जीत चैकभाजने।
एकपात्रे पिबेद्द्रव्यं ते यान्ति नरकाधमं॥

एकपात्र इति सर्व्वे मिलित्वा एकपात्रे न पिबेत् (पिबेयुः ?) ननु प्रतिवार-द्रव्यपाने भिन्नभिन्नपात्रं कार्य्यं अनुष्ठानानुपपत्तेः। न कुर्य्यात् पात्र-सङ्करमिति वचनविरोधाच्च।

विना मन्त्रेण जा (या ?) पूजा विना मांसेन तर्पणं।
शक्त्या विना तु यत् पानं तत् पानं निष्फलं भवेत्॥
स्वशक्तिं वीरशक्तिं वा दि (दौ ?)क्षितां गुरुसमर्पणीं।
पाययित्वा पिबेन्मद्यमिति शास्त्रस्य निर्णयः॥
न पद्भ्याञ्च स्पृशेत् पात्रं न बिन्दुं पातयेदधः।
नैकहस्तेन दातव्यं न मद्यवर्ज्जितं पुनः॥
नार्च्चयेदेकहस्तेन न पिबेद्देवताविना।
साधारं नोद्धरेत्पात्रं आधारेषु विनिक्षिपेत्।
पात्रं न चालयेत् स्थानान्नकुर्य्यात् पात्रसङ्करम्।

घसहर्षं (?) न पिवेद्द्रव्यं तथैव च न पूरयेत् ।
न स्थूलं न च सूक्ष्मं च पात्रं कुर्य्यान्मनीरमम् ॥
उच्छिष्टी न स्पृशेच्छक्तिं कुलद्रव्याणि सुन्दरि ।
यदि: प्रक्षाल्य करौ (करौ ?) कुलद्रव्याणि दापयेत् ॥
इन्ने तु सिद्धिहानि: स्यात् क्रुद्धा भवति योगिनी ।
परिहासं प्रलापञ्च वितण्डां बहुभाषणं ।
औदासीन्यं भयं क्रोधं चक्रमध्ये विवर्ज्जयेत् ॥
भार्य्यान्यं ताड़येत् पात्रं न पात्रमानयेद्बध: ॥
गुरुशक्तिसुतानाञ्च गुरुज्येष्ठकनिष्ठयो: ।
उच्छिष्टं भक्षयेत् स्त्रीणां ताभ्यो नोच्छिष्टमर्पयेत् ॥
चक्रमध्ये च नियतं नान्यथा पतनं भवेत् ।
कनिष्ठानां स्वशिष्याणां दद्यादुच्छिष्टमेव च ।

अन्यत्रापि

शक्त्युच्छिष्टं पिवेद्द्रव्यं वीरोच्छिष्टस्य चर्व्वणम् ।
शक्तिवीरप्रसादेन किन्न सिद्ध्यति भूतले ॥
पीत्वा पीत्वा पुन: पीत्वा पतित्वा च महीतले ।
उत्थाय च पुन: पीत्वा पुनर्ज्जन्म न विद्यते ॥

Foll. 46—50.

The condemnation of Kulācāra is thus prohibited in the Kālītantra.

कुलस्त्रीवीरनिन्दाञ्च तद्द्रव्यमपहारणं ।
स्त्रीषु रोषं प्रहारञ्च वर्ज्जयेत् मतिमान् सदा ॥

Fol. 85.

श्रीश्यामारहस्यनिबन्धोऽयमेवंविधशक्तिसाधनतत्पूजनादिविषयक: ।

End.

नीलांशुकां मणिमयीञ्च करेषु वीणां
मुद्राञ्च पात्रमथ पूर्णसुधां दधानाम् ।
उद्यच्चतुर्मुखवक्त्र:कविताप्रवाहां
नीलाम्बुजाभि हृदयेन सरस्वतीं ताम् ॥
लक्षमेकं जपेद्विद्यां दशांशमसितोत्पलै: ।
नीलाञ्च (?) महाविद्यां वीजाद्यां परिकल्पयेत् ।
ध्यानपूजा पुरश्चर्य्या नीलासमाप्तश्चरेत् (?) ॥०॥



Colophon. इति पूर्णानन्दपरमहंसविरचिते श्यामारहस्ये द्वाविंशतितमः प्रकाशः ॥०॥ समाप्तमिदं (?) ग्रन्थः ॥ *॥ श्रीहरिः श्रीदुर्गा श्रीरामः । * ॥

विवरणानुक्तपूर्व्वम् ।

No. 101. **श्यामापूजाव्यवस्था ।** Syāmāpūjāvyavasthā. Substance, country-made reddish coloured paper, 22 × 1 inches. Folia, 2. Lines, 8-9 in a page. Character, Bengali. Date, ? Appearance, old. Prose. Generally correct. Complete.

A little work showing the authorities as to when and how the worship of the Goddess Śyāma is to be performed, with discussions. Anonymous.

Beginning. ओं नमो गणेशाय ॥ अथ श्यामापूजाकालव्यवस्था ॥ यामले

कार्त्तिके मासि कृष्णायां पञ्चदश्यां महानिशि ।
पूजयेद्योतियत्नेन काली विद्या प्रसीदति ॥
मृण्मयी प्रतिमां कृत्वा महाकालीं प्रपूजयेत् ॥

श्रीभैरवसंहितायां

तुलार्के यत्नमावस्यां निशार्द्धे घोरदक्षिणां ।
पूजयेद्विधिवद्भक्त्या सर्व्वसिद्धीश्वरोभवेत् ।

एवञ्चार्द्धरात्रं पूजायां मुख्यकालः । स च कालो यदि उभयदिने तदा पूर्व्वदिने पूजा । यथा तत्रैव

तत्रोभयदिने प्रसकाले भूतयुता यदि ।
अमामाहेश्वरी सा च तिथिः सिद्धिप्रदा मताम् ।

गुप्तसाधनतन्त्रे

निशा तु परमेशानि सूर्य्ये ह्यस्तमुपागते ।
प्रहरे च गते रात्रौ घटिके द्वे परे च ये ।
महानिशा समाख्याता तत्रापि महानिशा ॥

End. तथाच तुलार्कनियतामावस्यायां निशीथे कालीं पूजयेदिति पर्य्यवसितं । तुलार्के नैव लङ्घयेदित्यत्र तुलार्कपदञ्च तुलार्कोपलक्षितामावास्यापूजापरं । संकल्पवाक्ये तु कार्त्तिके मासि इत्युल्लेख्यं । न तु राश्युल्लेखोऽपि गौण-

धर्म्मेषु विधानात्। केचित्तु उपलक्षणतयाऽऽस्वाश्वयुजामन्वयतात्पर्येण तुलाराशिस्थे भास्करे इत्युक्तेऽस्मिन्निति भास्करपदोपात्तसत्वा उपलक्षणतया तत्कालसम्बन्धबोधनसामर्थ्यादिति वदन्ति ॥ ० ॥

Colophon. समाप्ता श्यामापूजाकालव्यवस्था ॥ ० ॥

विवरणम्—श्रीश्यामापूजाकालनिर्णयविषयकोऽयं निबन्धः।

No. 102. सौभाग्यरत्नाकरः। Saubhāgyaratnākaraḥ. Substance, country-made, colourless paper, 10 × 5 inches. Folia, 258 (of which foll. 2, 3, 244, and 245 are wanting). Lines, 8-11 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, torn, and worm-eaten in parts. Prose and verse. Not correct. Incomplete.

Saubhāgyaratnākara is a Tāntrika treatise on mystic worship, complete in thirty-six taraṅgas, by Vidyānanda Nātha, pupil of Saccidānanda Nātha. Noticed by Dr. R. Mitra in his Bikaneer series, No. 1328, page 610.

Colophon. इति श्रीविद्यानन्दनाथेन स्त्रियोः प्रियसुना (?) कृते सौभाग्यरत्नाख्ये तरंगे षष्ठमोगमत् (?) ॥ इति श्रीसच्चिदानंदनाथचरणारविंद घाते (?) श्रीविद्यानंदनाथेन विरचिते श्रीसौभाग्यरत्नाकरे षष्ठस्तरंगः॥ विक्रमनाम संवत्सर अधिक आश्विन शुद्धद्वादशी शुक्रवार प्रताप अपयावेषाहारिकनाम गुरुनाम ब्रह्मानन्द ब्रह्मचा आवस्य गोव तस्य समिपे (?) लिखितं सौभाग्यरत्नाकरं विद्यापद्धतिपुस्तकं विश्वनाथभट्टेण लिखित्वा दत्तं कल्याणभट्ट निर्वाणि आम्नाय ह्रीं पोथि कल्याणभट्टनिर्व्वाणिचि श्रीललितायै नमः॥ श्रीशुभमस्तु श्रीकृष्णार्पणमस्तु। लिखक विजय भवत (?)। वाचकविजयभवतु (?) श्रीललितार्पणमस्तु ॥

विवरणम्—श्रीविद्यानन्दनाथविरचितसौभाग्यरत्नाकराभिधोऽयं तान्त्रिकनिबन्धः। असंपूर्णत्वमस्यानीचमार्हः।

No. 103. **सौभाग्यरत्नाकरः।** Saubhāgyaratnākaraḥ. Substance, country made colourless paper, 14 x 6 inches. Folia, 123 Lines, 6-8 in a page Character, Nagara Date, ? Appearance, very old, worn out, and torn in parts Prose and verse Not correct Incomplete.

This codex contains only the latter part of the same work.

पुस्तकेऽस्मिन् सौभाग्यरत्नाकरस्य षट्त्रिंशत्तरङ्गस्यान्तिमांशमात्रं वर्त्तते।

No. 104. **सन्ध्यादि।** Sandhyādi Substance, country made red and white paper, 15 x 3 inches Folia, 6. Lines, 8-11 in a page. Character, Bengali Date, ? Appearance, very old, worn out, and slightly torn in parts Prose and verse Generally correct Complete

This codex contains Tāntrika Sandhyā or daily prayer, and is a guide to the worship of Rāma, with a prayer to him.

पुस्तकेऽस्मिन् तान्त्रिकसन्ध्या श्रीरामपूजा, स्तुतिश्च विद्यते।

No. 105. **मातृकायन्त्रम्।** Mātṛikāyantram Substance, country-made white paper, 10 x 5 inches. Folia, 4. Lines, 8-10 in a page. Character, Nāgara Date, ? Appearance, very old, worn out, and torn throughout Verse, Not correct Complete

This codex contains a figure of fifty little squares each containing a letter of the alphabet, called Mātṛikāyantra, as well as fifty Sanskrit ślokas showing what good or evil fortune might follow from the use of any particular letter.

Beginning. अकारे विजयं विद्याधनमैश्वर्य्यमेव च।
आरोग्य पु॑ * * * संशय ॥ १ ॥
आकारे शोकसंतापं चिन्तं र सह बांधवैः।
* * * स्वार्थनाशं (?) तथैव च ॥ २ ॥
इकारेण स्थित (सौख्यं ?) पुत्रलाभस्तथैव च।
क्षेम भवतु आरोग्य अर्थलाभं (?) तथैव च ॥ ३ ॥

ईकारे सर्व्वकार्य्याणि शोभनानि तथैव च ।
क्षेमं चैव तु आरोग्यं शोभनं च पुन पुनः ॥ ४ ॥
उकारे लभते स्थानं मित्रलाभ तु शोभनं ।
सर्व्वकार्य्याणि (कर्म्माणि ?) सिद्धिं तु लभते नात संशयः ॥ ५ ॥
ऊकारे शोकसन्तापं पार्थिवानां भयद्वयं ।
प्राप्यते च महाद् स्वं चौरेणापि न संशय ॥ ६ ॥
ऋकारे अर्थसंपत्ति कार्य्यसिद्धिस्तथैव च ।
प्रतिष्ठा समवाप्नोति स्वजनैः सह पूजित ॥ ७ ॥

End. ऌकारे विपुलं भोगम् मानमं (?) दृश्यते सदा ।
क्षेमजायुष्य लाभं (?) च कल्याण च पुन पुन ॥ ५० ॥

Colophon. इति मातृकाशकुनावलि (?) समाप्ता ॥ श्री नमस्तु (नमस्तु (?)) सर्व्वज्ञाय ॥

The Mātṛikāyantra is given below .—

मातृकायन्त्रम् ।

अ १	आ २	इ ३	ई ४	उ ५	ऊ ६	ऋ ७	ॠ ८	ऌ ९	ॡ १०
ए ११	ऐ १२	ओ १३	औ १४	अं १५	अः १६	क १७	ख १८	ग १९	घ २०
ङ २१	च २२	छ २३	ज २४	झ २५	ञ २६	ट २७	ठ २८	ड २९	ढ ३०
ण ३१	त ३२	थ ३३	द ३४	ध ३५	न ३६	प ३७	फ ३८	ब ३९	भ ४०
म ४१	य ४२	र ४३	ल ४४	व ४५	श ४६	ष ४७	स ४८	ह ४९	क्ष ५०

विवरणम्- मातृकावर्णविषयकोऽयं निबन्धः ।

No. 106. श्यामापूजाव्यवस्था । Śyāmāpujāvyavasthā. **Substance,** country-made white paper, 14 × 4 inches Folia, 4. Lines, 3–9 in a page Character, Bengali Date, ? Appearance, very old, worn out, and torn in parts. Prose Generally correct. Complete.

Another work treating of the same subject as that noticed before in No. 101.

पुस्तकेऽस्मिन् श्यामापूजायोग्यकालव्यवस्था वर्त्तते ।

No. 107. श्यामास्तोत्रम् । Śyāmāstotram. Substance, country-made colourless paper, 16 × 3 inches Folia, 1 Lines, 9' in a page Character, Bengali Date, ? Appearance, very old Verse Generally correct Complete

This contains the most famous prayer to Goddess Kālī, known by the name of Karpūrādistotra, by Śiva.

पुस्तकेऽस्मिन् कर्पूरादिस्तोत्रमात्र वर्त्तते ।

No. 108. श्यामास्तोत्रटीका । Śyāmāstotraṭīkā Substance, country made yellow paper, 18 × 3 inches Folia, 2 Lines, 11–12 in a page. Character, Bengali Date, ? Appearance, very old, worn-out and torn Prose. Generally correct Complete

A commentary on the above stotra. Anonymous

पुस्तकेऽस्मिन् कर्पूरादिस्तोत्रस्य काचित् टीका वर्त्तते ।

No. 109. संक्षेपतान्त्रिकहोमपद्धतिः । Samskhepatāntrikahoma paddhatiḥ Substance, country made colourless paper, 18 × 2 inches Folia, 5. Lines, 7 in a page Character, Bengali Date, ? Appearance, very old, worn out, torn, and writing effaced in parts. Prose Generally correct Complete

This codex contains, beside a short guide to the Tāntrikahoma, a guide to the purification of a Yantra, a kind of mystic diagram in which a devotee worships his own God, and also a guide to the Puraścaraṇa as performed at an eclipse.

पुस्तकेऽस्मिन् संक्षेपतान्त्रिकहोमपद्धतिः यन्त्रसंस्कारपद्धतिर्ग्रहणकालीनपुरश्चरणपद्धतिश्च वर्त्तन्ते ।

No. 110. सुन्दरीलहरीटीका। Sundarīlaharīṭīkā. Substance, country-made yellow paper, 18 x 4 inches. Folia, 5. Lines, 7 in a page. Character, Bengali. Date, ? Appearance, very old, and worn out. Prose. Generally correct. Incomplete.

A commentary on the Sundarīlaharī or a prayer to Tripurāsundarī. Anonymous.

पुस्तकेऽस्मिन्नसंपूर्णा सुन्दरी लहरी टीका वर्त्तते।

No. 111. वरीवस्यारहस्यम्। Varīvasyārahasyam. Substance, country-made white paper, 12 x 10 inches. Folia, 16. Lines, 5-20 in a page. Character, Nāgara. Date, Saṃvat 1796. Appearance, very old, and worn out. Prose. Generally correct. Incomplete.

Another copy of the work noticed in No. 85.

विवरणमनूक्तपूर्व्वम्।

No. 112. सुदर्शनेत्रपटलम्। Sudarśanetrapaṭalam. Substance, country-made yellow and white paper, 10 x 4 inches. Folia, 45. Lines, 9 in a page. Character, Nāgara. Date, ? Appearance, old. Prose. Not correct. Incomplete.

A commentary on the Tantrarāja by Prāṇamañjarī, the third wife of Premanidhi, a well-known Tāntrika author. Noticed in page 97.

Beginning. श्रीं राजराजेश्वराय नमः।

अनीशोपि श्रीशोविभुरगतिपुंसां गतिकरी
ऽपवर्गाद्यं यस्मात् फलममलममृते(?)ऽपि विमलं।
असद्धेतुर्नानाविमतिरपि सन्मार्गमतिदः
सहायः कोप्येषोऽस्त तु भवतु मे हेरम्बपतिः॥ १॥
श्रीकारंवीथ्यपदराज्ञिह योगकन्या।
स्वीयेष्टदेवमिव कैवल्ययोगयुक्त्या।
तच्छक्तिमप्यभिवदत्यत उद्यमीयं
श्रीसुन्दरीभजनकल्पविवेचने मे॥ २॥

श्रीराजराजेश्वरकल्पसुक्ता
दीपप्रकाशप्रमुखप्रबन्धैः ।
श्रीतंत्रराजार्थसुदर्शनेन
तत्त्वक्रिकल्पं विवृणोमि किंचित् ॥ ३ ॥
न तंत्रार्थं जाने क्व च भवति तद्राजविषमा-
र्थबोधाशा दूरे बत गतवती टिप्पणकथा ।
तथाप्येषा सिद्धिं व्रजति यदि तर्हि प्रभुवमहो
सुगुर्व्विष्टप्रेमामरतरुविलासो सकरुणः ॥ ४ ॥
याते मुक्तिपदं सुदर्शनसुतेऽस्मत्तात्सर्मदीमये
पूर्णश्रीशसुदर्शनावतरणांघ्रिप्रेमसाहात्म्यतः
विद्वन्मानसराजहंससमपरं श्रीमत्पतिप्रेमतः
श्रीतंत्रार्थसुदर्शनं नवमहं कुर्व्वेऽवरालोमयं ॥ ५ ॥
यस्याः कोपि च हर्षदेवविवुधस्तात प्रसः श्रीमती
ख्याता हर्षमतीति गितः (?) कूर्मांचलो जन्मभूः
विद्वत्प्रेमनिधिस्तृतीयवनिता श्रीप्राणमस्तत्यहं
कुर्व्वे गोपिततंत्रराजविषमार्थज्ञानमाशु स्फुटम् ॥ ६ ॥

End. तत्तत् पटलार्थस्य सम्यक् ज्ञानेन तत् तत् तत्त्वं स्वाधीनं भवति एवं सर्व्व-तत्त्वेषु स्वाधीनेषु तेषु गीतेषु मुक्तिः करतलामलकीभूतेवेत्यभिप्रायेणैकैकपटल समाप्तिप्रदर्शनं तदधीतिफलप्रदर्शनं च करोति भूमेत्यादिना यत्र यत्र यत्र चतुष्कं पतितं तत्र पतित ग्रंथ पुस्तके धपीवौ (?) ॥ ७ ॥

Colophon.

साचाल्लक्ष्मीपतिकार्त्तवीर्य्यकरुणा कल्पदमीघतफर्न (?)
विद्वत्प्रेमनिधिप्रसिद्धधिषणारामप्रियासंभवे ।
अन्वर्थाभिधतंत्रराजविषमालोकार्थसदर्शना
त्वर्थाख्यानसुदर्शनेऽत्र पटल (?) पूर्वोऽप्यपूर्व्वोगतः ॥

विवरणम्—श्रीप्रेमनिधिपण्डिततृतीयवनिताविरचितसुदर्शनाभिधश्रीतन्त्रराजव्याख्यारूपोऽयं निबन्धः ।

No. 113. **अपराजितास्तोत्रम् ।** Aparājitāstotram. This codex consists only of one folio of colourless paper, but, the writing being effaced in parts, is not legible.

पुस्तकमिदं लुप्ताक्षरत्वादालोचनं नार्हति ।

No. 114. **वटुकस्तोत्रम् ।** Vaṭukastotram. Consisting of one folio of illegible writing.

इदमपि पुस्तकं लुप्ताक्षरम् ।

No. 115. **ग्रहणपुरश्चरणम् ।** Grahaṇapuraścaraṇam. This codex also consists of one folio and is a guide to the Puraścaraṇa ceremony to be performed at an eclipse.

पुस्तकेऽस्मिन् ग्रहणकालीनपुरश्चरणपुस्तकस्य पत्रमेकं वर्त्तते ।

No. 116. **अक्षयकवचम् ।** Akṣayakavacam. This codex too consists of one folio, containing the most celebrated Akṣayakavaca, generally believed to be very efficacious in promoting continuance of progeny.

पुस्तकेऽस्मिन्नक्षयकवचं वर्त्तते ।

No. 117. **रुद्रचण्डी ।** Rudracaṇḍī. Substance, country-made yellow paper, 14 × 2⅓ inches. Folia, 4. Lines, 1–7 in a page. Character, Bengali. Date, ? Appearance, very old, and worn out. Verse. Generally correct. Complete.

A portion of the Rudrayāmala, containing a prayer to Goddess Caṇḍī by Śiva, known as Rudracaṇḍī.

Beginning. ओं नमो गणेशाय ॥ अथ रुद्रचण्डिका ॥ श्रीशङ्कर उवाच ॥

ओँ चण्डिकां हृदये न्यस्य भरणं यः करोत्यपि ।
अनन्तं फलमाप्नोति देवी चण्डी प्रसीदति ॥
रविवारे यदा चण्डीं पठेदागमसम्मतां ।
नवावृत्तिफलन्तस्य जायते नात्र संशयः ॥
सोमवारे यदा चण्डी पठेद्यस्तु समाहितः ।
सहस्रावृत्तिपाठस्य फलं जानीहि सुव्रते ॥
कुजवारे जगद्धात्रि पठेद्यामलसम्मतां ।
शतावृत्तिफलं तस्य बुधे लक्षफलं ध्रुवम् ।
शुक्रे देवि जगद्धात्रि चण्डीपाठेन शङ्करी ।
श्रेयं तुल्यं फलं देवि यदि चण्डीसमाहितः ॥
शनिवारे जगद्धात्रि कोट्यावृत्तिफलं ध्रुवम् ।
अतएव जगद्धात्रि यश्च चण्डीं समभ्यसेत् ।
स धन्यश्च कृतार्थश्च राजराजाधिपो भवेत् ॥

End.

अतएव महेशानि किं वक्ष्ये तव सन्निधौ ।
लक्ष्मीदराधिका चण्डी श्रवणात् पठनाच्च यत् ॥
तत्त्वमसीति वाक्येन मुक्तिमाप्नोति दुर्लभम् ॥

Colophon. इति रुद्रयामले शिवपार्व्वतीसंवादे रुद्रचण्डिका समाप्ता ॥ ओँ तत्सत् ॥००॥ ८८८८ ॥ ८८८८ ॥ ८८ ॥

विवरणम्—रुद्रयामलान्तर्गतरुद्रचण्डिकाभिधचण्डीस्तवरूपोऽयं निबन्धः ।

No. 118. षट्चक्रनिरूपणम् । Ṣaṭcakranirūpaṇam. Substance, country-made yellow paper, 18 × 3 inches. Folia, 14. Lines, 3 in a page. Character, Bengali. Date, ? Appearance, very old, worn out, and torn in parts. Verse. Not correct. Complete.

A work by Pūrṇānanda, treating of the six mystic centres, or circles connected with particular parts of the body. These circles, often represented as lotuses, are called (1) Mūlādhāra, (2) Svādhiṣṭhāna, (3) Maṇipura, (4) Anāhata, (5) Viśuddha, and (6) Jñā. The meditation on these procures transcendantal powers. Complete in 55 verses. Noticed in the India Office Catalogue, No. 2613, p. 909, part IV.

Beginning. श्री नमो जगदीश्वर्य्यै । अथ षट्चक्राणि निरो(रू ?)प्यन्ते ॥

अथ तन्त्रानुसारेण षट्चक्रादिक्रमोद्गतः ।
उच्यते परमानन्दनिर्व्वाह' प्रथमोऽङ्कुरः ॥
मेरोर्वाह्यप्रदेशे शशिमिहिरशिरे सव्यदक्षे निषण्णे
मध्ये नाडी सुषुम्ना त्रितयगुणमयी चन्द्रसूर्य्याग्निरूपा ।
धुस्तूरेव (?) पुष्पग्रथिततमवपुस्कन्दमध्याच्छिरस्था
तन्मध्ये चित्रिणी सा प्रणवविलसिता योगिनां योगगम्या ॥ १ ॥
लूतातन्तूपमेया सकलसरसिजान् मेरुमध्यान्तरस्थान्
भित्त्वा देदीप्यते तद्ग्रथनरचनया शुद्धबोधप्रबोधा ।
तन्मध्ये ब्रह्मनाडीहरमुखकुहरादादिदेवान्तसंस्था ॥ २ ॥

End. ज्ञात्वैतत्क्रममुत्तमं यत्मना (?) योगी समाधौ युत'
श्रीदीक्षागुरुपादपद्मयुगलामोदप्रवाहोदयात् ।
संसारे नहि जन्यते नहि कदा संक्षीयते संक्षये
पूर्णानन्दपरम्पराप्रमुदित शान्त: सतामग्रणी: ॥ ५४ ॥
योऽधीते निशि सन्ध्ययोरथ दिवा योगी स्वभावस्थितो
मोक्षज्ञाननिदानमेतदमलं शुद्धं सुगुह्यं क्रमं ।
श्रीमत्श्रीगुरुपादपद्मयुगलामाद्राय्यतान्तर्मना (?)
तस्यावश्यमभीष्टदैवतपदे चेतो नरीनृत्यते ॥ ५५ ॥

Colophon. इति पूर्णानन्दविरचितं षट्चक्रं संपूर्णम् । श्रीकालीचरणे
विवक्षाय—श्रीपूर्णानन्दविरचित: षट्चक्रविषयकोऽयं निबन्ध ।

No. 119. मुण्डमालातन्त्रम् । Mundamalatantram. Substance, country-made yellow paper, 18 x 3 inches. Folia, 39 Lines, 3-6 in a page. Character, Bengali. Date, ? Appearance, somewhat old Verse. Not correct. Incomplete.

An original Tantra, but the codex does not correspond either in the beginning, or at the end, with the work of the same name noticed by Dr. R. Mitra in his *Notices*, No. 469, which is complete in six patalas, while the codex under notice contains ten paṭalas and a portion of the eleventh.

Beginning. ओँ नमो दुर्गायै ॥

कैलासशिखरे रम्ये गन्धर्व्वगणसेविते ।
हरवचःस्थिता देवी पृच्छति स्म नगात्मजा ॥
देवदेव महादेव सृष्टिस्थित्यन्तकारक ।
नीलकण्ठ जगद्बन्धो प्रभो शङ्कर भो हर ॥

+ + + + +

श्रुतं परमतन्त्रं वै सारात्सारं परात्परं ॥
यत् श्रुत्वा शीघ्रमायान्ति शिवलोकमनामयम् ॥
कालीतन्त्रे कुब्जिकायां तथा कालीविलासके ।
डामरे जामले काली सर्व्वस्वे योनितन्त्रके ।
सम्मोहने (?) विक्रमे च तन्त्रे चैव कुलार्णवे ।
मातृकाभेदतन्त्रे च समयाचारतन्त्रके ।
वीरतन्त्रे तोडले च तन्त्रे भैरवतन्त्रके ॥
ज्ञानतन्त्रेच निर्व्वाणे श्रुतं च परमादरात् ॥
इदानीं श्रोतुमिच्छामि गुह्यात्गुह्यतरं परं ।
सारात्सारतरं देवि पावनं सर्व्वदेहिनाम् ॥
श्रुत्वा जीव. शिवत्वञ्च लभते नात्र संशय: ॥

श्रीशिव उवाच ।

अस्ति चैकं मुण्डमालातन्त्रं परमसाधनं ॥
ज्ञात्वा जीव: शिवो भूत्वा विहरेत् क्षितिमण्डले ॥
अतिगोप्यं महेशानि तन्त्रराजं मनोहरं ।
मुण्डे मुण्डे च कथितं कथितं मुण्डमालया ॥

In the second paṭala, the worshippers of Śakti are praised thus :—

शृणु देवि वरारोहे नास्ति शाक्तात् परो जन: ।
शाक्तोपि शङ्कर: साचात् परं ब्रह्मस्वरूपभाक् ।
आराधिता येन काली तारा त्रिभुवनेश्वरी ।
षोडशी चैव मातङ्गी छिन्ना च वगलामुखी ।
आराधिता महेशानि सशिवो नात्र संशय: ॥
शाक्तानामुत्तमो नास्ति स्वर्गे मर्त्त्ये रसातले ।

The use of the five Makāras by a Brāhmaṇa is prohibited in this chapter.

मत्स्यं मांसञ्च मद्यञ्च मुद्रा मैथुनमेव च ।
दिव्यानाञ्चैव वीराणां साधनं भवनाशनम् ॥
न मद्यं प्रपिबेद्विप्रो न मुद्रां भक्षयेत् सदा ।
न मैथुनमगम्यासु कर्त्तव्यं सिद्धिनाशनम् ॥

We also find substitutes of wine in this chapter.

नारिकेलोदकञ्चार्द्रं जलं सर्व्वार्थसाधनं ।
कांस्ये गुडे (?) सव्यकरे कृत्वा कारणकल्पनम् ॥
सम्बिदासुरयोर्म्मध्ये सम्बिदेव गरीयसी ।
अनुकल्पानि चान्यानि सम्बिदा केवला सुरा ॥

Āsanas of twelve kinds are thus enumerated :—

आसनं द्वादशविधं शङ्करासनमुत्तमं ।
भद्रपीठासनं भद्रा आसनं वरदासनं ।
भद्रपीठासनं पद्मासनं सिंहासनन्तथा ।
सिद्धसिद्धासनं हंस्यासनञ्च कुक्कुटासनं ।
सिंहासनं परं देवि श्मशानासनमुत्तमं ।
शवासनं वरारोहे देवानामपि दुर्ल्लभम् ॥
यः अर्च्चेत् परमं ब्रह्मासनं परमभूषितम् ॥

In the fourth chapter the way of gaining Siddhi (success) is mentioned, and in the fifth Śriṅgārarasa is described.

End. नास्ति ।

Colophon. इति मुण्डमालातन्त्रे दशमः पटलः ।

विवरणम्—मुण्डमालाभिधं तन्त्रम् सुप्रसिद्धमेव । असम्पूर्णत्वान्नैतस्य सम्यगालोचनं कृतम् ।

No. 120. **रुद्रचण्डी ।** Rudracaṇḍī. Substance, country-made yellow paper, 18 × 13 inches. Folia, 3. Lines, 4–8 in a page. Character, Nāgara. Date, ? Appearance, old. Verse. Generally correct. Complete.

A part of the Rudrayāmala noticed before in No. 117.

विवरणमनुक्तपूर्व्वम् ।

No. 121. शाक्तानन्दतरङ्गिणी। Śāktānandataraṅgiṇī. Substance, country made yellow paper, 18 × 4 inches. Folia, 10. Lines, 5–8 in a page. Character, Bengali. Date, ? Appearance, old. Prose and verse. Generally correct. Incomplete.

Another copy of the work noticed in No. 96.

विवरणमुक्तपूर्व्वम्।

No. 122. तन्त्रामृतम्। Tantrāmṛitam. Substance, country-made colourless paper, 12 × 3 inches. Folia, 26. Lines, 4–5 in a page. Character, Bengali. Date, Bengal Era 1243. Appearance, old. Prose. Not correct. Complete.

A Tāntrika work treating of the ten Mahāvidyās, their worship, puraścaraṇa, etc. The authorities quoted are Cāmuṇḍātantra, Mālinī-vijaya, Rudrayāmala, Tantracūḍāmaṇi, &c. Anonymous.

Beginning. श्रीं नमो दुर्गायै।

प्रणम्य गौरीं जगदेकमातरं
तथा गिरीशं जगदेकबन्धं।
कृतं कृतैश्यागमशास्त्रसारं
तन्त्रामृतं नाम सुगुप्तसारम्॥

तत्रादौ महाविद्यानिरूपणं चामुण्डातन्त्रे।

काली तारा महाविद्या षोडशी भुवनेश्वरी।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा।
बगला सिद्धविद्या च मातङ्गी कमलात्मिका।
एता दश महादेवि महाविद्याः प्रकीर्त्तिताः॥
नात्र सिद्धाद्यपेक्षास्ति न चक्रादिविचारणा।
कालादिशोधनं नास्ति न च मित्रादिदूषणं
(न च मित्रादिदूषणं ?)॥

मालिनीविजये।

कालीनीला महादुर्गा त्वरिता छिन्नमस्तका।
वाग्वादिनीचान्नपूर्णा तथा प्रत्यङ्गिरा पुनः॥

कामाख्यावासिनीबाला मातङ्गी शैलवासिनी ।
इत्याद्याः सकला विद्याः कलौ पूर्णफलप्रदाः ॥
सिद्धविद्यतया नात्र युगसेवापरिश्रमः ।
तथा चैतामहाविद्या कलिदोषान्न बाधिताः ॥
इत्यादिवचनेषु विचारो नास्तीति किञ्चित् वस्तुत इदं प्रशंसापरं किन्तु सर्व्वत्र विचारस्यावश्यकत्वं । अन्यथा दुरदृष्टवशात् कदाचित् स्वप्नादौ वैरिमन्त्रस्य प्राप्त्या तत्र दोषस्य दृष्टत्वादिति साम्प्रदायिकाः ।

End.

नाक्षतैरर्चयेद्विष्णुं न तुलस्या विनायकं ।
न दुर्व्वया जपेद्दुर्गां विल्वपत्रैर्दिवाकरम् ॥
दुर्व्वा निषिद्धेति यदुक्तं तत् श्वेतदूर्व्वापरं तथाचोक्तं यामले —
रक्तमाल्यं श्वेतदुर्व्वां नीलकण्ठं कुरुण्डकं ।
न दद्यान्न महादेव्यै यदीच्छेच्छुभमात्मनः ॥
अत्राभावे च गन्धाढ्यं दुर्व्वा वा श्रीफलं दलम् ।
विना वै दुर्व्वया देवि पूजा नास्ति च कर्हिचित् ॥
तस्माद्दुर्व्वा ग्रहीतव्या सर्व्वपुष्पमयी हि सा ।
देवेभ्यः सर्व्वगन्धाढ्यं अभावे तुलसीदलं ॥
तुलस्या पूजयेद्देवान्नात्र कार्य्या विचारणा ।
विना तुलस्या सानाङ्गं भाव यस्या (?) दिकं प्रिये ॥
न संपूर्णफलं प्राहुः सर्व्वत्रैव विनिश्चितः (?) ।
दुर्व्वा वा तुलसी तस्माद्ग्रहीतव्या च साधकैः ॥
सुन्दरी भैरवी काली ब्रह्मविष्णुविवस्वतां ।
विना तुलस्या या पूजा सा पूजा निष्फलं (?) भवेत् ॥

शक्तियामले ।

सावित्रीश्च भवानिश्च (?) दुर्गादेविं सरस्वतीं ।
'पोषयेत् (?) तुलसीपत्रैः सर्व्वकामैः समर्धते ॥

आमर्ते ।

रात्रौ रहस्यपूजायां तुलसीं वर्ज्जयेत सदा ।
तुलसीघ्राणमात्रेण क्रोद्धा (?) भवति देवता ॥

आमर्षे—

स्नानं कृत्वा तु ये केचिद(न् ?)पुष्पं छिन्दन्ति वै द्विजाः ।
देवतास्तन्न गृह्णन्ति न चापि पितरस्तथा ॥

एतत्तु मध्याह्नस्नानपरं। तथा

स्नात्वा मध्याह्नसमये न छिन्द्यात् कुसुमं बुधः।

तत् पुष्पोपवर्म्माद्देविनिलये (?) परिगण्यते॥

न पुष्पच्छेदनं कुर्य्याद्देवार्थं वामहस्ततः।

न दद्यात्तेन देवेभ्यः संस्थाप्य वामहस्ततः॥ * * ॥

Colophon. नास्ति।

श्रीहरमोहनदेवशर्म्मणः स्वाक्षरमिदं सां वाजपुर इति सन १२४३ तारिख ४ चैत्र।

विवरणम्—तन्त्रामृताभिधोऽयं तान्त्रिकनिबन्धविशेषः—

No. 123. **गुरुगीतास्तोत्रम्।** Gurugītāstotram. Substance, foolscap paper, 14 × 4 inches. Folia, 9. Lines, 4-7 in a page. Character, Bengali. Date, ? Appearance, not fresh. Verse. Generally correct. Complete.

A part of the Brahmayāmala in praise of the Guru, entitled Gurugītā.

पुस्तकेऽस्मिन् ब्रह्मयामलान्तर्गतगुरुगीता वर्णते।

No. 124. **ईशानसंहिता।** Iśānasaṁhitā. Substance, Bāli paper of yellow colour, 18 × 5 inches. Folia, 10. Lines, 5-8 in a page. Character, Bengali. Date, ? Appearance, fresh. Verse. Not correct. Complete.

A work on Vaiṣṇavism in the form of a dialogue between Nārada and Gautama, entitled Iśānasaṁhitā, because Nārada chiefly quotes the words of Mahādeva as addressed to Pārvatī.

Beginning. श्रों नमो (?) श्रीकृष्णचैतन्याय। श्रीगौतमोवाच (?)॥

देवर्षे सर्व्वधर्म्मज्ञ सर्व्वदर्शिन् दयानिधे।

वैष्णवाचारधर्म्माय योगधर्म्मस्तथा गुरो॥ १॥

कर्म्मधर्म्मो मोक्षधर्म्मः साधनानि च सर्व्वशः।

सर्व्वं श्रुतञ्चाधिगतं तत्प्रसादान्महामुने॥ २॥

किन्तु नाथ कृपासिन्धो मन्मनस्तरलायते।
जन्तूनां मानवा धन्यास्तेषु धन्या द्विजातयः॥ ३॥
तेषु वै ब्राह्मणा धन्यास्तेषु मोक्षविचेष्टिताः।
तेषु स्वाचारनिरतास्तेषां मध्ये तु वैष्णवाः॥ ४॥
न वैष्णवसमा देवा ब्रह्मविष्णुमुखादपि (?)।
त्रिजगत् वैष्णवाधीनं देवा वैष्णवपालिता (?)॥ ५॥
देवैरपि प्रपूज्यन्ते वैष्णवाः सु(?)मंहामुने।
इति मे संशयं नाथ छेत्तुमर्हसि साम्प्रतं॥ ६।

श्रीनारद उवाच।

शृणु वत्स तपःश्रेष्ठ श्रीतं योग्योऽसि गौतम।
दीक्षाख्याने वैष्णवानां शङ्काते (?) मम मानसं॥ ७॥

In this work the identity of Gaurāṅga with Kṛiṣṇa is thus mentioned :—

श्रीपार्व्वत्युवाच।

भगवन् सर्व्वधर्मज्ञ गुप्तवक्तो(?) च ते पुरा।
कथितो गौरचन्द्रो यस्तत्र मे संशयो महान्॥ ७४॥
कृष्णभक्तो गौरचन्द्र मानवेति श्रुतं मया।
चतुर्व्वर्गप्रदो देवस्त्वयाऽसौ परिकीर्त्तितः॥ ७५॥
यदोश्वरो हि गौराङ्गश्चतुर्व्वर्गप्रदायकः।
तदा कथं स कृतवान् सन्न्यासादिकधारणं॥ ७६॥

श्रीमहेश्वर उवाच।

शृणु चार्व्वङ्गि शुभगे यत् प्रोष्टं (पृष्टं ?) गोपितं वचः।
सर्व्वागमेषु देवेशि नाम्ना ते कथयाम्यहम्॥ ७७॥
द्विधाविभक्तरूपेण कृष्णः पूर्णफलप्रदः।
एकएव हि गौराङ्गः कर्त्ता पूर्णफलप्रदः॥ ७८॥
यो वै कृष्णः स गौराङ्गस्तयोर्भेदो न विद्यते।
तथापि भक्तिशास्त्रेषु गौर (:?) पूर्णतयाऽधिकः॥ ७९॥
शिक्षार्थं साधकानाञ्च स्वयं साधकरूपधृक्।
शिक्षागुरुः शचीपुत्रः पूर्णब्रह्म न संशयः॥ ८०॥
कलौ तत्साधका ये तु ते देवा न तु मानुषाः।
तेषां न पापलेशोऽस्ति मम ज्ञाने महेश्वरि॥ ८१॥

देवेन यत् कृतं कर्म्म तत्तन्मोक्षैकसाधनं ।
यस्मिन् देशे गौरभक्तो नास्ति भूमिविभूषण. ॥ ८२ ॥
तस्मिन् देशे न तिष्ठेत्तु क्षणं मोक्षविचेष्टित: ।
यत्र देशे गौरभक्त (:?) स देश: परमो मत: ॥ ८३ ॥

After this, Gaurāṅga mantras are thus spoken of by Śiva :—

तस्य मन्त्रान् प्रवक्ष्यामि कल्पवृक्षानिव प्रिये ।
यान् श्रुत्वा मानवो नूनं नान्यमन्त्रं समीहते ॥ ९१ ॥
प्रणवं पूर्व्वमाहृत्य (मुद्धृत्य?) ततो गौरं समुच्चरेत् ।
हृदन्तो मनुवर्य्योऽयं गौराङ्गस्य ऽक्षरं (षड़क्षरं ?) ॥ ९२ ॥

ओं गौरचन्द्राय नम: ॥१॥ क्लीं गौरचन्द्राय क्लीं ॥ २ ॥ क्लीं श्रीं गौरचन्द्राय नम: । ओं क्लीं गौराङ्गाय नम: ॥ ४ ॥ ओं क्लीं गौरचन्द्राय नमो क्लीं ॥५॥

The worship of Gaurāṅga is thus mentioned :—

कृष्णवद्विहितो देवि सपर्य्याविधिरुत्तम: ॥ १०० ॥
विशेषं कथयाम्यत्र शृणु देवि प्रियम्वदे ।
स्नानान्तं कर्म्म सम्पाद्य धौतवस्त्रं विधारयेत् ॥ १०१ ॥
गोपीचन्दनतोयाभ्यां तिलकं कारयेत् सुधी: ।
आचम्य पूर्व्वादिवक्त्र: सन्ध्यातर्पणकर्म्माणि (कर्म्माणि ?) ॥ १०२ ॥
निष्पाद्य भक्तियोगेन गौराङ्गं पूजयेत् प्रिये ।
शुक्लचन्दनपुष्पाणि दक्षभागे निधापयेत् ॥ १०३ ॥
वामभागे तु नैवेद्यं स्थापयेद्वैष्णवाग्रणी: ।
ताम्रादिपात्रपुरत: सितचन्दनलेपिते (?) ॥ १०४ ॥
यन्त्रं कृष्णवदालिख्य पूजयेत् पीठदेवता: ॥ ५ ॥

अथ ध्यानं ।

द्विभुजं सुन्दरं स्वच्छं वराभयकरं विभुं ।
सुहास्यं पुण्डरीकाक्षं दधानं (?) पीतवाससम् ॥
कृष्ण कृष्णेति भाषन्तं सुस्वरं सुमनोहरं ।
यतिवेशधरं सौम्यं वनमालाविभूषितं ॥
तारयन्त जनान् सर्व्वान् भवाम्भोधेर्दयानिधिं ।
ध्यात्वानेन यथाशक्त्या पूजयेत् गौरसुन्दरम् ।
शीतचन्दनसंयुक्तं तुलसीदलमुत्तमम् ॥ [illegible] ॥

प्रदद्यात् श्रद्धया युक्तात्तुलसीमञ्जरीं तथा ।
सा पूजा विफला ज्ञेया या तुलस्या विना कृता ॥ १०८ ॥
तुलसीं धारयेन्नित्यं कर्णरन्ध्रे तु वैष्णवः ।
अन्तर्तीर्थे वारिपात्रे तुलसीं स्थापयेत् सदा ॥ १०९ ॥
माल्यञ्च तुलसीकाष्ठसम्भवं धारयेत् प्रिये ।
अथवा धारयेन्मालां तुलसीपत्रसम्भवां ॥ ११० ॥
अधृत्वा वैष्णवी माला यत् कर्म्म समुपाचरेत् ।
न तत् फलाय भवति रक्षोयक्षादिभिर्हृतम् ॥ १११ ॥

\+ + + + + +

इत्थं संपूज्य गौराङ्गं दत्वा पुष्पाञ्जलित्रयम् ॥ ११६ ॥
सहस्रं प्रजपेन्मन्त्रं शतं वाष्टाधिकं प्रिय ।
समर्प्य तत् फलं तस्मै स्तोत्रैर्भक्त्या च तोषयेत् ॥ ११७ ॥
उपास्य देवतास्तोत्रं कवचञ्च महेश्वरि ।
न पठेद् वैष्णवो यस्तु तस्य पूजा वृथा भवेत् ॥ ११८ ॥
तस्माद्वक्ष्यामि गौरस्य स्तोत्रं सर्व्वार्थसाधनं ।
गौरभक्तिप्रदं श्रीतन्नामाष्टशतकं शृणु ॥ ११९ ॥
श्रच्युतोऽच्युतमर्ङ्गक्रिरामारामलयात्मभूः ।
इन्द्रवक्तः श्रेयदाता ईश्वरश्चेश्वरात्मकः ॥ १२० ॥

In the stotra one hundred and eight names of Gaura are enumerated, the names being generally identical with those of Krișņa. We quote the *kavaca* below :—

गौराङ्गकवचस्यास्य ऋषिरङ्गिरसः स्मृतः ।
तुष्टुप्छन्दो देवता च नररूपी महाप्रभुः ॥ १०८ ॥
श्रीं बीजमस्य शक्तिश्च क्लीं लक्ष्मी कीलकं तथा ।
चतुर्व्वर्गार्थसंसिद्धौ (द्धौ ?) विनियोगः प्रकीर्त्तितः ॥ १३९ ॥
प्राच्यां रक्षतु मां नित्यं ब्रह्मबीजमनुत्तम ।
गौरायेति तथा याम्यां प्रतीच्यान्तु नमः पदम् ॥ १४० ॥
सर्व्वमेतद्भरथ्यां (?) नित्यं मां परिरक्षतु ।
मायाद्या गौरचन्द्रो मां जले रक्षतु सर्व्वदा ॥ १४१ ॥
ब्रह्मादिकस्तदन्तश्च रन्ध्रेष्वां कामनान्तरे ।
रक्षत (तु ?) मां नित्य सर्व्वमन्त्रा सनातना ॥ १४२ ॥

विवादेऽवतु मां गौरी दुःखशोके शचीसुतः ।
दारिद्रे गौरचन्द्रो मां दुःस्वप्ने गौरसुन्दरः ॥ १४३ ॥
हृदि हस्ते तथा नाभौ शिरोग्रीवे पदोः कटौ (?) ।
गौराङ्गो (?) सर्व्वदा पातु गौरचन्द्रो नखेषु च ॥ १४४ ॥
रक्षाविहीनं यत् स्थानं यद्यद्दुःखभयादिकं ।
तत्सर्व्वं देवदेवेशो गौरदेह (?) सदावतु ॥ १४५ ॥
इत्येतत् कवचं गौरचन्द्रस्य परिकीर्त्तितं ।
प्रत्यहं भक्तिभावेन पठितव्यं नरैः सदा ॥ १४६ ॥

We find also the following amusing conversation between Hara and Pārvati. Pārvati asked her lord Mahādeva, that while it was a general rule that sons resembled their fathers in all respects, why it was that there was a remarkable exception in his case. While he had five heads, his son Kārtika had six, and she begged of her lord to explain the reason thereof. Mahādeva replied, there was no inconsistency, for he also had six heads, five outwards, and one hidden.

सत्योऽसंमेय देवेशि पञ्चवक्त्रोऽहमव्ययः ।
किन्तु वक्त्रान्तरं देवि गुप्तं मेऽस्ति न संशयः ॥ ३५ ॥
चतुर्वक्त्रो चतुर्दिक्षु पञ्चमस्तोर्द्ध्ववक्त्रके ॥ ३६ ॥
ईशानाख्यं सुगुप्तञ्च तत्प्रपन्नं महेश्वरि ।
त्वयापि हृदये धार्य्यमप्रकाश्यं हि कुत्रचित् ॥ ३७ ॥
षड्वक्त्रस्यैव मे देवि पञ्चवक्त्रं प्रकाशितं ।
अतो मम सुतो जातः षड्वक्त्रश्च षडाननः ॥ ३८ ॥

End.

ये तु संसारदुःखात्ता नरो मोक्षाभिकाङ्क्षिणः ।
ईशानसंहितामेतामासाद्य भक्तिभावतः ॥ १६१ ॥
संपूज्य विधिवद्देवं राधानाथं नराकृतिम् ।
आनन्दं कन्दि सावन्य करुणाब्धिनिधिं विभुम् ।
विमुक्ता यान्ति सत्यायु तद्विष्णोः परमं पदम् ॥ १६२ ॥

Colophon. इति श्रीनारदगौतमसंवादे कुलार्णवीयगुप्ताम्नाये ईशानसंहिता समाप्ता ॥*॥

विवरणम्—ईशानसंहिताभिधो वैष्णवमतानुगततान्त्रिकनिबन्धविशेषः ।

No. 125. कालीपूजापद्धतिः। Kālīpūjāpaddhatiḥ. Substance, country-made yellow paper, 12 × 4 inches. Folia, 66. Lines, 8 in a page Character, Bengali. Date, 1759 Śaka. Appearance, not much old. Prose. Generally correct. Complete.

A guide to the worship of Goddess Śyāmā, entitled Śyāmārcanakramadīpikā, by Kāśīnātha Tarkapañcānana.

Beginning. श्रीमद्दक्षिणकालिकायै नमः ॥ ० ॥

श्रीकालीपादपद्मं निजहृदिकमले चिन्तयित्वा नितान्तं
श्रीकालीप्रीतिहेतोः क्रमविधिमधुना पूजने कालिकायाः।
श्रीकालीतन्त्रदृष्ट्या गुरुपदकृपया साधकानां हितैषी
श्रीकालीभक्तदासः प्रकटयति मुदा श्रीलकाश्यादिनाथः॥

अथ कालीपूजापद्धतिर्लिख्यते।

End. एवं पशुभावस्थितः साधको दक्षिणाचारसम्पन्नः श्रीगुरोराज्ञानुसारेण पूर्णाभिषेकसंस्कारसंस्कृतः सन् वीरभावस्थितो वामाचारमाश्रयेत्॥ ० ॥

शाके रन्ध्रमनोजवाणमुनिभमाने गधाशीर्दिने
माघे मासि समुद्रनेत्रगणिते पक्षे सिते तान्त्रिकी।
जातेयं क्रमदीपिकागमकरी श्यामासपर्याविधौ
पूजानन्दविधायिनी विजयतां सर्व्वार्थसंसाधिनी॥ ० ॥

Colophon. इति श्रीकाशीनाथतर्कपञ्चाननकृता श्यामार्चनक्रमदीपिकानाम्नी श्रीश्यामापूजापद्धतिः समाप्ता॥ ० ॥ श्री तत् सत्॥ ० ॥

विवरणम्—श्रीकाशीनाथतर्कपञ्चाननविरचितश्यामार्चनक्रमदीपिकाभिधानश्रीश्यामापूजापद्धतिरूपोऽयं निबन्धः।

No. 126. कालीतन्त्रम्। Kālītantram. Substance, country-made white paper, 15 × 6 inches. Folia, 11. Lines, 8 11 in a page Character, Bengali. Date, 1306 Bengal Era. Appearance, fresh. Verse. Generally correct. Complete.

An original Tāntrika work treating of Goddess Kālī, entitled Kālītantra, complete in eleven paṭalas or chapters. The first paṭala consists of the rules of the worship, the second treats of Puraścaraṇa, the third of *naimittika* or occasional worship, etc., the fourth, entitled

Kāmyapaṭala, treats of Kāmya worship, etc., the fifth treats of Siddhi; the sixth of Vīrasādhana, the seventh of Puraścaraṇarahasya and so on. The Kālītantra is quoted as an authority in several Tāntrika works.

Beginning. श्री नमः शिवाय ॥

कैलासशिखरासीनं देवदेवं जगद्गुरुं
पप्रच्छ परया भक्त्या पार्व्वती परमेश्वरं ॥
देवदेव महादेव सृष्टिस्थित्यन्तकारक ।
किन्तु ब्रह्ममयं जगच्छ्रोतुमिच्छामि तत्त्वतः ॥
कालिकाया महादेव्याः पूजाञ्चैव विशेषतः ॥
सप्रयोगसमाहितां चतुर्व्वर्गफलप्रदाम् ।

We quote below some important passages from the Vīrasādhana.

शृणु देवि वरारोहे वीरसाधनमुत्तमं
येषां शीघ्रफलावाप्ति प्रकारान्तरमुच्यते ॥
चतुष्पथे चतुर्द्दिक्षु पुरुषं हृदयं खनेत् ।
जीवितं ब्रह्मरन्ध्रे वै दीपान् प्रज्वालयेदिति ॥
कल्पोक्तपूजां संपूज्य जपेत् प्रयतमानसः ।
दन्ताक्षमालया चैव राजदन्तेन मेरुणा ।
दिग्वासाः प्रजपेन्मन्त्रं अयुतं सर्व्वदैवतम् ॥
जपान्ते च वलिं दत्वा दक्षिणां विभवावधि ।
सर्व्वसिद्धीश्वरो विद्वान् सर्व्वदेवनमस्कृतः ।
अथवा विजनेऽरण्ये अस्थिशय्यासनो नरः
उदयास्तं दिवा जप्ता सर्व्वसिद्धीश्वरो भवेत् ॥
बिल्वमूले निजक्रोडे शवमारोप्य यत्नतः ।
नृसिंहमुद्रया वीक्ष्य जपेन्मातृकया नरः ॥
सहस्रं पूजां (?) तत्र जप्ता सर्व्वसिद्धीश्वरो भवेत् ॥
कुङ्कुमागुरुकस्तूरी रोचनाघनचन्दनं ।
एकत्र साधितं कृत्वा प्रत्येकं साधयेत्ततः ॥
जिह्वाग्रे रुधिरं कृत्वा आकाशे तु समाहरेत् ।
तेनैव गुटिकां कृत्वा भद्रकालीं ततो जपेत ॥
ललाटे तिलकं कृत्वा साधयेत् वीतभीः स्वयं ।
महाष्टमीनवम्योस्तु संयोगे पुरतः स्थितः ।

श्मशानमथवाऽगारमथवा चतुर्दिक्षु विनिक्षिपेत् ।
ताम्बूलमपि पुष्पञ्च दीपादिभिरलंकृत: ॥

+ + + +

कुजे वा शनिवारे वा नरमुण्ड समाहृतं ।
पञ्चगव्येन मिलितं चन्दनाद्यैर्विशेषत: ॥
निक्षिप्य भूमौ हस्तार्द्धमानत: कानने वने ।
तत्र तद्दिवसे रात्रौ सहस्रं यदि मानव: ।
एकाकी प्रजपेन्मन्त्रं सभवेत् कल्पपादप: । इत्यादि ।

End.

कुलीनं नावमन्येत देवीवत् परिपूजयेत् ।
कुलजेषु प्रसन्नेषु कालिकामभिधिर्भवेत् ॥
केचिद्धि धन्यवतो लोके तथेति कुलदर्शनं ।
तेषां मध्ये तु य: कश्चित् कुलदेवीं समर्चयेत् ।
आयुरारोग्यमैश्वर्यं बलपुष्टिं महद्यश: ।
कवित्वं भुवि मुक्तिश्च कालिकापादपूजनात् ।
सत्येन ध्यानयोगेन कविता वशवर्त्तिनी ।
अनया विद्यया मन्त्री स्पृशेत् पातकिनं यदि ।
स तु संस्पर्शमात्रेण वह्निशुद्धिं निराकुलं ।
पीतेन ध्यानयोगेन स्तम्भयेदखिलं जगत् ।
कृष्णेन शत्रुशमनं धूम्राभा वैरिनिग्रहे ॥
कुमारीपूजनं कार्य्यं सर्व्वधर्म्मफलाप्तये ।
कालीमतमिदं दिव्यं भैरवेण प्रकाशितं ।
न कुत्रापि प्रवक्तव्यं माश्यते च स्वपीडनम् ॥
प्रकाशे सिद्धिहानि: स्यात्तस्माद्यत्नेन गोपयेत् ।
तस्मात् सर्व्वप्रयत्नेन गोप्तव्यं देवतागणे ।
यथा मनुष्ये लभ्येत तथा कार्य्यं महेश्वरि ।
यो भक्त्या साधयेत् ज्ञानी तस्मै नित्य प्रकाशयेत् ।

Colophon. इति कालीतन्त्रे एकादश: पटल: ॥ समाप्तोऽयं ग्रन्थ: ॥ १२०६ काव्य-तीर्थोपाधिधारिश्रीबमोहनशर्म्मा पुस्तकोऽयं (?) व्यलिखत् ॥

विवरणम्—कालीतन्त्रमिदं सुप्रसिद्धमेव ।

No. 127. ताराहस्यविवृतिः। Tārārahasyavivṛitiḥ Substance, country made yellow paper, 16 × 4 inches. Folia, 130. Lines, 6 7 in a page Character, Bengali. Date, ? Appearance, very old, worn out, and torn in parts. Prose. Generally correct. Complete.

A commentary on the Tārārahasya, by Śankarācāryya, entitled Tārārahasyavivṛiti. Noticed before in No. 33, but as that was without a beginning, it is given below from the codex under notice.

Beginning. ओं नमो गुरुचरणेभ्यः।

ऊर्ज्जिताभन्दगहनां सर्व्वदेवशरीरिणीं।
परां वाग्रूपिणीं वन्दे महानीलसरस्वतीं।
नीलतन्त्रं स्वतन्त्रञ्च सिद्धसारस्वतं परं।
वीरतन्त्रं मतस्यमूक्तं गान्धर्व्वं फरवं तथा॥
भैरवाख्यं महातन्त्रं विज्ञानेश्वरसंहिताम्।
विशुद्धेश्वरतन्त्रं च कुलचूडामणिं तथा॥
जामलं गुरुमतं ज्ञात्वा गुरुभि कथितञ्च यत्।
कृता श्रीशङ्करेणेषा ताराहस्यवृत्तिका॥

At the beginning of the work, the contents of the text are thus enumerated.

नित्यपूजाप्रमाणन्तु प्रथमे पटले तथा।
दीक्षाविधिर्द्वितीये स्यात् पुरश्चर्या तृतीयके।
नैमित्तिकं चतुर्थे तु पञ्चमे साम्यनिर्णयः।
रहस्यनिर्णयः षष्ठे कुमारी सप्तमे तथा॥
अष्टमे च पुरश्चर्या रहस्यं परिकीर्त्तितम्।
नवमे पटले देव्या मन्त्राणां परिनिर्णयः॥
दशमे पटले स्तोत्र महिमैका दशे तथा।
द्वादशे पटले सम्यग्भावानां परिनिर्णयः॥
प्रातः कृत्यादिकञ्चैव पटले च त्रयोदशे।
सम्यग्विधानं होमस्य ताराया तु चतुर्द्दशे॥
पञ्चदशे तु मन्त्राणां वासना तत्वनिर्णयः।
इति ताराहस्ये तु सम्यगध्यायनिर्णयः॥

No. 128. ताराहस्यविवृतिः। Tārārahasyavivṛitiḥ. Substance, country-made white paper, 16 × 6 inches. Folia, 150. Lines, 8 10 in a page. Character, Bengali. Date, A.D. 1898. Appearance, fresh. Prose. Not correct. Complete.

Another copy of the same work.

विवरणमनुपूर्व्वम्।

No. 129. कङ्कालाध्यायवार्त्तिकम्। Kaṅkālādhyāyavartikam Substance, country made white paper, 12 × 10 inches, bound like an ordinary book. Folia, 58. Lines, 12-14 in a page. Character, Nāgara. Date, Saṁvat 1932. Appearance, not old, but slightly worm-eaten in parts. Prose and verse. Not correct. Complete.

A work on alchemy, entitled Kaṅkālādhyāyavārtikam. Anonymous. But it appears to be a work of a Jaina writer, for he salutes the Arhats at the beginning.

Beginning. श्रीगणेशाय नमः।

सिद्धिः श्रीनामतो येषां भवेत् सर्व्वमिताश्रियः।
नत्वा तानर्हतः कुर्व्वे कङ्कालाध्यायवार्त्तिकम् ॥ १ ॥
गुरुभ्यः किंचिदाकर्ण्य तज्ज्ञैः संसृज्य किंचन।
किंचिदप्यनुभूयासौ ग्रंथोविवियते मया ॥ २ ॥
प्रोक्तोपि गुरुणा साक्षाज्ञातुर्वाङ्गेन सिध्यति।
यावन्न दृश्यते शिष्यैर्गुरुपार्श्वे क्रियाविधिः ॥ ३ ॥
यस्मात् कस्मादपि श्रुत्वा यत्र कुत्रापि वीक्ष्य च।
द्रव्यव्ययं प्रकुर्व्वीत तत्र श्राम्यति वाग्मिश ॥ ४ ॥
श्रीभैरवं प्रणम्यादौ सर्व्वज्ञं त्रिजगत्प्रभुं।
श्रीभारतीं च विघ्नेशं वंदे प्रत्यूहशांतये ॥ ५ ॥
ब्रह्मचर्य्यं तपः कार्य्यं हविष्यान्नं च भोजनं।
क्रियाभ्रष्टे न सिध्यंति तपोनष्टे फलंति न ॥

At the end we find that the man who first attempted to bring this branch of learning to light was Kaṅkālālaya Yogin.

17 s. c.

End. तथा चतुरशीति गुटिका ८४ चराशी सं जमानि ८४ चतुरशीतिसभेदाच् परिज्ञाय पूर्व्वं श्रीकंकालालययोगिनामानिय (ज ?) शिष्याणां हिताथं परमक्षेपनिर्वाहार्थं समासुपकारार्थं (?) कंचिद्रसतत्वसुच्छिष्ट'। ततः स्वशिष्येण स्वस्थाविस्मृत्यर्थं परंपरया अन्यवच्छेदार्थं परेषामुपदेशार्थं चायं श्रीरसाध्यायो विचारितः। अत्र च प्रथममष्टादशसंस्कारसंस्कृतशुद्धला-रसः १ ततो हेमरायिः २ घोषरायिः ३, माक्षिकरायिः ४, नागरायिः ५ इति चतस्रो राजयः २ ततः खापरसत्त्वपातनविधिः ३ ततो मन (?) शिला-सत्त्वपातने विधिः, ततः पीड़शलोहषड़्लोहलोहमारणविधिः ५ ततस्त्रिधा षट्लोहद्रुतिकारणं ६ ततस्त्रिधाशपथहीरकजारणं ७ ततः पञ्चधाहीरक-भस्मीकरणं ८ ततो गंधकशोधनं द्विधा ९ ततो द्विधा गंधकपीठी तस्याः कर्म च १०, ततो गंधकतैलं ११, ततो गंधकतैलेनैव सह वेधरसविधिः १५ ततो गंधकद्रुतिपीठी १५, ततो गंधकद्रुतिपीठीकर्म्म १५, ततस्तालक-शोधनं १६ ततस्तालकर्म्म १७, ततस्त्रिधासकद्रुतिः १८, ततस्तस्याः कर्म्माणि १९, ततो हेमवज्रभस्मनागसत्त्वनिष्पन्नखोटकर्म्माणि २० ततोवादिनो गुटिका २१ प्रत्येकविंशतिरधिकारा निबद्धाः, संतित्वे च (?) यद्यपि किंचित्तथा-विधनार्त्तिकेंद्रसंसर्गजातसंस्कारेण किंचिदक्षरार्थयुक्त्या किंचिच्चानुमाने संभवेन विचिन्त्य व्याख्याता, तथापि यदि क्वापि किमप्यलीकं व्याख्यानं भवेत् तदा प्रसद्य श्रीवार्त्तिकेंद्रैः श्रीरसाध्यायेन तदधिष्ठाय देवताभिश्च सर्व्वं चंतव्यम् ॥ * ॥

Colophon. इति रसाध्यायः समाप्तः * भाद्रपदमासे कृष्णपक्षे अष्टम्यां चंद्रवारे गुरु-दत्ताव्यक्ताचेण लिखितं पुस्तकं शुभं १ संवत् १९३२।

विवरणम्—रसाध्यायाभिधो रसविषयकोऽयं निबन्धः।

No. 130. रुद्रन्यासविधिः। Rudranyāsavidhiḥ. Substance, country-made white paper, 8 × 4 inches. Folia, 16 (of which foll. 1—5 are wanting). Lines, 9 in a page. Character, Nāgara. Date, ? Appearance, old, torn, and worm-eaten in parts. Prose. Generally correct. Complete (excepting the first five folia).

A work, teaching how every part of one's body is to be touched with one's right hand, with a name or *mantra* of Rudra being repeated at the same time, entitled Rudranyāsa. Anonymous.

Beginning. नास्ति ।

End. ओं नमः शिवाय शांताय सत्त्वाय च रुद्राय च

रुद्रोऽपुषे अघोराय नमस्तुभ्यं तमोजुषे १

अथ जपलक्षणं

सांगमाद्यं जपेद्रुद्रं केवलादिनि चैव तु

सांगं साग्नीर्षकं चान्त्यं निरंगमिति केवल ।

ततो जपः जपांते इमारुद्रायेति मंत्रतो अर्घ्यं दद्यात् देवपाणौ तं निवेदयेत्

ततो जपनिवेदनं

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपं

सिद्धिर्भवतु मे देव प्रसादाच्च त्वयि स्थितिः

इत्यादि देवं स्तुत्वा चमाप्य ।

Colophon. इति रुद्रन्यासविधिः समाप्तः । श्रीगणाधिपतये नमः ॥

विवरणम्—श्रीरुद्रमन्त्रन्यासविषयकोऽयं निबन्धः ।

No. 131. रुद्रपद्धतिः । Rudrapaddhatiḥ. Substance, country-made white paper, 10 × 4 inches. Folia, 151. Lines, 1–10 in a page. Character, Nāgara. Date, Saṁvat 1794. Appearance, very old, worn out, and torn in parts. Prose. Not correct. Complete.

A guide to the worship, etc., of Rudra, entitled Rudrapaddhati, by Yājñika Sadāsivadikṣita Kāsidikṣita. The authorities quoted are :- Jāvālopaniṣad, Sūtasaṁhitā, Vāyupurāṇa, Śivapurāṇa, Kālikāpurāṇa, Yamasmṛiti, Śātapasmṛiti, Viṣṇupurāṇa, Kālyāyanasaṁhitā, etc.

At the outset, one reciting the Rudrasūkta is thus praised :—

रुद्राध्यायी वसेत् यत्र ग्रामे वा नगरेऽपि वा ।

न तत्र क्षुत्पिपासाद्या दुर्भिक्षव्याधयोऽपि वा ॥

यः पुनः सततं भक्त्या अभ्यर्च्य शशिशेखरं ।

जपन् ध्यायेत् सदारुद्रं सोऽपि याति परं पदम् ॥

पृथ्वीं ससागरां योहि कृत्स्नां शैलवनान्वितां ।

दद्यात् कांचनसंपूर्णां हैम्यां सर्वगुणान्वितां ॥

अधिकं तु फलं नूनं रुद्रजापात् सकृद्द्विज ॥

किमन्यैर्बहुभिर्मन्त्रैः व्रतैश्च नियमैरपि ।
यज्ञदानैर्जपैर्होमैः (?) वा किं प्रयोजनम् ॥
रुद्रेभ्यस्तु परं नास्ति जपो ध्यानकृतं जपः ॥
यज्ञास्तपांसि दानानि तीर्थानि विविधानि च ।
एतानि रुद्रजापस्य कलां नार्हन्ति षोडशीम् ॥

The Rudrasūkta bears different names according to the number of times it is recited, as given below :—

लघुरुद्रे एकादश, महारुद्रे एकविंशत्युत्तरं शतं, अतिरुद्रे एतदेव एकादशगुणं त्रयोदशशतानि एकत्रिंशच्चैकं अथवा लघुरुद्रे त्रयोदश, महारुद्रे चतुस्त्रिंशदुत्तरं शतं अतिरुद्रे पञ्चषष्ठ्युत्तराणि चतुर्दशशतानि ।

रुद्रस्यैकादशावृत्त्या रुद्रैकादशिनी स्मृता ।
एकादशभिरेताभिर्महारुद्रश्च कथ्यते ।
एकादशमहारुद्रैरतिरुद्र इतीर्यते ॥

आदौ षडङ्गानि एकवारं अनन्तरं नमस्त इत्यादि रुद्राध्यायस्य दश आवृत्तयः ततः पुनः सांगा एकरुपावृत्तिस्तदंते यद्य सोमेत्याद्यष्टकंडिका मन्त्रश्रीजपः । तदनंतरं छयश्चेत्यादि सप्तरुद्रजटाना जपं इयमेकरुद्री एवं यावदभिलषितं जपेत् ।

Colophon. इति श्रीयाज्ञिकसदाशिवदीक्षितकाशिदीक्षितकृता रुद्रपद्धतिः समाप्ता । संवत् १७९४ राम राम

विवरणम्—रुद्रपूजादिविषयको रुद्रपद्धतिनामकोऽयं निबन्धः ।

No. 132. **ललितार्चनचन्द्रिका ।** Lalitārccanacandrikā. Substance, country-made colourless paper, 10 × 4 inches. Folia, 146. Lines, 5-11 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, torn in parts, and written by different hands. Prose. Not correct. Complete.

A guide to the worship of goddess Lalitā, entitled Lalitārccanacandrikā, by Saccidānanda Nātha. Complete in 24 prakāśas or chapters. The authorities quoted are, Bhairavītantra, Yoginihṛidaya, Jnanarṇava, Kulārṇava, Tantraraja, Nāradapañcarātra, Bhaviṣya-

purāṇa, etc. The codex under notice contains upto the end of the seventeenth prakāśa.

Beginning. श्रीगणेशाय नमः ॥ श्रीं नमः श्रीमन्महात्रिपुरसुंदर्यै ॥

शिवं गुरुं गणाधीशं प्रणम्य परदेवतां ।

ललितायाः समेदायाः प्रवक्ष्येऽर्चनचंद्रिकाम् ॥

अथ श्रीमान् साधकेन्द्रः

रात्रिशेषे समुत्थाय कृत्वा वश्यादिकं ततः ।

मानसेन शुचिर्भूत्वा गुरुं ध्यायेच्छिरोपरि ॥

End *of the codex under notice.* एवं निर्माल्यदेवताः संपूज्य वक्ष्यमाणविधिना तदर्घमुद्धास्य शिरसि सहस्रदलकमलकर्णिकामध्यस्थिताय परमशिवात्मने श्रीगुरवे निवेद्य तत्पादुकां शिरः समर्प्य तदाज्ञापुरःसरं तत्पात्रस्थामृतं तत्त्वचतुष्टयेन स्वीकृत्य तदानन्दनिर्भरः श्रीगुरुदेवतानामैक्यं भावयित्वा श्रीपरदेवतायाः श्रीचक्रपूजामारभेत अथवा श्रीचक्रपूजानन्तरं मूलदेव्या सह पञ्चायतनदेवताविसर्ज्जयेत् ।

सच्चिदानन्दनाथेन सहजानन्दचेतसा ।

चन्द्रिकायां प्रणीतायां प्रकाशः सप्तदशोऽगमत् ॥ * ॥

Colophon. इति श्रीसच्चिदानन्दनाथविरचितायां ललितार्चनचन्द्रिकायां आत्मपूजादूतीयजनपंचायतनपूजाप्रकाशो नाम सप्तदशः प्रकाशः समाप्तः ।*

विवरणम्—श्रीसच्चिदानन्दनाथविरचितललितार्चनचन्द्रिकाभिधललितापूजाविषयकोऽयं निबन्धः ।

No. 133. ललितार्चनचन्द्रिका । Lalitārccanacandrikā. Substance, country-made colourless paper, 10 × 4 inches. Folia, 70. Lines, 3–9 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, and torn in parts. Prose. Generally correct. Incomplete (only the last chapter of the work).

This codex contains only the last chapter of the same work.

Colophon. इति सर्व्वागमाचार्य्योत्तमश्रीसच्चिदानन्दनाथविरचितायां (?) ललितार्चनचंद्रिकायां नैमित्तिकपूजाविधानाधिकारनिरूपणं नाम चतुर्विंशतिप्रकाशः समाप्तः ।

श्रीसच्चिदानन्दसुमौद्रवर्य:
शिवप्रसादाधिगतागमार्थ:
निरस्तसंसारिकमोहजालो
नियोगत: श्रीपरदेवताया: ॥
पौत्रे जाते धराख्ये प्रथितकरुणयालंकृत: प्रार्थितश्च
शिष्यै: संसारतप्तै: सकलसुजनकौचन्द्रिकामाततान ।
ख्यातां नाम्ना च लोकेऽत्र नयुतललितानामयुक्ता (?) सुधा
यामाश्रित्याश्रयार्थं देवीपदयुगलमलं प्राप्नुयुर्धाम नित्यम् ।

इति श्रीविद्यापद्धतिश्चमाप्ता ॥ श्रीकृष्णार्पणमस्तु ॥ शुभमस्तु ॥ राम राम

विक्रमशन्तूक्तापूर्णम् ।

No. 134. लक्ष्मीनारायणपटल: । Lakṣmīnārāyaṇapaṭalaḥ. Substance, country-made white paper, 12 × 5 inches. Folia, 30. Lines, 6-9 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, and slightly worm-eaten in parts. Verse. Not correct. Complete.

A portion of the Prapañcasāra of Śaṅkarācāryya, entitled Lakṣmīnārāyaṇapaṭala, treating of the worship of Lakṣmīnārāyaṇa or Nārāyaṇa amalgamated with Lakṣmī in one and the same body.

Beginning. श्रीरामाय नम: ।

अकचटतपयाद्यै: सप्तभिर्वर्णवर्ग-
विरचितमुखबाहा पादमध्यास्यहृत्का ।
सकलजगदधीशा शाश्वता विश्वयोनि:
वितरतु परिशुद्धिं चेतस: शारदा न: ॥ १ ॥
अथाभवन् ब्रह्महरीश्वराख्या:
पुरा प्रधानात् प्रलयावसाने ।
गुणै: प्रभिन्ना जगतोऽस्य सृष्टि-
स्थितिक्षयव्याप्तनिविष्टचेष्टा: ॥ २
अनिष्पत्तिं च ज्ञानं च तं विचिन्त्य समाविशन् ।
तत्कारणमनव्यक्तं अरूपं मायिनं विभुम् ॥ ३ ॥

End.

नेत्रैश चीर्ष्येकपदंशनेष ।
संस्पृष्टमन्नं नियमेन भुक्ता ।
सर्वपवृत्रेन जलं गृहीत्वा ।
प्राश्याम्बतेश्येतदुदीर्य मंत्रं ॥ २२ ॥
उच्छिष्टं किञ्चिन्निनयेत् पृथिव्या ।
उच्छिष्टभागर्थी निनयेत् पितृभ्यः ।
सहाभिरद्भिर्य मदा मुखं च ।
प्रक्षाल्य हस्तावनिज्य पादौ ॥ २३ ॥
आचम्य संधार्य च किंचिदग्निं
स्पृष्टा स्पृशेन्नं नयुगेन नाभिं
अगस्तिरग्निर्वड़वानलश्च
भुक्तं मयान्नं जरयत्वशेषं ॥ २४ ॥
सुखं एतत् परिणामसंभवं
यच्छत्वरोगं मम चास्तु देहे
विष्णुः समस्तेन्द्रियदिव्यदेही
प्रधानभूतो भगवान् यथैकः ॥ २५ ॥
सत्येन तेनान्नमशेषमन्न-
मारोग्यदं मे परिणामसंतु ।
दत्त्वाथ तांबूलमथ द्विजेभ्यो
विदल्यपर्णं स्वयमद्य नाद्यात् ॥ २६ ॥
शिरांसि पर्णस्य न मूलमग्रं
शुष्कं च चूर्णं क्रमिदृष्टपूगं ।
न ब्रह्मचारी विधवा यतिश्च
व्रती व्रताहेषु न पूगमद्यात् ॥ २७ ॥
नयेदहःशेषमथेतिहासैः
कृत्वाथ सायंतनभोजनांतं ।
वटार्कपालाशविभीतपद्म-
प्लक्षस्य पर्णेष्वपि पिप्पलस्य ॥ २८ ॥
एरंडपत्रेषु गृही न चाद्या-
न्न कांस्यपात्रे विधवा यतिश्च ।
प्रदोषयामेन शयीत मंत्री
प्रभातयामेपि तयोश्च मध्ये ॥ २९ ॥

स्वपेत् ग्रयान: स्वगृहे सदा प्राक्-
शिराः प्रवासे पथि पश्चिमास्य: ।
श्वाहृच्चिणास्य: श्वशुरस्य गेहे-
पूदक्शिरास्तो न भवेत् कदाचित् ॥ १० ॥
शय्यामधिष्ठाय शुभं च रात्रि-
मर्त्तां च जप्ता सह भार्य्यया च ।
स्मृत्वा नमस्कृत्य गुरूंश्च भूत्वा
मणाख्यमंत्रस्व जपन् शयीत ॥ ११ ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकश्रीमच्छंकराचार्य्यविरचिते प्रपंचसारे श्रीलक्ष्मीनारायणपटल: ॥ शुभं भूयात् श्रीरामकृष्णाय नम: राम राम राम ।

विवरणम् —श्रीशङ्कराचार्य्यविरचितप्रपञ्चसारान्तर्गतलक्ष्मीनारायणपटलाभिधश्रीलक्ष्मीनारायण-पूजादिविषयकोऽयं निबन्ध: ।

No. 135. ललितार्च्चनविधि: । Lalitārccanavidhiḥ. Substance, country-made colourless paper, 8 × 4 inches. Folia, 14. Lines, 9 in a page. Character, Nagara. Date, ? Appearance, very old, worn out, torn, and writing effaced in parts. Prose. Not correct. Incomplete.

A guide to the worship of goddess Lalitā. Anonymous.

ललितापूजनविषयम् पुस्तकान्तरमिदम् ।

INDEX TO TANTRA MANUSCRIPTS.

The figures against the names of the Manuscripts indicate their serial numbers.

A

DESCRIPTIVE CATALOGUE

OF

SANSKRIT MANUSCRIPTS

IN THE LIBRARY OF THE

CALCUTTA SANSKRIT COLLEGE.

Prepared under the orders of the Government of Bengal.

BY

HṚĪSHIKEŚA ŚĀSTRĪ,

SECOND GRAMMAR PANDIT, SANSKRIT COLLEGIATE SCHOOL.

AND

ŚIVA CHANDRA GUI, M.A., B.L.

LATE PROFESSOR, SANSKRIT COLLEGE

VOLUME VI. KĀVYA MANUSCRIPTS.

CALCUTTA :

PRINTED BY J. N. BANERJEE & SON, BANERJEE PRESS,
119, OLD BOYTAKKHANA BAZAR ROAD.

1903.

काव्यम्।

KĀVYAM.

No. 1. **अमरुशतकम्।** Amaruśatakam. Substance, country-made red paper, 16 × 4 inches. Folia, 7. Lines, 5 in a page. Character, Bengali. Date, ? Appearance, old. Verse. Generally correct. Incomplete.

A collection of one hundred couplets of a miscellaneous character, mostly amatory, by Amaru. The author is held in high esteem, as one of the greatest poets of mediæval times. See Dr. R. Mitra's *Notices*, No. 641.

Beginning. ओं नमो गणेशाय ॥

आ(ज्या ?)कृष्टिवद्धखटकामुखपाणिपृष्ठ-
प्रेङ्खन्नखांशुचयसम्वलितोऽम्बिकाया ।
त्वां पातु मञ्जरितपल्लवकर्णपूर
लोभभ्रमद्भ्रमरविभ्रमभृत् कटाक्षः ॥

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोप्याददानोंऽशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण ।
आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः ॥ २ ॥

आलोलामलकावलिं विलुलितां बिभ्रच्चलत्कुण्डलां
किञ्चिन्मृ(म ?)ष्टविशेषकं तनुतरैः स्वेदाम्भसः शीकरैः ।
तन्व्या यत् सुरतान्तता न्तनयनं वक्त्रं रतिव्यत्यये
work has been recently published by Paṇḍita Ajitanātha Nyāyaratna of Navadvīpa with his own commentary. The codex under notice has neither a beginning nor an end, nor even a complete chapter of the work.

पुस्तकेऽस्मिन् श्रीकृष्णानन्दवाचस्पतिविरचितस्य नाव्यपरिशिष्टापरपर्य्यायस्य चान्तर्व्याकरणस्य कति पत्राणि वर्त्तन्ते ।

No. 96. सारमञ्जरी । Sāramañjarī. Substance, country-made yellow paper, 12 × 4 inches. Folia, 30. Lines, 3–8 in a page. Character, Nāgara. Date, Śaka 1756. Appearance, rather old. Prose. Generally correct. Complete.

A treatise on the philosophy of grammar by Jayakṛiṣṇa Tarkapañcānana. Noticed in the Catalogue of the India Office Library, No. 724, p. 191, under the name of Śabdārthasāramañjarī. It has been published in Bengali type by Sarvesvara Bhaṭṭāchāryya of Navadvīpa.

Beginning. ओं नमो गणेशाय ॥

हेरम्बचरणद्वन्द्वं विघ्ननाशकरं परम् ।
प्रणम्य जयकृष्णेन क्रियते सारमञ्जरी ॥

तत्र प्रथमतः कालत्रयनिरूपणम् । वर्त्तमानध्वंसप्रतियोगित्वमतीतत्वम् । वर्त्तमानप्रागभावप्रतियोगित्वं भविष्यत्त्वम् । स्वावच्छिन्नकालवृत्तित्वं वर्त्तमानत्वम् ॥ अथ लकारादौ शक्तिनिरूपणम् । लटो वर्त्तमानत्वम् । अथ विधिलिङो भविष्यत्त्वं विधिः सम्भावना च । विधिः कर्त्तव्यतोपदेशः । सम्भावना कल्पनम् । लोटो भविष्यत्त्वं । आशीः प्रेरणा च । आशीः शुभचिन्तनं । प्रेरणं प्रवर्त्तनम् । आशिषि लिङो भविष्यत्त्वं आशीश्च । लृट्लृङोर्भविष्यत्त्वं । तव्यानीययोर्भविष्यत्त्वं विधिश्च । लङ्लुङोरतीतत्वं । लिटो वक्तृपरोक्षत्वं अतीतत्वञ्च । लृङोऽतीतत्वं क्रियातिक्रमश्च ।

End. एवमेको ब्राह्मण इत्यत्र जातिपुरस्कारेण ब्राह्मणमात्रोपस्थितौ एकपदं सार्थकं द्वौ ब्राह्मणावित्यत्र द्विपदं द्वित्वबोधाय सार्थकं त्रयो ब्राह्मणा बहवो ब्राह्मणाः पञ्च षडित्यादौ तु बहुवचनेन बहुत्वावच्छिन्नब्राह्मणोपस्थितौ त्र्यादीनान्तु व्यावर्त्तकतया सार्थकत्वमिवेति निष्कर्षः ।

आलोक्य विविधग्रन्थं विचार्य्य च पुनः पुनः ।
कृतेयं जयकृष्णेन शब्दार्थसारमञ्जरी ॥

Colophon. इति जयकृष्णविरचिता शब्दार्थसारमञ्जरी समाप्ता ॥ ० ॥ दुर्गा । ० । दुर्गा । ० । दुर्गा । ० । दुर्गा । ० । दुर्गा दुर्गा । ० । शकाब्दा १७५६ ॥ दुर्गा ॥

विवरणम्—श्रीजयकृष्णतर्कपञ्चाननविरचितशब्दार्थस्वरूपनिर्णयविषयकशब्दार्थसारमञ्जरीनामको निबन्धविशेषः । मुद्रितोऽयं निबन्धो बङ्गाक्षरैः नवद्वीपे सर्व्वेश्वरभट्टाचार्य्येण ।

No. 97. शब्दार्थसारमञ्जरीटीका । Śabdārthasāramañjarīṭīka. Substance, country-made colourless paper, 15 x 3 inches. Folia, 14. Lines, 7-9 in a page. Character, Bengali. Date, ? Appearance, very old. Prose. Generally correct. Incomplete

An explanatory note on a part, entitled Kārakādinirupaṇa, of the abovementioned work, entitled Saṭkārakavivecana, by Bhavānanda Siddhāntavāgīśa.

Beginning. नत्वा श्रीकृष्णचरणं कारकाद्यर्थनिर्णयः ।
श्रीभवानन्दसिद्धान्तवागीशेन वितन्यते ॥

तत्र क्रियानिमित्तं कारकमिति सामान्यलक्षणं । सम्प्रदानादेरनुमतिप्रकाशनद्वारेव तण्डुलादिसम्पादनद्वारा सम्बन्धिनोऽपि पाकादिक्रियानिमित्तत्वेन सम्बन्धिनि चैत्रस्य तण्डुलं पचतीत्यादौ चैत्रादावतिव्याप्तेः । किन्तु विभक्त्यर्थद्वाराक्रियान्वयित्वं मुख्यभाक्तसाधारणं कारकत्वं क्रियानिमित्तत्वसहितं मुख्यमिति स्तोकं पचतीत्यादौ क्रियाविशेषणेऽतिव्याप्तिवारणाय विभक्त्यर्थद्वारा इति चैत्रस्य पचतीत्यादौ चैत्रसम्बन्धित्वं न पाकेऽन्वेति षष्ठ्या नामार्थसाकाङ्क्षतया क्रियायाः क्वापि कर्म्मादिकारकसाकाङ्क्षतया परस्पराकाङ्क्षाविरहात् ।

End. यद्यपि यस्य च भावेन भावलक्षणमिति पाणिनिसूत्रे क्रियायाः सामान्याधिकरण्ये सप्तमीबोधात् नामार्थयोः सामानाधिकरण्ये सप्तमी न युक्ता तथापि गुणकर्म्मान्यत्वे सति सत्तादिव्यभियुक्तप्रयोगदर्शनात् सूत्रे भावपदं धर्म्मपर-

तया व्याख्येयमिति. तत् सङ्गमनीयं यत्र धर्म्मेण धर्म्मान्तर निरूपणस्यानाधिकरण्यं प्रतिपाद्यते तत्र सप्तमीति सूत्रार्थः। यस्य क्रिययाऽन्यस्य क्रियान्तर लक्ष्यते इति व्याख्यातन्तु शाब्दिकाभिप्रायिकम्।

Colophon. इति श्रीमहामहोपाध्यायभवानन्दसिद्धान्तवागीशविरचितं शब्दार्थसारमञ्जर्यां षट्कारकविवेचनं समाप्तम्॥ श्रीहरिनाथदेवशर्म्मणा लिखितमेतत्॥

विवरणम्—महामहोपाध्यायश्रीभवानन्दसिद्धान्तवागीशविरचितः शब्दार्थसारमञ्जर्यः कारकांशटीकारूप. षट्कारकविवेचनाभिधो निबन्धविशेषः।

No. 98. षट्कारकविवेचनम्। Ṣaṭkārakavivecanam. Substance, country-made colourless paper, 14 × 3 inches. Folia, 4. Lines, 8 in a page. Character, Bengali. Date, ? Appearance, old. Prose. Generally correct. Incomplete.

The same work incomplete, having somewhat different reading in the introductory verse, such as—

नत्वा कृष्णपदद्वन्द्वं कारकाद्यर्थनिर्णय.।
श्रीभवानन्दसिद्धान्तवागीशेन प्रकाश्यते॥

विवरणन्तूक्तपूर्व्वम्।

No. 99. शब्दरत्नम्। Śabdaratnam. Substance, country-made yellow paper, 18 × 3 inches. Folia, 5. Lines, 7 in a page. Character, Bengali. Date, ? Appearance, very old. Prose. Generally correct. Complete.

A little work treating of the philosophy of Sanskrit grammar, entitled Śabdaratna, by Srīrāma Śaraṇa, entirely different from the work of the same name, noticed in the Catalogue of the India Office Library, Nos. 651-652, p. 172.

Beginning.

शब्दब्रह्ममयीं नत्वा शब्दशास्त्रं विलोकयन् ।
श्रीरामशरणोवक्ति शब्दरत्नं समासतः ॥

तत्र प्रकृतिप्रत्ययाभ्यामर्थस्य वाचकः शब्दः। शब्दगतो बाहुल्यकादयः। तथाचामरे शास्त्रे शब्दस्तु वाचक इति। स च षोढ़ा भवति।

शक्तो लाक्षणिकी रूढ़ो योगरूढ़श्च यौगिकः ॥
कृचिद्यौगिकरूढ़श्च शब्दः षोढ़ा निगद्यते ॥

इति शब्दशक्तिप्रकाशिका। तत्र शक्यार्थप्रतिपादकः शक्तः। शक्तिश्च शब्दानां मुख्यव्यापारः शब्दनिष्ठो यो मुख्यव्यापारः भगवत्संकेतितोऽस्मा-च्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपः सैव शक्तिरित्यर्थः तद्विशिष्टार्थः शक्यस्तत्प्रतिपादकः शक्तो वाचक इति यावत्। आधुनिकसङ्केतस्तु न शक्तिर्नित्यस्यैव तथात्वात्। तदुक्तं भर्तृहरिणा

आजानिकश्चाधुनिकः सङ्केतो द्विविधो मतः।
नित्य आजानिकस्तत्र या शक्तिरिति गीयते ॥

कादाचित्कस्त्वाधुनिकः शास्त्रकारादिभिः कृत इति। अतएव गोपीनाथ तर्काचार्य्यैरपि साक्षात् संकेतितं योऽर्थमभिधत्ते स वाचकः।

End.

प्रत्येकपदानुभवजन्य-संस्कारैश्चरम-तावद्विषयकस्मरणस्याव्यवधानोत्पत्तेर्नाना-सन्निकर्षैरेकप्रत्यक्षस्येव नानासंस्कारैरेकस्मरणोत्पत्तिसम्भवात् तावत्पदसंस्कार-सहितचरमवर्णज्ञानस्योद्बोधकत्वात् कथमन्यथा नानावर्णैरेकपदस्मरणं परन्तु तावत् पदार्थानां स्मरणादेकदैव खले कपोतन्यायात्तावत् पदार्थानां क्रिया-कर्मभावेनान्वयरूपं शाब्दबोधः भवतीति केचित्। तथाहि

वृद्धा युवानः शिशवः कपोता खले यथाऽमी युगपत् पतन्ति।
तथैव सर्व्वे युगपत् पदार्थाः परस्परेणापि च शाब्दबोधः ॥ भवतीति शेषः।

वृद्धा युवानोऽन्वयिनो भवन्तीति केचित्। परेतु

यद्यदाकाङ्क्षितं योग्यसन्निधानं प्रपद्यते।
तेन तेनान्वितः स्वार्थः पदैरेवाऽवगम्यते ॥

तथाच खण्डवाक्यार्थबोधानन्तरं तथैव पदार्थस्मृत्या महावाक्यार्थबोध इत्याहुः। तात्पर्य्यं वक्तुरिच्छा यदि तात्पर्य्यज्ञानं कारणं न स्यात् तदा सैन्धवमानय इत्यादौ कृचिदश्वस्य कृचिल्लवणस्य बोधो न स्यात्। न च तात्पर्य्यग्राहकप्रकरणादीनामेव शाब्दबोधकारणत्वमस्त्विति वाच्यं तेषामननु-गमात् तात्पर्य्यज्ञानजनकत्वेन तेषामननुगमे तु तात्पर्य्यज्ञानेनैव लाघवात् कारणमिति दिक्‌तम् ॥

Colophon. इति शब्दरत्नं समाप्तम् ॥

विवरणम्—श्रीरामशरणविरचितशब्दरत्नकपादिविवरकशब्दरत्नाभिधोऽयं निबन्धः ।

No. 100. सारमञ्जरी । Sāramañjarī. Substance, country-made yellow paper, 14 x 3 inches. Folia, 25. Lines, 2–7 in a page. Character, Bengali. Date, ? Appearance, old, with different handwritings. Prose. Not correct. Incomplete.

An incomplete copy of the work noticed in No. 96.

विवरणमूक्तपूर्व्वम् ।

No. 101. सम्बन्धोद्देशः । Sambandhoddeśaḥ. Substance, country-made colourless paper, 12 x 5 inches. Folia, 11. Lines, 9–11 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, slightly worm-eaten, and torn in parts. Verse and prose. Not correct. Complete.

A portion of Gaṅgadāsa's Kārikā on case affixes, entitled Sambandhoddeśa, with short explanatory comments.

Beginning. श्रीगणेशाय नमः । श्रीशिवचरणाभ्यां नमः ॥

यस्मिन्नर्थे विधीयन्ते त्यादितद्व्यादितद्धिताः ।
समासो वा भवेद् यत्र स उक्तः प्रथमा ततः ॥

यस्मिन्नर्थे इत्यस्यार्थः । तद्यथा त्यादितद्व्यादितद्धिताः प्रत्ययाः यस्मिन्नर्थे यस्मिन् कारके विधीयन्ते क्रियन्ते स उक्तो भवति तत उक्तत्वात् प्रथमा विभक्तिः स्यात् । यत्र यस्मिन् कारके समासो वा भवेत् स उक्तो भवति तत उक्तत्वात् प्रथमा वेदितव्या । तद् यथा चतुरो भवति वर्द्धते. विष्णुः सेव्यते हरः राजते राजति वा सत्कर्मस्थः । जयति प्रभुः नृपतिः अवगाहते सरसीः नरः कटं करोति कुरुते वा देवदत्तः ।

End. ततः आग्नेयादि विशेषेणानुक्तेऽपि पूजादिक्रियावता विशेष्येणेत्यादि-
त्यादिना कृता च कर्म्मणि विहितेनोक्तकर्म्मत्वतः प्रथमा नाम उक्त-
कर्म्मार्थता द्वितीयापि ॥ ० ॥

उक्तकर्म्मणोक्ततायां क्वचिदुक्तमनुक्तताम् ।
अनुक्तमपि वोक्तं स्यात् क्वचिदेव पदान्तरैः ॥ १६ ॥

॥ ० ॥ ० ॥ श्रीशिव ।

Colophon. इति श्रीचक्रदासकृतौ सम्बन्धोद्देशः समाप्तः ॥

विवरणम्--सम्बन्धोद्देशाभिधः श्रीचक्रदासकृतकारिकाग्रन्थांशविशेषः ।

No. 102. **संस्कृतवल्ली ।** Saṁskṛitavallī. Substance, country-made colourless paper, 10 × 5 inches. Folia, 4. Lines, 11-17 in a page. Character, Bengali. Date, ? Appearance, very old, and worn out. Prose. Not correct. Incomplete.

This codex contains only a small portion of Saṁskṛitavallī, a work on Sanskrit grammar.

एतस्मिन् संस्कृतवल्लीनामग्रन्थस्य संस्कृतव्याकरणविशेषस्य स्वल्पांशो वर्त्तते ।

No. 103. **संक्षिप्तसारटीका गोयीचन्द्रकृता ।** Saṅkṣiptasāraṭīkā-Goyīcandrakṛitā.

This codex contains Goyīcandra's commentary on Saṅkṣiptasāra in six parts of different descriptions, each having separate fol. marks. Noticed in the Catalogue of the India Office Library, No. 816, p. 218.

1st.—Substance, country-made yellowish and red papers, 18 × 6 inches. Folia, 75. Lines, 3-7 in a page. Character, Bengali. Date, ? Appearance, old. Prose. Generally correct. Incomplete (upto the end of the Sandhipāda.)

Beginning. ओं नमः शिवाय ॥

हरिहरहिरण्यगर्भांस्त्वा हेरम्बमम्बिकाञ्च गुरुम् ।
संक्षिप्तसारटीकां गोयीचन्द्रः स्फुटां कुरुते ॥
दोषापसारणपराः पदार्थभेदावधारणप्रवणाः ।
कवयो रवय इवाहो मामनुगृह्णन्तु स्फुरद्रूपाः ॥
बहून् दोषानपि त्यक्त्वा कृत्वाल्पेपि गुणे पदम् ।
सम्भावयन्तु सन्तो मां शिरस्येष कृतोऽञ्जलिः ॥
मुकुरे करिनिकुरम्बप्रतिबिम्बं दृश्यते यद्वत् ।
तद्वद्व्याकरणानां सारमिहाल्पेऽपि दृश्यतां सद्भिः ॥

प्रत्यूहसमूहनिराकरणकारणं नमस्कारमारम्भे विधाय सारासारशास्त्रप्रपञ्च-शास्त्रान्तर दर्शनालसचेतसामिदानीन्तनजनानां प्रवृत्तिकारणं ग्रन्थनामचिर-समयसुरपुरावस्थानहेतवे यशसे च स्वनाम प्रथममयमाचार्य्यो दर्शयति ॥ शिवमित्यादि ।

End. भवान् शेते इति पक्षे द्युततरोऽक्षरणाभावात् शिवचेति चाहिंसो न भवति एवं स्वर्गं तिष्ठति धनमभितिष्ठति दुग्धं याति दुग्धमायाति इत्यादौ वानुस्वारे ॥ ० ॥

Colophon. इत्यौग्रासनिकश्रीगोयीचन्द्रविरचितायां जुमरनन्दिपरिशोधितवृत्तिटीकायां सन्धिपादः समाप्तः ॥ ० ॥

2nd.—Substance, country-made colourless paper, 18 × 4 inches. Folia, 25. Lines, 10–12 in a page. Character, Bengali. Date, ? Appearance, very old, and worn out. Prose. Generally correct. Incomplete.

(Commentary on the Kārakapāda only, but incomplete.)

3rd.—Substance, country-made colourless paper, 18 × 4 inches. Folia, 9. Lines, 8 in a page. Character, Bengali, Date, ? Appearance, very old. Prose. Not correct. Incomplete.

(Only a portion of the commentary on Taddhita).

4th.—Substance, country-made yellow paper, 18 × 4 inches. Folia, 22. Lines, 8 in a page. Character, Bengali. Date, ? Appearance, almost fresh. Prose. Not correct. Incomplete.

(Commentary on Kṛit, incomplete.)

5th.—Substance, country-made colourless paper, 18 × 5 inches. Folia, 40. Lines, 5-11 in a page. Character, Bengali, Date, ? Appearance, very old. Prose Generally correct. Incomplete.

(Commentary on the Kṛidantapāda only.)

6th.—Substance, country-made papers of several colours, 18 × 4 inches. Folia, 67. Lines, 5–7 in a page. Character, Bengali. Date, ? Appearance, not old, Prose Not correct. Incomplete

(On the Suvantapāda only.)

विवरणम्—पुस्तकेऽस्मिन् गोयीचन्द्रकृता संक्षिप्तसारटीका खण्डिता वर्त्तते ।

No. 104. संक्षिप्तसारटीका गोयीचन्द्रविरचिता । Saṁkṣiptasāratikā Goyīcandraviracitā. Substance, country made colourless paper, 18 × 2 inches. Folia, 113. Lines, 5–6 in a page Character, Bengali Date, Śaka × × 16. Appearance, very old, worn out, torn, and writing effaced in parts. Prose. Generally correct Incomplete

This codex contains Goyīcandra's* commentary on the Taddhitapāda only of the Saṁkṣiptasāra.

Beginning. तद्धित इत्यधिकार, पादसमाप्तिं यावत् । नाम इत्यधिकार: समासपादसमाप्तिं यावत् । तद्धितसंज्ञाप्रयोजन रत्नं तद्धित इत्यादि ।

End. चत्विगर्थे विशेषणत्वे अप्रपर्य्यायात् अप्रत्वं अप्रता भवति ॥ ० ॥ ० ० ॥ ० ॥

Colophon. इत्यौत्वासमिका श्रीगोयीचन्द्रविरचितायां जुमरनन्दिविरचित + + + + + + + + + लिखितम् ॥ शुभमस्तु शकाब्दा × × १६ सौर आश्विनस्य चतुर्थदिवसे शुक्रवासरे दिवा + + + + श्रीमहरदेवशर्म्मं + + + + ।

विवरणम्—श्रीगोयीचन्द्रविरचितसंक्षिप्तसारतद्धितपादटीकारूपोऽयं निबन्ध ।

---

* The first two figures of Śaka are written in a new hand and appear just like 10, but forms of the character in which it is written do not appear to be so old.

No. 105. संक्षिप्तसारटीका व्याकरणदीपिका । Saṃkṣiptasāraṭīkā Vyākaraṇadīpikā.

Under this codex we find six fragments of entirely different descriptions, each having separate fol marks.

1st —Substance, yellowish and red paper, 17 × 3 inches. Folia, 55. Lines, 6–9 in a page Character, Bengali Date, Śaka 1729. Appearance, old. Prose. Generally correct. Incomplete.

This contains Vyākaraṇadīpikā only on the first or Sandhipāda.

Beginning. श्री गणेशाय नमः ।

नत्वा श्रीहरिचरणं कृत्वा शरणं पितुः पदञ्च सततम् ।
विमलधियां हितजननी क्रियते व्याकरणदीपिका यत्नात् ॥
कोऽपि न्यायपुराणकाव्यनिचयालङ्कारवैशेषिक-
व्याकारस्मृतिनाटकश्रुतिगुरुर्विद्याविनोदः स्थितः ।
तत्पुत्रस्य विचारनिर्मलमतेः श्रीन्यायपञ्चानन-
स्यात्सुक्तं सुधियो विधाय विमलां शृण्वन्तु वाचं हिताम् ॥
सुगमं निगदन् गम्यते
शिशुभिर्दुर्गममेव तत्त्वतः ।
निरवोचमतः प्रयत्नतः
परिसंगृह्य च हरिसटीकयोः ॥
अनधीत्य शब्दशास्त्रं योऽन्यशास्त्रं समीहते ज्ञातुम् ।
सोऽहं पदानि गणयति निशि तमसि जलेऽचिरप्रजातस्य ॥

सकलशिष्टैकवाक्यतयाऽभिमतकर्मारम्भसमये मङ्गलमाचरन्तीति ग्रन्थारम्भे ग्रन्थकृन्मङ्गलमाचरन् तद्यद्यपि नमस्काररूपतया कर्मैव ग्रन्थे निबन्धुमन्याय्यं तथापि सदाचारपरम्परापरिप्राप्ततया कायवाङ्मनोभिः कृतं सर्वेश्वरत्वादिकृष्णनमस्कारं शिष्यान् शिक्षयितुमादौ निबध्नाति शिवमित्यादि ।

End. सन्धिरेकपदे नित्य इत्यादि यद्यपि सूत्रे नित्यः सन्धिरुक्तस्तथाप्यनुकृतायां सर्वमनुकरणे वेति प्रकृतिभङ्गभयात् क्वचिदसन्धिरपि तेन ते यातिचन्ते इत्यादि नित्यसन्धेर्बाधप्रसिद्धत्वादिकन्योदाहरणं दर्शयति किं भवेनेत्यादि वर्णो सहत्वान्नित्यत्वाच्च वायुपदं वर्गतृतीयाभावः वानरस्यूनत्वात् वायुर्वभावित्यर्थः व्यवस्थितविभाषया शीकाद्यासन्धितस्य च वर्णस्य सन्धिर्न भवत्येव ॥ ॥ ० ॥ ० ॥ ० ॥

Colophon. इति पूर्व्वग्रामिकुलकलानिधिविद्याविनोदात्मजश्रीन्यायपञ्चाननकृतायां व्याकरणदीपिकायां प्रथमः सन्धिपादः समाप्तः ॥ ० ॥ ० ॥ लिपिरियं श्रीहरप्रसाददेवशर्म्मणः पुस्तकञ्च ॥ श्रीश्रीरामः जयरामः श्रीश्रीदुर्गा श्रीश्रीदुर्गा श्रीश्रीदुर्गा श्रीश्रीदुर्गा काली जयति शकाब्दा १७१९ ॥

विवरणम्—पुस्तकेऽस्मिन् न्यायपञ्चाननकृतायाः संक्षिप्तसारटीकायाः व्याकरणदीपिकायाः प्रथमपादमात्रं वर्त्तते ।

2nd.—Substance, country-made colourless paper, 16 × 4 inches. Folia, 147. Lines, 6–8 in a page. Character, Bengali. Date, Bengali era 1145. Appearance, very old, worn out, partly torn, and writing effaced in parts. Prose. Generally correct. Incomplete.

This contains only the second or Tiṅantapāda of the same work.

Beginning. श्रीरामः ॥

कालत्रयमध्ये वर्त्तमानकालस्य पुरोवर्त्तित्वेन मुख्यत्वात् वर्त्तमानकालविहितप्रत्ययं विदधत् शब्देनाख्यातत्वप्रसिद्धान् तानादाय चोपदिश्यन्त इति मत्वाभयन् टन् चणमादावुपन्यस्तवान् ॥

End. तस्य कर्म्मस्थत्वात् कर्त्तरि विधीयमानोऽण् कर्म्मकर्त्तर्य्यपि भवत्येवेति चतिर्देशिकस्य नित्यत्वादिति प्रागेव निरवोचम् ॥ ० ॥

Colophon. इति पूर्व्वग्रामिकुलकलानिधिमहामहोपाध्यायश्रीविद्याविनोदभट्टाचार्य्यात्मजश्रीन्यायपञ्चाननकृतायां व्याकरणदीपिकायां द्वितीयस्तिङन्तः पादः ॥ ओं नमो रामचन्द्राय चक्रपाणये नमः ॥ श्रीगुरवे नमः महामहिमश्रीरामरामन्यायालङ्कारभट्टाचार्य्यस्यान्तेवासिनः राधामाधवशर्म्मणो लिपिरियं कार्त्तिके मासि सिते पक्षे नवम्यां शुक्रवारके समाप्तिमगात् जाता तिङन्त * * ।

यत्नेन लिखितं ग्रन्थं यश्चोरयति मन्दधीः ।
शूकरी तस्य माता च पिता तस्य च गर्द्दभः ॥

सन ११४५ साल श्रीकृष्णाय नमः ॥

विवरणम्—पुस्तकेऽस्मिन् व्याकरणदीपिकाया द्वितीयपादमात्रं वर्त्तते ॥

3rd.—Substance, country-made yellowish paper, 15 × 3 inches. Folia, 44. Lines, 4–12 in a page. Character, Bengali. Date, Śaka 1726. Appearance, not very old. Prose. Generally correct. Incomplete.

This contains only the third or Kṛidantapâda of the same work.

Beginning. ओं नमः शिवाय ॥ तिङन्तं समाप्य कृदन्तं प्रकरणमाचिख्यासुर्षिसौ मन्दमागानां विदधाति सटः ॥

End.

कृत्प्रत्ययादपि यथा तुक् तथैव निरवीचम् ।
क्विप्प्रत्ययदित्येति यच् धनी च वरादयः ॥
पूर्व्वग्राममहाकुले समजनि श्रीन्यायपञ्चाननो
स्वीकृत्य गुरोर्मतं समकरोत् कृट्टिप्पणीं शोभनाम् ॥

Colophon. नास्ति लिपिरियं श्रीचरमज्ञादशर्म्मणः चार्द्दमंशापतते लेखकस्य दोषो न विचारणीयः ॥ तथाच

यथा दृष्टं तथा लिखितं लेखके नास्ति दूषणं ।
भीमस्यापि रणे भङ्गो मुनीनाञ्च मतिभ्रमः ॥
यत्नेन लिखितं पत्रं यश्चोरयति मानवः ।
शूकरी तस्य माता च पिता तस्य च गर्द्दभः ॥

भाद्रमासस्याष्टमदिवा कृदन्तटीप्पनी समाप्ता एवं सौम्यवारे हरौ च शकाब्दा १७२६ ।

विवरणम्—पुस्तकेऽस्मिन् व्याकरणदीपिकायास्तृतीयपादमात्रं वर्त्तते ॥

4th.—Substance, country-made yellowish paper, 15 × 3 inches. Folia, 45. Lines, 6–9 in a page. Character, Bengali. Date, ? Appearance, not fresh. Prose. Generally correct. Incomplete.

This contains only the fifth or Kārakapâda of the same work.

Beginning. ओं नमः गणेशाय ॥

ननु प्रकृतिप्रत्ययादिविभागपरिकल्पनया शब्दशासनं व्याकरणं तन्निरूपणात् कथं क्रियासुख्यप्रधीनकारित्यादिर्व्याकरणत्वं । उच्यते । सुपत्ययविभा-

यथं चकर्ते क्रियाजन्यजनकाण्डिर्जो विना न सम्भवतीति तदेतुत्वात् कर्म्मादिवचनामानपि व्याकरणत्वं यथा नाम इत्यधिकारात् कर्म्मादिसंज्ञा-नामपद नाम च प्रकृतिर्भवत्येव इति न कश्चिद्विरोध: ।

End. भावकर्मणोरिति चतुर्दशानिष्पाद्यपदनियमनमन्तरं सूत्रं चतएव उदा-हरणं उपन्यस्तमित्यात्मने इति क्वचित् पुस्तके दृश्यते तदयुक्तमेव टीकायां श्लोक वार्त्तिक इति पाठो लिपिकरप्रमादकृत. पश्चात्पाठो द्रष्टव्य: श्लोक-वार्त्तिकस्यायं श्लोक, शास्त्रव्यवहारार्थं सूत्रकृता नियम इत्यर्थ: चथवा वार्त्तिकपन्थेऽदिष्टे श्लोकवार्त्तिकलोपचारात् सामानाधिकरण्यमिति ॥ श्रीं ॥

Colophon. इति पूर्व्वयामिकुलकमलनिधिश्रीविद्याविनोदात्मजश्रीन्यायपञ्चाननभट्टाचार्य्य-कृतायां संक्षिप्तसारटीकायां व्याकरणदीपिकायां पञ्चम: कारकपाद.समाप्त ॥ श्रीं नारायणाय नम: ॥ श्रीं गुरवे नम. ॥

विवरणम्—पुस्तकेऽस्मिन् व्याकरणदीपिकाया: पञ्चमपादमात्रं वर्त्तते ॥

5th.—Substance, country-made yellowish paper, 17 × 3 inches. Folia, 61. Lines, 6-8 in a page. Character, Bengali. Date, ? Appearance, rather old. Prose. Generally correct Incomplete.

This contains only the sixth or Suvantapāda of the same work.

Beginning. श्रीं नमो गणेशाय ॥

सुप्प्रत्ययमुक्त्वा तत्कार्य्यार्थं तत्प्रकृतिकार्य्यार्थञ्च षष्ठं सुबन्तपादमारभ-माणो जसादीनां जकारादिप्रसक्तं सर्व्वोपसर्गाधकं सवर्णमात्र लुकि च ।

End. प्रथमं सन्धिकार्य्याभावात् चकृदत्वश्चित्वात् टाभिसेङ्ङसिङ्सामित्यस्य प्रवृत्तौ पश्चात् सवर्णदीर्घ: स्यात् । यथा चकृ यपरत्वाद गोऽन्यैर्निमीऽत: ज्ञाने चविधानावसरे चष्टाभिरिति सावस्य सिद्धिर्न स्यात् ॥ चथ ॥ साष्ट इति सष्टाष्टभिर्वर्त्तमान इत्यर्थ: । साष्टमस्तात् सप्तमीभि: नकारान्ते गुण: ॥०॥

Colophon. इति पूर्व्वयामिकुलकमलनिधिविद्याविनोदात्मजश्रीन्यायपञ्चाननकृतायां व्याक-रणदीपिकायां षष्ठ: सुबन्तपाद: समाप्त: ॥ श्रीं गुरवे नम: ॥ श्रीकालि-कायै नम: ॥ श्रीराम: ।

पचे सिते तथाषाढे पञ्चम्याञ्च शनैश्चरे ।*
आचार्य्येण कृतैवेयं समाप्ता लिखिता सती ॥ ०॥ ०० ॥ ० । ०
० । ० । ० । ० । ० ।

विवरणम्—पुस्तकेऽस्मिन् व्याकरणदीपिकायाः षष्ठसुबन्तपादमात्रं वर्त्तते

6th.—Substance, red and yellowish paper, 15 × 3 inches. Folia, 60. Lines, 4–8 in a page. Character, Bengali. Date, Śaka 1734. Appearance, not fresh. Not correct. Incomplete.

This contains only the seventh or Samāsapāda of the Vyākaraṇadīpikā, a different work by a different author

Beginning. ओं नमो गणेशाय ॥

सुखेन शेरते सन्तः शरणे यत्पदाम्बुजे ।
इन्द्रनीलमणिश्यामं श्रीरामं प्रणमाम्यहम् ॥

॥ तत्समासोऽनेन विधीयते स चानेकस्यैकीकरणमेव । एकस्य तत् कथं सम्भवतु इत्युपात्तस्य सुबन्तेन सहैत्यस्यापेक्षितत्वे हेतुमाह नामाधिकार (: १) विद्यत एवेत्यादि ॥

End. केचित्तु नित्येति प्रमादकृतं चित्तशरणानन्तर मकलशब्द प्रमादपतितः एवं सति चत्वायामदोषो भवतीत्याहुः ।

वत्सः सम्पत्तिदायित्वं मुनेः पञ्चाननस्य च ।
निविष्टाश्रयतो मुक्तिर्नं वंशीवदनाश्रिता ॥ शुभमस्तु ॥

Colophon. इति श्रीवंशीवदनभट्टाचार्य्यविरचितायां व्याकरणदीपिकायां सप्तमः समासपादः ॥ ० ॥ शुभमस्तु शकाब्दा १७३४ । जयती काली ॥ ओं गुरवे नमः ॥

वारे रवेस्तथा मासे श्रावणे सितपक्षके ।
हरप्रसादनाम्नेदं लिखितं पुस्तकं मुदा ॥

० ॥ ० ॥ ० ॥ ० ॥ ०

विवरणम्—पुस्तकेऽस्मिन् वंशीवदन भट्टाचार्य्यकृताया व्याकरणदीपिकायाः समासपादमात्रं वर्त्तते ॥

---

* As no era is mentioned, the exact date cannot be found out from this only.

This work is an exposition of Goyīcandra's commentary on Saṁkṣiptasāra. Noticed in the Catalogue of the India Office Library, No. 830, p. 221. The full name of the author is given in it as Nārāyaṇa Nyāyapañcānana, and that of his father as Vāneśvara Vidyāvinoda. The codex under notice contains the work complete with the exception of Pādas iv and vii; for while iv is wanting, the seventh or Samāsapāda, annexed here as a portion of Nārāyaṇa Nyāyapañcānana's Vyākaraṇadīpikā, is not really so. It is Vaṁśīvadana's exposition of Goyīcandra's commentary, sometimes called by the name of Vyākaraṇadīpikā and sometimes as Vyākaraṇādarśa. Noticed in the Catalogue of the India Office Library, Nos. 823-829, pp. 220-221.

No. 106. **संक्षिप्तसारटीका।** Saṁkṣiptasāraṭīkā. Substance, country-made colourless and reddish papers, 15 × 3 inches. Folia, 108. Lines, 6–8 in a page. Character, Bengali. Date, ? Appearance, very old, worn out, and writing effaced in parts. Prose. Generally correct. Incomplete.

This codex contains Goyīcandra's commentary on the Kāraka and Tiṅantapādas of the Saṁkṣiptasāra, noticed in No. 103, each with separate fol. marks of its own, both incomplete.

पुस्तकेऽस्मिन् संक्षिप्तसारव्याकरणस्य गोयीचन्द्रकृतटीकायाः कारकतिङन्तपादावसम्पूर्णौ विद्येते ।

No. 107. **परिभाषेन्दुशेखरटीका।** Paribhāṣenduśekharaṭīkā. Substance, country-made white and yellow paper, 15 × 5 inches. Folia, 87 (of which foll. 1–4 are wanting). Lines, 9 in a page. Character, Nāgara. Date, ? Appearance, not fresh. Prose. Not correct. Incomplete.

This codex contains a commentary on the **Paribhāṣenduśekhara** of Nāgojī Bhaṭṭa, incomplete.

As the codex under notice has neither a beginning nor an end, nor even a regular colophon, we could not find out the name of the author.

पुस्तकेऽस्मिन् परिभाषेन्दुशेखरस्य काचिदसम्पूर्णा व्याख्या वर्त्तते।

No. 108. सारस्वतटीका। Sārasvataṭīkā. Substance, country-made white paper, 12 x 5 inches. Folia, 125. Lines, 7–8 in a page. Character, Nāgara. Date, ? Appearance, very old. Prose. Not correct. Incomplete (upto the end of the Taddhitaprakaraṇa).

A commentary on the Sārasvataprakriyā, the text of which is given in full throughout, by Puñjarāja, son of Jīvana, and a minister of Gayāsadan (Gaisuddin Khilizi?), ruler of Mālava. Noticed in the Catalogue of the India Office Library, Nos. 801-802, pp. 212-213. The codex under notice is incomplete, containing the commentary upto the end of the first chapter only.

Beginning.

आनन्दैकनिधिं देवमन्तरायतमोरविम्।
दयानिलयनं वन्दे वरदं द्विरदाननम्॥
वाग्देवतायाश्चरणारविन्द-
मानन्दसान्द्रे हृदि संनिधाय।
श्रीपुञ्जराजः कुरुते मनोज्ञां
सारस्वतव्याकरणस्य टीकाम्॥

इह ग्रंथस्य कर्त्ता निरंतरायाभीप्सितार्थसिद्धैय शिष्टाचारप्रतिपालनाय इष्टदेवतानमस्काररूपमंगलाचरणपूर्व्वकं प्रयोगप्रतिपत्तिद्वारा सप्रयोजनं चिकीर्षितं प्रतिजानीते॥

प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये।
सारस्वतीमृजुं कुर्वे प्रक्रियां नातिविस्तराम्॥

End. तयायडौ संख्यायां संख्यावाचकाच्छब्दात् तयायडौ प्रत्ययौ भवतः॥ द्वौ अवयवौ मृदा यस्य द्वितयं त्रितयं महादित्वादीप् द्वितयी त्रितयी चर्म

यथं यस्य लोप इतीकारलोपः । टित्वात् ईप् दयी वयी । अतुल्लयार्थं-माह अंवा निपात्याः कत्यादयः का संख्या येषां ते कति सा संख्या येषां ते तति या संख्या येषां ते यति विंशतिपञ्चत्यादयोऽपि प्रयोगानुसारेण निपात्या इति ॥ ० ॥

Colophon. इति

उर्वीमंडलवयातसाहिझ्लालशौराजेन्द्रचूडामणि-
श्रीमत्साहिजयासदानसचिवः सौजन्यदुग्धोदधिः ।
तत्त्वश्रावधिसाधुजीवनसुतः सारस्वतव्याकृता
वेतस्यामिति तद्धितप्रकरणं श्रीपुञ्जराजोऽभ्यधात् ॥

वंशाखकृताष्टम्यामालिखि श्रीराजारामेण ।

विवरणम्—श्रीपुञ्जराजकृतसारस्वतप्रक्रियाटीकारूपोऽयं निबन्धः पुस्तकेऽस्मिन्नसंपूर्णो वर्त्तते ॥

No. 109. सारस्वतटीका। Sarasvataṭīkā. Substance, country-made white paper, 12 × 5 inches. Folia, 114. Lines, 7–8 in a page. Character, Nāgara. Date, ? Appearance, old. Prose. Not correct. Incomplete.

The latter part of the same work (incomplete.)

Beginning. श्रीगणेशाय नमः ॥

दयावती दीव्यति देवता सा
यया चिरं चेतसि विस्फुरन्त्या ।
सरस्वतीसूत्रविचारणीया-
ममन्दतां विन्दति माहशोऽपि ॥

अथाख्यातप्रक्रिया निरूप्यते अथेति तद्धितसंज्ञकप्रत्ययसन्दर्भनिरूपणान-न्तरं आख्यातसंज्ञकाः प्रत्ययाः आख्यातप्रत्ययाः शाकपार्थिवादिवत् मध्यम-पदलोपीति समासः स्यादिकथनानन्तरं त्यादिनिरूपणावसरे नादिशब्दा-नपहाय प्रथमसथशब्दः प्रयुक्तो मङ्गलार्थतामपि व्यनक्ति ।

End. नास्ति ।

Colophon *at the end of the A'khyâta* आवनिनमांतृसध्यश्रीमता विरचिताया· विद्याधाम्ना पुत्रनाम्ना नृपेण सदृव्याख्यायामन्तसारस्वतस्य व्यक्ताख्यातप्रक्रिया समाप्ता । इत्याख्यातप्रक्रिया ॥

विवरणम्—श्रीपुत्रराजकृतसारस्वतीयाख्यातटीकारूपो निबन्धोऽसम्पूर्णः ।

No. 110. सारस्वताख्यातं । Sārasvatākhyātam. Substance, country-made colourless paper, 10 × 4 inches. Folia, 30. Lines, 10-11 in a page. Character, Nāgara. Date, ? Appearance, old. Verse and prose. Generally correct. Incomplete.

This codex contains only an incomplete portion of the **Ākhyāta** chapter of Sārasvataprakriyā, a grammatical work consisting of the Sūtras of the Sārasvatavyākaraṇa with a commentary or vṛitti on them by Anubhūti Svarūpācāryya in three sections: viz, 1 Suvanta; 2 Ākhyāta, 3 Kṛidanta. Noticed in the Catalogue of the India Office Library, No. 790, p. 210. This work has been published in Bombay, Benares, etc.

Beginning. श्रीगणेशाय नमः ॥

॥ अथाख्यातप्रक्रिया निरूप्यते ॥

॥ धातोः ॥

वक्ष्यमाणाः प्रत्यया धातोर्ज्ञेयाः ॥

॥ भ्वादिः ॥

भू सत्तायामित्यादिर्गणो धातुसंज्ञो भवति ॥ धातुत्वात्तिबादयः । स च त्रिविधः । आत्मनेपदी परस्मैपद्युभयपदी चेति ॥

End. नास्ति ।

Colophon. नास्ति ।

विवरणम्—पुस्तकेऽस्मिन् सारस्वतप्रक्रियाया आख्यातप्रकरणमात्रं खण्डितं वर्तते ।

No. 111. सारस्वतदीपिका । Sārasvatadīpikā. Substance, country-made colourless paper, 12 × 5 inches. Folia, 115, Lines, 15–17 in a page. Character, Nāgara. Date, Saṁvat 1795. Appearance, old, and slightly worm-eaten throughout. Prose. Generally correct. Complete.

A commentary on the Sārasvataprakriyā, entitled Dīpikā, by Candrakīrti Sūri. The name of the work as well as of the author is mentioned in the Catalogue of the India Office Library, No. 803, p. 213.

Beginning. श्रीसरस्वत्यै नम. ।

नमोऽस्तु सर्व्वकल्याणपद्मकाननभास्वते ।
जगच्चितयनाथाय पराय परमात्मने ॥ १ ॥
नम' श्रीगुरवे चारुबुद्धये दत्तसिद्धये ।
मतिप्रदानशीलायै सरस्वत्यै नमोनमः ॥ २ ॥

अथ श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीअनुभूतिस्वरूपो निःशेष विघ्नसंघातशान्त्यर्थं सत्स्वपि दैवेष्वपि ऐहिकामुष्मिकफललिप्सुत्वाच्च फलप्रदानाच्च मानपात्र भगवन्नमस्कृतिपूर्व्वकं सारस्वतीं प्रक्रियां चिकीर्षुः सरस्वतीदत्तवर चादावेव प्रस्तावेन श्लोकमाह । प्रथमयति ।

End.

स्वल्पस्य सिद्धस्य सुबोधिकस्य
सारस्वतव्याकरणस्य टीकाम् ।
सुबोधिकाख्यां रचयाञ्चकार
सूरीश्वरश्रीयुतचन्द्रकीर्त्तिः ॥ ३
स्फुटं समस्तशास्त्रि श्रतमंकमनुष्टभाम् ।
सारस्वतस्य टीकायां ग्रन्थमानमिहोदितम् ॥ ४ ॥

Colophon. इति श्रीमन्नागपुरीयतपागच्छाधीश्वर राजभट्टारकश्रीचन्द्रकीर्त्ति सूरिविर चितायां सारस्वतव्याकरणस्य दीपिकायां संपूर्णा समाप्ता. (?) ॥ श्रीरस्तु कल्याणमस्तु ॥ संव १७९५ वर्षे ।

विवरणम्—श्रीचन्द्रकीर्त्तिसूरिविरचितदीपिकाभिधसारस्वतटीकारूपोऽयं निबन्धः ।

No. 112. **सारस्वतप्रक्रिया ।** Sārasvataprakriyā. Substance, country-made colourless paper, 10 × 4 inches. Folia, 85. Lines, 8 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, and writing effaced in parts. Verse and prose. Generally correct. Incomplete.

Another copy of that part of the Sārasvataprakriyā which has been noticed in No. 110, with the only difference that at the very beginning of this codex we find the following verse :

लक्ष्मीनृसिंहौ प्रणिपत्य काम्यां
बुधाय पद्माकरभट्टमुख्यात् ।
सारस्वतीयां च तिबादिवृत्तिं
क्रमात् लिखेयं गणपप्रसादात् ॥

पुस्तकेऽस्मिन् सारस्वतप्रक्रियाया आख्यातभागमात्रं वर्त्तते ।

No. 113. **सारस्वतप्रक्रिया ।** Sārasvataprakriyā. Substance, country-made white paper, 15 × 6 inches. Folia, 71. Lines, 7 in a page. Character, Nāgara. Date, Saṁvat 1881. Appearance, not old. Verse and prose. Not correct. Incomplete.

This codex contains a portion of Sārasvataprakriyā from the beginning to the end of the Taddhita Prakriyā.

Beginning. श्रीमते रामानुजाय नमः ॥ श्रीसरस्वत्यै नमः ॥

प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये ।
सारस्वतीमृजुं कुर्व्वे प्रक्रियां नातिविस्तराम् ॥ १
इन्द्रादयोऽपि यस्यान्तं न ययुः शब्दवारिधेः ।
प्रक्रियां तस्य कृत्स्नस्य क्षमो वक्तुं नरः कथम् ॥ २

तत्र तावत् संज्ञा संव्यवहाराय संगृह्यते अइउऋऌसमानाः । अनेन प्रत्याहारग्रहणाय वर्णाः परिगण्यन्ते । तेषां समानसंज्ञा च विधीयते ।

End. संख्यायाः प्रकारे धा द्विधा त्रिधा चतुर्धा गुणो वा द्विधा त्रिधा क्रियाया आवृत्तौ कृत्वसः । पञ्चकृत्वः सप्तकृत्वः द्वित्रिभ्यां सुः । द्विस्त्रिं' त्रिस्त्रिं' ।

चक्रस्याभ्यामृयम् ॥ चक्रम: चत्वर: । नवषटी संख्याया: । त्रितयं त्रितयं

द्वयं अयं ॥ अत्राग्रन्थादतिवेलादयी वक्रव्या: अंचाना मेघाकारिका: आंखिका:

•मेघा निपात्या: ॥ कत्यादय: । का संख्या येषां ते कति ।

Colophon. इति तद्धितप्रक्रिया समाप्ता ॥ संवत् १८८१ चैत्र सुदिमावास्यां मंगलवारे

यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया ।

यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥

१॥ । लिखितं मंकरसवचरामानुजदासरामचन्द्रसवाय । श्रीकृष्णाय नम: ॥

॥ ॥ ॥ ॥

पुस्तकेऽस्मिन् सारस्वतप्रक्रियाया: प्रथमतस्तद्धितावधिकोंऽशो वर्त्तते ॥

No. 114. **सारस्वतप्रक्रिया ।** Sārasvataprakriyā. Substance, country-made colourless paper, 12 x 5 inches. Folia, 71 (of which foll. 1-7 are wanting) Lines, 9-10 in a page. Character, Nāgara. Date, Saṁvat 1785. Appearance, very old, worn out, torn, and writing slightly effaced in parts. Verse and prose. Generally correct. Complete, excepting the first eight folia.

Another incomplete copy of the same work.

विवरणमनुक्रमपूर्व्वम् ।

No. 115. **सारस्वतप्रक्रिया ।** Sārasvataprakriyā Substance, country-made colourless paper, 12 x 4 inches. Folia, 53. Lines, 8-2 in a page. Character, Nāgara. Date, ? Appearance, very old. Prose and verse. Generally correct. Incomplete.

This codex contains the Ākhyātaprakriyā only of Sārasvataprakriyā.

विवरणमनुक्रमपूर्व्वम् ।

No. 116. **सारस्वतव्याख्या ।** Sārasvatavyākhyā. Substance, country-made colourless paper, 14 × 5 inches. Folia, 24. Lines, 10 in a page. Character, Nāgara. Date, Saṁvat 1698. Appearance, very old, and worn out. Prose. Not correct. Incomplete.

This codex contains a Hindi explanation of the Sārasvataprakriyā, as well as the original text upto the end of Pañcasandhi only. Anonymous.

Beginning. ॥ छ ॥ ॐ नमः

प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये ।
सारस्वतीमृजुं कुर्वे प्रक्रियां नातिविस्तरां ॥

व्याख्या —

अथ श्लोकस्य अष्टौ पदानि सन्ति । यह श्लोकका आठ पद इहस । कहा । प्रणम्य । परमात्मानं । बालधीवृद्धि । सिद्धये । सारस्वतीं । ऋजुं । कुर्वे प्रक्रियां । नातिविस्तरां । अवेएह । ग्रन्थकर्त्ता इति कथयति ग्रन्थकर्त्ता एहवं कहइ वइ ।

End. सन्ति ।

Colophon. इति स्वरसन्धिः समाप्तः (?) इति पंच संधि बालविबोधा संवत् १६९८ वर्षे फागुण सुदि १ गुरौ ।

विवरणम्—पुस्तकेऽस्मिन् भाषाव्याख्यासहितसारस्वतप्रक्रियायाः पञ्चसन्धिपर्य्यन्तोऽंशोवर्त्तते ॥

No. 117. **सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी ।** Siddhāntakaumudīvyākhyā Tattvabodhinī. Substance, country-made colourless paper, 14 × 5 inches. Folia, 530. Lines, 6–13 in a page. Character, Nāgara. Date, Saṁvat 1837–1878.* Appearance, very old, worn out, slightly worm-eaten throughout, and with different handwritings. Prose. Not correct. Complete.

* We find different dates at the end of different sections, of which the first is 1857 and the last 1878.

This codex contains a copy of the work noticed in No. 28, and is divided into four parts, each having separate fol. marks of its own with different handwritings. The first is in 156 folia, the second in 218 folia, completing the first-half or Pūrvārddha, dated Saṁvat 1857, the third in 89 folia, upto the end of Tinanta, dated Saṁvat 1878, while the fourth is in 60 folia containing the Kṛidanta portion only, dated Saṁvat 1878

विवरणमनुक्तपूर्व्वम् ।

No. 118. सिद्धान्तकौमुदीव्याख्या सुबोधिनी । Siddhāntakaumudī vyākhyā Subodhinī. Substance, country-made colourless paper, 12 × 4 inches, bound like an ordinary book. Folia, 91. Lines, 8-9 in a page. Character, Nāgara. Date, ? Appearance, old Prose. Generally correct. Incomplete.

This codex contains the Tinanta portion only of Subodhinī, a commentary on the Siddhāntakaumudī, by Jayakṛiṣna, son of Raghunātha, and grandson of Govarddhana Bhatta of the Mauli family. Noticed in the Catalogue of the India Office Library, Nos. 658-659, p. 176

Beginning. श्रीगणेशाय नमः ॥

अथात्मनेपदिनः । तत्र अकारान्ताः अव्विकरणाः । अकि लक्षणे । अगि गत्याक्षेपे गतौ गत्यारम्भे च । अट अतिक्रमणहिंसनयोः अतिगतौ । अवि शब्दे । अय अदि गतौ । भाद्यौऽष्टौ ।

End. यज पावयतेति यजेन जविषत् कं मुङ्दमदात्तत्वे सति तत्वमिति । स्वरितोदात्तत्वे पदादाविन्ननेन स्वलिगिति स्वलिगिति कालेगृदमगौ सादिता भतायुपपद्दे यजे क्विप् वचिस्वपीति संप्रसारणं न यियच्चतीति । इस्तंत वर्ज्जितस्य नित्यमपुंसकस्यादिवदातः स्वादिति सूत्रार्थः ।

Colophon. इति श्रीमन्मौलिकुलतिलकायमानश्रीगोवर्द्धनभट्टात्मजरघुनाथात्मजेन जयकृष्णेन कृतायां सिद्धान्तकौमुदीव्याख्यायां सुबोधिन्यां तिङन्तप्रकरणं समाप्तं ॥ शुभमस्तु ॥

विवरणं—सिद्धान्तकौमुदीव्याख्या सुबोधिनी । पुस्तकेऽस्मिन् निबन्धस्यास्य तिङन्तप्रकरणमात्रं वर्त्तते ।

No. 119. **सिद्धान्तकौमुदी पूर्व्वार्द्धः ।** Siddhāntakaumudī Pūrvārddhaḥ. Substance, country made yellow and white paper, 10 x 4 inches. Folia, 248. Lines, 7-10 in a page. Character, Nāgara. Date, ? Appearance, old. Prose. Not correct. Complete.

This codex contains the Pūrvārddha or first half of the well-known grammatical work Siddhāntakaumudī of Bhaṭṭoji Dīkṣita. Noticed in the Catalogue of the India Office Library, Nos. 626-642, pp. 171-173. The complete work has undergone several publications in different parts of India.

Beginning. श्रीगणेशाय नमः ॥ श्रीसीतापतये नमः । अविघ्नं अस्तु ॥

मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च ।
वैयाकरणसिद्धान्तकौमुदीयं विरच्यते ॥ १

अ इ उ ण् ऋ ऌ क् ए ओ ङ् ऐ औ च् ह य व र ट् ल ण् ञ म ङ ण न म् झ भ ञ् घ ढ ध ष् ज ब ग ड द श् ख फ छ ठ थ च ट त व् क प य् श ष स र् ह ल् इति माहेश्वराणि सूत्राणि अणादिसंज्ञार्थानि एषामन्त्या इतः लण् सूत्रे अकारश्च हकारादिष्वकार उच्चारणार्थः ।

End. व्युत्क्रमणं पृथगवस्थानं । इंद्रं व्युत्क्रांताः । स्ववर्णसम्बन्धेन पृथगवस्थिताः । इंद्रं यज्ञपात्राणि प्रयुनक्ति । इंद्रं सङ्कर्षणवासुदेवौ । अभिव्यक्तौ साहचर्य्ये इत्यर्थः ॥ योगविभागादन्यत्रापि इंद्रं दृश्यते ॥ इति द्विरुक्ति प्रक्रिया ॥

Colophon. इति भट्टोजीदीक्षितविरचितायां सिद्धान्तकौमुद्यां पूर्व्वार्द्धः समाप्तः ॥ शुभं भूयात् ॥

विवरणम्—पुस्तकेऽस्मिन् सिद्धान्तकौमुदीनामधेयस्य सुप्रसिद्धवैयाकरणनिबन्धस्य पूर्व्वार्द्धमात्रं वर्त्तते ।

No. 120. **शब्दसिद्धान्तकौस्तुभः ।** Śabdasiddhāntakaustubhaḥ. Substance, country-made white paper, 14 × 6 inches. Folia, 210. Lines, 5-11 in a page. Character, Nāgara. Date, Samvat 1803. Appearance, old, and worn out. Verse and prose. Generally correct. Incomplete.

A grammatical work based on Pāninī's Sūtra arranged after the system of Bhaṭṭojī Dīkṣita, entitled Śabdasiddhāntakaustubha, a different work from the Śabdakaustubha. A commentary on Pāṇinīsūtra noticed in the Catalogue of the India Office Library, No. 607, p. 162. Anonymous. The codex under notice contains a portion of the work from the beginning upto the end of the Samāsa Prakarana

Beginning. ॥ श्रीं नम ॥

देवं प्रणम्य गोविन्द सुवर्णः पाणिनिस्मृतेः ।
तत्प्रीत्यै यत्न ' सृष्टः शब्दसिद्धान्तकौस्तुभ ॥ १

अ इ उ ण्। ऋ लृ क्। ए ओ ङ्। ऐ औ च्। ह य व र ट्। लण्। ञ म ङ ण न म्। झ भ ञ्। घ ढ ध ष्। ज ब ग ड द श्। ख फ छ ठ थ च ट त व्। क प य्। श ष स र्। ह ल्। इमानि माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि। एषामन्त्या इत्संज्ञेत। लण् सूत्रस्थोऽवर्णश्च। हकारादिष्वकार. उच्चारणार्थ. ।

॥ हलन्त्य ॥

हलिति सूत्रेऽन्त्यमित् स्यात् ।

॥ आदिरन्त्येन सहेता ॥

अन्त्येनेता सहित आदिर्मध्यगानां संज्ञा स्यात् स्वस्य चेति हलसंज्ञासिद्धी ॥

॥ हलन्त्यम् ॥

उपदेशेऽन्त्य हलित् स्यात् ॥ आद्योच्चारणमुपदेश । सूत्रे यदृष्ट पदं सूत्रान्तरादनुवर्त्तनीयं । तेन अण् अक् अच् अण् अम् इत्यादि संज्ञासिद्धिः ॥

End. मस्करमस्करिणौ वेणुपरिव्राजकयो, मकरशब्दोऽव्युत्पन्नस्तस्य सुडिति च निपात्यते। वेणिति किं मकरोग्राह मकरी समुद्र. ।

पारस्कर प्रभृतीनि च संज्ञायाम् ।

एतानि नामानि सुट् निपात्यते । पारस्कर. किष्किधा ॥ बृहस्पतिः ॥

महपती' करपत्योश्चोर देवतयोः सुट्तलोपश्च ।

तत्पूर्व्व चलेन दकारोपि बोध्यः ॥

तद्धृतोऽर्धकारतकारौ लुप्येते करपत्योस्तु सुट् । तस्कर: बृहस्पति: । प्रायश्चित्तिश्चित्तयो: । प्रायश्चित्तं प्रायश्चित्ति: । पारस्करादिराकृतिगण: ।

Colophon. इति शब्दसिद्धान्तकौमुद्यां समासप्रक्रिया पूर्णिमगात् ॥ ० ॥ श्री ॥ छ ॥
संवत् १४०३ सुदी पञ्चमी भाद्रपदी ।

विवरणम्—शब्दसिद्धान्तकौमुद्याभिधेय: पाणिनिमूलक: कश्चिद्व्याकरणनिबन्धविशेष: । पुस्तकेऽस्मिन् निबन्धकर्त्तुर्नामादिकं नोल्लिखितम् ।

No. 121. सिद्धान्तचन्द्रिकाटीका सुबोधिनी (पूर्व्वार्द्ध:) Siddhāntacandrikāṭīkā Subodhinī (Pūrvārddhaḥ). Substance, country-made white paper, 16 × 7 inches. Folia, 121. Lines, 8-13 in a page. Character, Nāgara. Date, Saṃvat 1869. Appearance, old. Prose. Generally correct. Complete.

This codex contains only the first half of Subodhinī, a commentary on the Siddhāntacandrikā, a succinct commentary on the Sārasvata Sūtra, by Rāmāśrama. Noticed in the Catalogue of the India Office Library, No. 807, p 215, complete in two Arddhas, the first comprising the Suvanta section; the second, the Ākhyāta and Kṛidanta sections, by Paṇḍita Sadānanda Gaṇijit, a pupil of Śrībhāgacandra Gaṇi Pāṭhaka, a follower of Arhat. In this commentary the text is quoted throughout.

Beginning. ओं श्रीमते भगवज्जिनेन्द्राय नमो नम: ।

पुराणपुरुषं ध्यात्वा मत्वा चार्हं जनायकं ।
सिद्धान्तचन्द्रिकावृत्तिं चकरीमि तथामहम् ॥ १ ॥
विद्यारत्नपयोनिधौ खरतरगच्छाग्रे जगत्पूज्यके
श्रीभट्टारकसत्पदा गुणगणैस्तुल्यो धरन् पुण्यवान् ।
पूज्यश्रीजिनभक्तिसूरिरधिकीर्तर्व्वर्ति विद्यानिधि:
सोऽय श्रीतत्करायते च यशसा नूयीयते तेजसा ॥ २ ॥
श्रीकीर्त्तिरत्नमुख्याख्यो यतीन्द्रीभूत्तरां तत: ।
श्रीमत्सुमतिरत्नाख्य: पाठक: प्रवरस्तत: ॥ ३ ॥

श्रीपाठका: श्रीसुखलाभसंज्ञा
जाग्रत्प्रभावा विलसत्प्रतिज्ञा: ।
तच्छिष्यवर्य्या: कृतिराजिधुर्य्या:
श्रीपाठका: पाठकवारवेन्द्रा: ॥ ४ ॥
श्रीभाग्यचन्द्रागणिसंप्रवर्ज्ञा:
संवेगरंगाङ्गनिमग्नचित्ता: ।
श्रीभक्तिपूर्व्वं विनयं हि येषां
तन्नामधेयं गुरवो वदन्ति ॥ ५ ॥
तेषां हि तेषां विनयप्रधानो
ऽनवद्यविद्याभ्यसनैकतान: ।
प्राज्ञ: सदानन्दगणि: सुशिष्य:
करोति हर्षं सुभगां सुबोधिनीम् ॥ ६ ॥

ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते च मङ्गलमाचरणीयमिति शिष्टाचार: । तत्र मङ्गलं त्रिविधं आशीर्व्वादात्मकं नमस्कारात्मकं वस्तुनिर्देशात्मकञ्चेति । अथ ग्रन्थादौ ग्रन्थकर्त्ता रामाश्रमी नमस्कारात्मकं शिष्यशिक्षार्थे निबध्नाति ।

End.

शेषा निपात्या: कत्यादय: । कत्यादय: शब्दा निपात्यन्ते संख्यापरिमाणे कसंख्येय: प्रश्नस्तत्र वर्त्तमानात् किम् शब्दाद्वा डति प्रत्यय: पक्षे वतु: का संख्या येषां ते डति चेति जसोर्लुक् कति कियन्त: ।

देविका शिंशपादित्यवाड्दीर्घसत्रश्रेयसां पवानां वृद्धौ प्राप्तायादे: स्वरस्यात्वं निपात्यते ञिति णिति च देविकायां भवं दाविकं देविकायां सरयां च भवे दाविकसारवमित्यमर: अण् शिंशपाया विकार: शांशपस्तम्भ: अण् दित्यौह: इदं दात्यौहं वाड्वोवौअसादौ स्वरे इत्यौत्वं निपातनात् अण् दीर्घ: दार्घसत्रे भवं दार्घसत्रम् निपातनादण् श्रेयसि भवं श्रायसं निपातनादण् ॥ ० ॥

श्रीमत् पाठकवर्य्यभक्तिविनयाविख्यातकीर्त्तिप्रभा
राजेन्द्रै: परिपूजिता: सुकृतिन: पुंभावबागर्द्दवता: ।
सन्तारी जगतां पतिं गुणगणैर्विख्यातनामा सन्त्-
संवेगाब्धिकुली जयन्ति सततं षट्शास्त्रविद्याविद: ॥ १ ॥
तेषां शिष्य: सदानन्दसदगुणभूषित: ।
विद्यानन्दविद्याशक्तिं पूर्णार्थेऽकरोदिमाम् ॥ २ ॥

Colophon. इति श्रीसिद्धान्तचन्द्रिकाव्याख्यायां पण्डितप्रवरश्रीसदानन्दगणिविनिर्म्मितायां सुबोधिन्याख्यायां पूर्व्वार्द्धं समाप्तम् संवत् १८६९ । ० । ० । श्रीराधा ।

विवरणम्—सिद्धान्तचन्द्रिकाभिधसारस्वतटीकाव्याख्यारूपः सुबोधिन्याख्योयं निबन्धः श्रीसदानन्दगणिविनिर्विरचितः । पुस्तकेऽस्मिन् निबन्धस्यास्य पूर्व्वार्द्धमात्रं वर्त्तते ।

No. 122. सिद्धान्तचन्द्रिकाटीका सुबोधिनी (उत्तरार्द्धः)। Siddhāntacandrikāṭikā Subodhinī (Uttarārddhaḥ). Substance, country-made white paper, 16 × 7 inches. Folia, 123. Lines, 9–14 in a page. Character, Nāgara. Date, ? Appearance, old. Prose. Generally correct. Complete.

The Uttarārdha or the second-half of the same work.

Beginning श्रीनियमानन्दायनमः ॥

सार्व्वीयं सच्चिदानन्दं नामं नामं जगत्प्रभुम् ।
सिद्धान्तचन्द्रिकाव्याख्यातत्त्विशेक्रियतेतराम् ॥ १ ॥

॥ धातोः ॥

अधिकारोऽयं प्राक् नाम्नो यङ्‌न्तः किमर्थोयमधिकार उच्यते करोकरोति एकोभवति सङ्गायीत्यादित्यादौ कुर्थ्यादितिप्रान्तयोर्धातोः प्राक्प्रयोगस्य नियतत्वेन विशिष्टा प्रत्ययोत्पत्तिर्यथा न स्यात् अन्यथा अद्वितत्वो दीर्घो दुर्व्वारः स्यादित्यधिकारः ।

॥ भ्वादिः ॥

भवनं भूः क्रियासामान्यं आदत्ते याज्यत्यर्थेमित्यादिः अन्तर्भावितण्यर्थः यथा दीयते गृह्यते अर्थोऽनेनेति आङ् पूर्व्वाद्ददातः किप्रत्ययः शब्द इति यावत् भुवः क्रिया सामान्यस्य आदिर्वाचकः शब्दो धातुसंज्ञो भवति एवं सति ढिवक् नाना इत्यादावव्यये बभूव बभूवे इत्यादावाख्याताख्ये आति व्यातिसेवामपि क्रियावाचकत्वात् अतो भ्वादिरित्यावर्त्त्य भूवादियैवेति बहुव्रीहिर्व्याख्येयः अत्रादिशब्दो व्यवस्थायां तेन भूशब्दादारभ्य ये पठितास्ते धातवः तेन क्रियावाचित्वे सति भ्वादिगणपठितत्वं धातुत्वं नामधातूनां च धातुरिति वचनाज्ज्ञातुलं सौत्राश्चनच एव धात्वाः ।

End. भरणधारणपोषणयोः मङ्गलवाक्लालनी एतावित्येके दुला दिवादि पेला-
लालने च लिट् लट् चल कुत्सनयोः लाट् जीवने हलीक् रोदने लज्जायां
च मलीक् पूजायां रेखा श्लाघा सादनयोः इव सपरितापपरिवर्त्तनयोः
तिरस् अन्तर्द्धौ अगदनीरोगत्वे उरस् बलेन तरणगतौ पयस् चलने संभूयस्
प्रभूतभावे मंबर संबर संभरणे ५१ इति कण्ड्वादिगणः १९९१ ।

सिद्धान्तचन्द्रिका वृत्तिराख्येयं सुबोधिनी ।
शिष्याणामुपकाराय सदानन्देन निर्मिता ॥ १ ॥

Colophon. इति श्रीसिद्धान्तचन्द्रिकाव्याख्यायां पण्डितप्रवरश्रीसदानन्दगणिजित् कृतौ सुबोधिन्याख्यायां उत्तरार्द्धं समाप्तम् समाप्तश्चायं ग्रन्थः शुभं भूयात् मङ्गलं भवतु श्रीकृष्णः ।

आनन्दयन्तं नियमैर्जनपार्थीजसन्ततीं ।
सदाकृष्णसुधाकरैर्वन्दे भक्त्या श्रीनिम्बभास्करम् ॥

श्रीकृष्णचन्द्राय नमः । श्रीमतेनिम्बार्काय नमः । श्रीराधाकृष्णाभ्यां नमः ॥

विवरणम्—सिद्धान्तचन्द्रिकाभिध-सारस्वतटीकाव्याख्यारूपः सुबोधिन्याख्योऽयं निबन्धः श्रीसदानन्दगणिजित्विरचितः । पुस्तकेऽस्मिन् निबन्धस्यास्योत्तरार्द्धमात्रं वर्त्तते ।

No. 123. सिद्धान्तचन्द्रिका पूर्व्वार्द्धम् । Siddhāntacandrikā Pūrvārddham. Substance, country-made colourless paper, 12 × 4 inches, Folia, 45. Lines, 7–13 in a page. Character, Nāgara. Date, ? Appearance, very old, and worn out. Verse and prose. Generally correct. Complete.

This codex contains only the first-half or Pūrvārddha of the Siddhāntacandrikā, a succinct commentary on the Sārasvata Vyākaraṇa, by Rāmāśrama, quoting the text throughout. Noticed in the Catalogue of the India Office Library, No. 807, p. 215.

Beginning. श्रीगणेशाय नमः ॥

नमस्कृत्य महेशानं मतं बुद्ध्वा पतञ्जलेः ।
वाणीप्रणीतसूत्राणां कुर्व्वे सिद्धान्तचन्द्रिकाम् ॥ १ ॥

॥ अ इ उ ऋ ऌ समानाः ॥

अनेन क्रमेणैते वर्णा ज्ञेयास्ते च समानसंज्ञाः। नैतेषु सूत्रेषु सन्धिरक्रम- सन्धेयोऽविवक्षितत्वात् विवक्षितन्तु सन्धिर्भवतीति नियमात् ॥

॥ ह्रस्वदीर्घप्लुतभेदाः सवर्णाः ॥

एतेषां ह्रस्वदीर्घप्लुताः सजातीयाः परस्परं सवर्णा भण्यन्ते। ऋवर्णऌवर्णौ च। एकमात्रोह्रस्वः। द्विमात्रोदीर्घः। त्रिमात्रः प्लुतः। ए ऐ ओ औ सन्ध्यक्षराणि।

॥ उभये स्वराः ॥

अकारादय एकारादयश्च ह्रस्वदीर्घप्लुतभेदाः स्वरा उच्यन्ते।

End. कर्म यज्ञपापानि प्रयुनक्ति। कर्म सकर्मकाकर्मकौ। अभिव्यक्तौ क्रिया- अर्थ इत्यर्थः। चार्थे कर्म इति निपातनात्। पुंस्त्वमपि एषां निपात्यम्। कत्यादयः का संख्या येषां ते कति। द्विविधः। ओंमपः। द्वात्रिंशः द्वार्च- सवः अायसः। क क क क क क क क।

Colophon. इति श्रीरामचन्द्राश्रमाचार्यविरचितायां सिद्धान्तचन्द्रिकायां पूर्वार्द्धे समाप्तम् शुभमस्तु संवत् (?) क श्री० श्री० श्री० श्री० श्री० श्री।

विवरणम्—श्रीरामाश्रमाचार्यविरचितः सिद्धान्तचन्द्रिकाभिधः सारस्वतटीकारूपोऽयं निबन्धः।

No. 124. सिद्धान्तचन्द्रिका। Siddhāntacandrikā. Substance, country-made colourless paper, 12 × 5 inches. Folia, 65. Lines, 7-10 in a page. Character, Nāgara, Date, Saṁvat 1756. Appearance, very old, worn out, and torn in parts. Verse and prose. Generally correct. Complete.

A complete copy of the same work.

End. ॥ पौनःपुन्ये णम् पदं द्विश्च ॥

समानकर्तृकेषु धातुषु पूर्वकाले धातोर्णम् णमन्तस्य पदस्य द्विर्वचनं पार्य पार्य गच्छति। भोजं भोजं कारं कारं गामं गामं गमं गमं कर्ण कर्ण लाभं लाभं कथमादिषु स्वार्थे क्रमीणम्। कथंकारं अन्यथाकारं एवंकारं इत्थं- कारं पठति। एवं पठतीत्यर्थः।

अग्रेप्रथम पूर्वेषूपपदेषु क्त्वा णमौ वा। अग्रे भोजं व्रजति अग्रे भुक्त्वा पूर्वं भोजं पूर्वं भुक्त्वा। पश्चे अग्रे भुक्त्वा ततो व्रजति। आभीक्ष्ण्ये तु पूर्ववत् नित्यमेव णम् ॥

॥ वर्णात् कार: ॥ अकार: ककार: ।
॥ रादिफो वा ॥ रेफ: । रकार: ॥
॥ लोकाच्छेषस्य सिद्धिर्यथा मातरादि: ॥

Colophon. इति रामाश्रमविरचिता सिद्धान्तचन्द्रिका समाप्ता शुभमस्तु इदं पुस्तकं रामेश्वरमिश्रकै माधवद्विवेदी लिखितराजाखिलक सम्वत् १७५६ मार्गहन सुदि दशम ।

विवरणम्—पुस्तकेऽस्मिन् सिद्धान्तचन्द्रिका सम्पूर्णा वर्त्तते ।

No. 125. **सुपद्मव्याकरणम् ।** Supadmavyākaraṇam. Substance, country-made colourless paper, 13 × 3 inches. Folia, 213 (of which foll. 1-13 are torn, spoiled, and entirely useless). Lines, 4–6 in a page. Character, Bengali. Date, Śaka 1591. Appearance, very old, worn out, torn, and writing effaced in most parts. Verse and prose. Generally correct. Complete.

A Sanskrit grammar in aphorisms with brief explanations, based on Pāṇini's sūtras, complete in five adhyāyas or chapters, each containing four Pādas. The first adhyāya treats of Saṃjñās and Sandhis, the second of Ṣatva, Ṇatva, Kāraka and Vibhaktis (case-affixes), the third of conjugation of roots, the fourth of Kṛit and Samāsa, and the fifth of Taddhitas, by Padmanābhadatta, a Maithila Brāhmaṇa, descendant of a Vararuci. According to Dr. R. Mitra, Padmanābhadatta was an up-country scholar settled in Bengal. From his citations from Ujjvaladatta and Medinikara he appears to have lived after the fifteenth century, A. D. The work has undergone two different editions in Bengal, one in Nāgara character, by Paṇḍita Hṛiṣikeśa Śāstrī, and the other in Bengali type, by Trailokyanātha Kāvyatīrtha. The study of this work is chiefly confined to districts of Jessore and Khulna and to Bhatpara in 24 Perganas. The work has several commentaries on it of which the Makaranda of Viṣṇumiśra is the best. The author has given the following list of his works in his Paribhāṣā, a different work :—Supadmavyākaraṇa, Pañjikā,

or a short commentary on it, Prayogadīpikā, Uṇādivṛitti, Dhātukaumudī, Yañlugvṛitti, Paribhāṣā, Gopālacarita, a kāvya, Ānandalaharīṭīkā, Chandoratna, a work on Prosody, and Ācāracandrikā in Smṛiti. In his Uṇādivṛitti we find names of his ancestors upto the third generation, Dāmodara Bhaṭṭa being his father, and Śrīdatta his grandfather. Noticed in the Catalogue of the India Office Library, No. 883, p. 242, and also in the Catalogue of Sanskrit Mss. in the Library of the Asiatic Society of Bengal, part I. No. 427, p. 158.

Beginning. Torn and not legible.

End. ॥ निष्कुलान्निष्कोषणे ॥

अन्तर्बहिर्निष्करणे डाच स्यात् । निष्कुला कुरुते सा तिक्तं ।

॥ सत्यादशपथे ॥

डाच् स्यात् ॥ सत्या करोति निश्चिनोतीत्यर्थः । शपथे तु सत्यं करोति रिपुः ।

॥ शूलात्पाके ॥ डाच् स्यात् । शूला करोति मांसं ॥

॥ दुःखात् प्रातिकूल्ये ॥ दुःखाकरोति कुपुत्रः ॥

॥ सुखप्रियादानुकूल्ये ॥

डाच् स्यात् ॥ मतामृतं सुखाभव ॥

प्रियाकरोति सखि कान्तमुखाजका प्रियाकरोति सुपुत्रः ॥

॥ वदाद्यव्ययम् ॥

Colophon. इति श्रीपद्मनाभदत्तकृतौ सुपद्मे व्याकरणे पञ्चमोऽध्यायः ॥ ० ॥

श्रीरस्तु मयि लेखके ॥ शुभमस्तु शकाब्दाः १५९१ ॥ श्रीरामनन्ददेवशर्मणः

पुस्तकमिदं स्वाक्षरञ्च ॥ श्री नमः सरस्वत्यै ॥

विवरणम्—पद्मनाभदत्तविरचितः सुपद्माभिधो व्याकरणनिबन्धोऽयं सुप्रसिद्ध एव ।

No. 126. सुपद्मव्याकरणम् । Supadmavyākaraṇam. **Substance,** country-made colourless and yellow paper, 17 × 4 inches. **Folia, 229** (of which foll. 1-138 are too old, but the rest are fresh, most probably they were lately copied). **Lines,** 6–9 in a page. **Character, Bengali.**

Date, ? Appearance, partly very old and decayed, and partly fresh, with different handwritings. Verse and prose. Generally correct. Complete.

Another complete copy of the same work.

Beginning. ओँ नमोगणेशाय ॥

प्रणम्य परमं देवं देवीं वाचमथोन् गुरून् ।

पद्मनाभः स्फुटं पूर्णं भाषायामाह लक्षणम् ॥

अथ विवरणञ्च तस्य शब्दानुशासनेन पाणिनीयादिशब्दस्मृतीकपलस्य सौकर्य्योपाधये प्रतिसंस्कृतस्य शब्दलक्षणस्य तत्रादौ वर्णोपदेशः शास्त्रप्रयोगाय ।

। अ इ उ ऋ ऌ ए ओ ऐ औ ह ॥

॥ आदिरिन्त्येन सहेता ॥

आदिर्वर्णोऽन्त्येन इता अकारादिना इत संज्ञकेन सह तन्मध्यगानां समध्यौ वाच्यौ भवति । अणित्युक्ते अकारइकारउकारा गृह्येरन् नकारादीनां प्रत्याहारार्थमुच्चारणं । एवमन्ये च प्रत्याहाराः । अण् इण् अक् इक् उक् ऋक् एङ् अच् इच् एच् ऐच् इत्यमीएकादश । अपरे च नामोपदिष्टा द्वादश ।

॥ अचोऽन्ये हल् ॥

अचोऽन्ये वर्णा हलसंज्ञका भवन्ति । कादयोहलान्ता ॥

End. See the preceeding No.

Colophon. See the preceeding No.

विवरणन्तूक्तपूर्व्वम् ।

No. 127. उपसर्गवृत्तिः । Upasargavrittiḥ. Substance, country-made colourless paper, 12 × 2½ inches. Folia, 5. Lines, 3–5 in a page. Character, Bengali. Date, Bengali era, 907. Appearance, very old, worn out, and writing slightly effaced throughout. Verse. Generally correct. Complete.

A little work treating of Sanskrit prefixes or Upasargas in verse,

entitled Upasargavritti, by Bharatamallika, the famous commentator of Mugdhabodha, Raghuvaṁsa, &c.

Beginning. ओँ नमो दुर्गायै ॥

पार्व्वतीशङ्करौ नत्वा बालानामुपकारिका ।
भरतेनोपसर्गाणां वृत्तिः स्वल्पा विधीयते ॥
प्रपरापसमन्ववान् निर्दुर्व्यभिपरिप्रति ।
अतिप्रत्यपाङुत सकपसर्गाश्रया क्रमी ॥
धातवः स्युरनेकार्थास्तेषामर्थो हि केवलम् ।
No. 16. गोलाधिकारः। Golādhikāraḥ. Substance, country-made white paper, 12 × 5 inches. Folia, 22. Lines, 5-9 in a page. Character, Nāgara. Date, ? Appearance, rather old, and slightly worm-eaten in parts. Verse. Not correct. Incomplete.

A work treating of the Gola or spheric in Āryā metre, entitled Golādhikāra, by Āryya Bhaṭṭa. The codex under notice has neither a beginning nor an end, but only a few folia on the eclipse of the moon.

Beginning. नास्ति।

End. नास्ति।

Colophon. इत्यार्यभट्टाख्ये महासिद्धान्ते गोलाध्यायाधिकारश्चतुर्दशः।

विवरणम्—पुस्तकेऽस्मिन् श्रीमदार्यभट्टकृतस्य गोलाध्यायस्य कति खण्डितानि पत्राणि सन्ति।

No. 17. जयविनोदसारणी। Jayavinodasāraṇī. Substance, foolscap paper, 14 × 8 inches, bound in the form of a book. Folia, 19. Lines, 15-35 in a page. Character, Nāgara. Date, ? Appearance, not old. Mathematical figures. Incomplete.

A table to calculate lunar days, etc,. in order to prepare an almanac, entitled Jayavinodasāraṇī or a table prepared under the auspices of Mahārāja Jayasiṁha of Jayapur. This codex contains tables for the calculation of Tithis, Nakṣatras and Yogas only. Anonymous.

No. 18. **वर्षतन्त्रम् वा वर्षफलम् ।** Varṣatan tram or Varṣaphalam. Substance, country-made white paper, 12 × 5 inches. Folia, 36. Lines, 7–8 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, torn, and worm-eaten throughout. Verse. Not correct. Incomplete.

An astrological work for the preparation of horoscopes, entitled Varṣatantra or Varṣaphalā, by Nīlakaṇṭha, the famous author of the Tājika. It is in fact an extract of his Tājika made at the request of one Śiva, who is qualified with only the epithet *vidvat*, the learned.

Beginning. श्रीगणेशाय नमः ॥

स्वस्वाभिलाषं न हि लब्धुमीशा
निर्विघ्नमीशानमुखाः सुरेशाः ।
विना प्रसादं किल यस्य नौमि
तं ढुंढिराजं मतिलाभहेतोः ॥ १ ॥
जातकोदित दशाफलं यतः
स्थूलकालफलदं स्फुट नृणाम् ।
तत्र न स्फुरति दैवविन्मति
स्तद्ब्रुवेऽब्दफलमादितांजिकात् ॥ २ ॥
गताः समाः पादयुताः
प्रकृति २१घ्न समागणात् ।
खवेदाप्तघटीयुक्ता
जन्मवारादि संयुताः ॥ ३ ॥
अब्द प्रवेशे वारादि सत
तद्ये (?) विनिर्दिशेत्
शिवा ११घ्नोन्दः खखाद्रौ दु १२०
लब्धांशः खाग्नि ३० शोधितः ॥ ४ ॥

End. नास्ति ।

Colophon. इति भावस्य यद्फलम् ।

At the end of each chapter occur verses to the following effect.

गर्गान्वयभूषणं गौर्वितविद्विन्नामविसन्नसुती
ऽनन्तीनन्तमतिर्व्यधात् खलमतध्वस्त्यै जनुःपद्धतिम् ।
तत् सुनुः खलु नीलकण्ठ विबुधोविद्वच्चिदानुज्ञया
भावस्य ग्रहपद्धतीष्टसुखतानुक्तं फलं सौष्ठभात् ॥

विवरणम् — श्रीनीलकण्ठकृतजन्मपद्धतिविषयकोऽयं निबन्धः ।

No. 19. जातककर्म्मपद्धतिः । Yātakakarmapaddhatiḥ. Substance, country-made white paper, 12 × 5 inches. Folia, 17. Lines, 3–7 in a page. Character, Nagara. Date, 1737 Śaka. Appearance, not old. Verse. Generally correct. Complete.

A manual for preparing horoscopes, and foretelling the fate of a person by it, entitled Jātakarmapaddhati or Śrīpatipaddhati, complete in eight chapters, by Śrīpati Bhaṭṭa. Noticed in Dr. R. Mitra's Bikanēr Catalogue, No. 733, p. 338.

Beginning. श्रीमद्गणपतये नमः ॥

नत्वा तां श्रुतिदेवतां विसमयज्ञानीहृतेः कारणं
तत् पादाम्बुजप्रसादविकसद्धीधो बुधः श्रीपतिः ।
शिष्यप्रार्थनया विचार्य्य सकलान् होरागमार्थान् मुहु-
र्वक्ष्ये जातककर्म्मपद्धतिमहं होराविदां प्रीतये ॥ १ ॥
श्रेयोऽत्र प्रथमं हि जन्मसमयच्छायादियन्त्रैः स्फुटं
तत्कालप्रभवाविलग्नसहिताः कार्य्यास्तत्र ग्रहाः ।
सिद्धान्तोक्तपरिस्फुटीकरणैस्ते चासकृत् कर्म्मणा
भावाः खेटदृशो बलानि च ततस्तेषां विचिन्त्यानि षट् ॥ २ ॥
मध्याह्नांशुमतोर्ध्व एव विवरे कालः स उन्नोनतः
सोऽप्यथापि परिच्युतोरविनिशामध्यान्तरे चोन्नतः
मध्याह्नात् पतिते तु वासरगते स्यात् प्राक्कपालेन तं ।
यातेऽप्युदयोमिते पुनरिदं प्रत्यक्कपाले भवेत् ॥ ३ ॥
रात्रेः शेषे गते वा भवति हि समये जन्म चेतद्घटीभिः
संयुक्ते वासरार्द्धे खलु नतघटिकाः प्राक् प्रतीचोन्नतेषु ।

संख्याप्येति लग्नट् क्रुटखवितुरत: स्त्रीदरेरिष्टकाणा-
लग्नं कुर्यात् सषड्कं तदपि सुगवकैरसलग्नं निरुक्तम् ॥ ४ ॥

End.

स्त्रीणामुक्तं जातके यच पुंव-
च्छायाचन्द्राद्योर्यीगात् प्रकल्प्य ।
योगात् तां यत् शुभं वाशुभं वा
तन्निःशेषं कल्पयेत् खेटयोर्व्यात् ॥ ८ ॥
नैर्व्याणि काये गदितास योगा:
स्थितिं तेषामिह भावहृष्टा ।
विज्ञाय धीमान् ग्रहयोगजातं
निर्णीयमर्थिन् परिकल्पयेत्त ॥ ९ ॥
कण्टकादि परिभाषयानया
प्रोक्तया र्दशभावजातक: ।
जातकोदितफलस्य निश्चितं
प्रत्ययोभवति धीमतामिह ॥ १० ॥
इति जातककर्मपद्धतिं
गुरुपादाब्जयुगप्रसादत: ।
वर शिष्यजनप्रबोधनीं
कृतवान् श्रीपतिरप्रजायणी: ॥ ११ ॥
अध्यायानामष्टके वृत्तसंख्या
संजाता स्यात् षट्विचन्द्रप्रमाणा ।
प्रोक्तानुष्टुप्छन्दसा वृत्तसंख्या
श्लोकैर्नैकैर्माख्यया वक्ष्यत्या २०१॥१२
न वेत्ति यो जातककर्मपद्धतिं
तद्ब्रह्मसिद्धान्तभवामपि यत्नात् ।
यात्राविवाहादिषु कालसूचको
न योग्य मत्यु: खलु तत्स्वरूपधृक् ॥ १३ ॥

Colophon. इति श्रीश्रीपतिभट्टविरचितायां जातककर्मपद्धतौ प्रकीर्णकाध्यायोऽष्टम: ।
श्रीरस्तु

नगाग्निनगचन्द्रेऽब्दे
मार्गकृष्णाष्टिके तिथौ ।

पद्दति अनुपी व्यास:
सदानन्दी खिलिख वे ॥

शुभमस्तु । श्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्री ।

विवरणम्— श्रीश्रीपतिभट्टविरचितजातककर्म्मपद्धतिनामक जन्मपत्रिकानिर्म्माणोपयोगिनिबन्ध-
विशेष: ॥

No. 20. जातकपत्रिकाविवरणम् । Jātakapatrikāvivaraṇam. Substance, country-made colourless paper, 14 × 6 inches. Folia, 41 (of which fol. 3 is wanting). Lines, 10–13 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, torn, and worm-eaten throughout. Verse. Not correct. Incomplete.

A manual containing directions for the preparation of horoscopes, entitled Jātakapatrikāvivaraṇam, by Vāmaṇa. The subjects treated of in this work are enumerated in the introductory verses.

Beginning. ओं नमोगणेशाय ॥

प्रणम्य विश्वजननीं त्रिपुरां सर्व्वसिद्धिदाम् ।
वच्मि सयुक्ति युगजन्मपत्रिका + + + + ॥ १ ॥
ज्ञात्वादौ जन्मसमयं तत्कालात्कालिकान् ग्रहान् ।
पश्चाज्ज्ञात्वा जन्मलग्नमिति स्पष्टं च साधयेत् ॥ २ ॥
मानं + + + + साध्यं नतमुन्नतमेव च ।
भावचक्रं भावगतान् ग्रहान् सञ्चिन्तयेदथ ॥ ३ ॥
सप्तवर्ग्गं सलग्नानां ग्रहाणामुच्चलाघवं ।
इष्टकष्टविचारोऽथ विचारोरिष्टभङ्गयो: ॥ ४ ॥
आयुर्द्दायस्तत: साध्योऽष्टकवर्गोंद्भवग्रहाम् ।
दशाक्रमोन्तर्द्दशाया: क्रम: फलदशाक्रम: ॥ ५ ॥
शुभकष्टदशायाश्च विचारं चिन्तयेत् तत: ।
भावस्थानां लोकयोगाद्भावानां चिन्तयेत्फलम् ॥ ६ ॥
एतत् सर्व्वं परिज्ञाय पट्टे लेख्या च पत्रिका ।
तत्रादौ जन्मसमयं परिज्ञानमिहोच्यते ॥ ७ ॥

End. नास्ति ।

Colophon. इति गुरुदशा उत्तीर्णा । इति शनिदशा उत्तीर्णा &c. &c

विवरणम् । जन्मपत्रविचारविषयकोऽयं निबन्धः ।

No. 21. जातकावली । Jātakāvalī. Substance, country-made white paper, 12 × 5 inches. Folia, 9. Lines, 2–9 in a page. Character, Nāgara. Date, ? Appearance, not old. Verse. Not correct. Incomplete.

A treatise on horoscopy, entitled Jātakāvalī. Anonymous.

Beginning. श्रीगणेशाय नमः ।

अथ प्रसूतिकाध्यायः ।

मीने मेषे वृषे प्रोक्ता चत्वारी वृषकुम्भयोः ।
मकरे मिथुने तिस्रः सप्त वृश्चिककर्कटे ॥ १ ॥
तुले कार्म्मुककन्यायां सूतिका पञ्च विद्यते ।
सिंहे चैव भवेत् चौषि जन्मकाले विलोकयेत् ॥ २ ॥

End. नास्ति ।

Colophon. इति राज्ययोगः ।

विवरणम् — अयमपि निबन्धो जन्मःकालीनलग्नादिविचारविषयकोऽयंनिबन्धः ।

No. 22. जातकाभरणम् । Jātakābharaṇam. Substance, country-made colourless paper, 12 × 4 inches. Folia, 105. Lines, 8–10 in a page. Character, Nāgara, Date, ? Appearance, very old, worn out, and torn in parts. Verse. Not correct. Incomplete.

A work containing a dissertation on the future prospects of children from the astral conjunctions at their natal hour, entitled Jātakābharaṇa, by Śrīdhuṇḍirāja. Noticed in the India Office

Catalogue, No. 3075, p. 1037 B. Also in die Handschriften-verzeichnisseder Königlichen Bibliothek, No. 866 (Chambers 280), p. 259. See also Dr. R. Mitra's Bikaner Catalogue, No. 643, p. 299.

Beginning. श्रीगणेशाय नमः ॥ श्रीत्रिपुरायै नमः ॥

श्रीदं सदर्चिं हृदयारविन्दे
पादारविन्दं परमस्य वन्दे ।
मन्दोपि यस्य स्मरणेन सद्यो
गीर्वाणवन्द्योपमतां समेति ॥ १ ॥
उदारधीमन्दरभूधरेण
प्रमथ्य ज्योतिर्गमसिन्धुराजम् ।
श्रीढुण्ढिराजः कृतवं किलार्य्या
मार्य्यासपर्य्याममलोक्तिरत्नैः ॥ २ ॥
ज्ञानराजगुरुपादपङ्कजं
मानसे स्वलु विचिन्त्य भक्तितः ।
जातकाभरणनाम जातकं
जातकज्ञसुखदं विधीयते ॥ ३ ॥
शास्त्रोक्ता यो जन्मपत्रीं करोति
नानाग्रन्थालोकनात् तस्य चित्तम् ।
प्रत्युद्विग्नं स्यात् ततो जातकेऽस्मिन्
कुर्व्वे व्यक्तां जातकोक्तिं च सर्व्वाम् ॥ ४ ॥
विचित्रपत्रीकरणादराणां
श्रमं विनायुक्तविलेखनार्थं ।
समर्थमेतत् प्रकटार्थमेवा-
त्यर्थं ततो नाम यथार्थमस्य ॥ ५ ॥
सन्मङ्गलाशीर्वचनान्वितानि
पद्यानि चाद्ये समुदाक्रियन्ते ।
तान्येव पत्रीकरणप्रवीणाः
श्रेयस्कराणि प्रथमं लिखन्तु ॥ ६ ॥
गुण्डामण्डल संप्रसारकलनैर्मौलीस्थलान्दोलनै
र्नेत्रोन्मीलनमीलनैरविरलश्रीकर्णतालक्रमैः ।
दानालिध्वनितैर्विलासरचितैर्दुर्गाननीपार्ज्जिते
+ + मेदभरः करीन्द्रवदनो वः श्रेयसे कल्पताम् ॥ ७ ॥

According to Sanskrit Astronomy the years are divided into groups of sixty, each year having a peculiar name of its own, such as Prabhava, Vibhava, Śukla, etc. This work treats first of all of the effects of birth in each of these years, such as—

सम्वत्सरफलम् ।

सर्व्ववस्तु परिसंचयेरत:
पुत्रसन्ततिरतीव सन्मति: ।
सर्व्वभोगयुतदीर्घजीवितो
जायते प्रभवसम्भव: पुमान् ॥
उत्पन्नभोक्ता प्रियदर्शनश्च
वस्त्राधिशाली चतुर: कलासु ।
राजा भवेदात्मकुलं सुशीलं
विद्वान् मनुष्यो विभवाब्दजन्मा ॥
सदा सुवर्णाचितसमुदार: (?)
सपुत्रदारैर्विभवै: समेत: ।
सद्भाग्यविद्याविनयोपपन्नो
नूनं पुमान् शुक्लसमुद्भव: स्यात् ॥
दातासुमानन्दयुतोऽतिकान्त:
सत्येन नित्यं सहितोगुणी स्यात् ।
दक्षश्च धूर्त: परकार्य्यकर्त्ता
प्रमोदजन्मा मनुजोऽभिमानी ॥

Afterwards the effects of birth in each of the Ayaṇas and Ṛitus are shown respectively, thus—

शश्वत्प्रसन्नो जनुषा तु कान्ता—
सन्तोषयुक्तोऽतितरां चिरायु: ।
नर: सदाचारपरोत्युदारो
धीरश्च सौम्यायनजातजन्मा ॥ &c

Then the effects caused by a month are thus mentioned—

सत्कर्म्मविद्याविनयोपपन्नो
भोगी नर: स्यान्मधुरान्नभोक्ता ।
सत्पात्रभिक्षागुरतश्च मन्त्री
चैत्रोद्भवश्चापि विचित्रवस्त्र: ॥

सुलक्षणः पुण्यगुणानुगामी
पुमान् बलीयान् द्विजदेवभक्तः ।
कामी चिरायुर्जनयानशील:
स्यान्माधवे बान्धवसौख्ययुक्तः ॥
समान्वितश्चञ्चलचित्तवृत्ति
र्विदेशवासाभिरुचिश्च तीव्रः ।
विचित्रबुद्धिः खलु दीर्घसूत्री
ज्येष्ठोद्भवः श्रेष्ठतरो नरः स्यात् ॥
बहुव्ययोऽनल्पवचोविलासः
प्रमादशीलो गुरुवत्सलश्च ।
सदाप्रमाद्यः शुभकर्म्मकृत् स्या-
दाषाढ़जो गाढ़दृढ़ाभिमानः ॥
पुत्रैश्च पौत्रैश्च कलत्रमित्रैः
सुखी च तीर्थस्य निदेशकर्त्ता ।
लोकप्रसिद्धः कफवान् वदान्यो
यः श्रावणे पुण्यगुणैः प्रपन्नः ॥
श्रीमान् भवेत् चीनकलेवरश्च
दाता च कान्तासुतजातसौख्यः ।
सुखे च दुःखे विकृतो हि मर्त्यो
भद्रोभवेद्भाद्रपदाप्तजन्मा ॥
विद्वान् धनी राजकुलप्रियश्च
सत्काव्यकर्त्ता बहुभृत्ययुक्तः ।
दाता गुणज्ञो बहुभृत्यसम्पत्
स्यादाश्विनेऽश्वादिसमृद्धिभाजो ॥
सत्कर्म्मकर्त्ता बहुवाग्विलासी
धनी लसत्पत्रविचारकश्च ।
कामं सकामः क्रयविक्रयार्थी
सत्कृत्यकृत् कार्त्तिकजातजन्मा ॥
सत्तीर्थयात्रानिरतः सुशीलः
कलाकलापे कुशलो विलासी ।
परोपकर्त्ताहतसाधुमार्गो
मार्गोद्भवो वै विभवैः समेतः ॥

परोपकारी पितृवित्तहीनः
कष्टार्जितार्थव्ययकृद्विधिज्ञः।
सुगुप्तमन्त्रः कृतशास्त्रयत्नः।
पौषे विशेषात् पुरुषः कृशाङ्गः॥
सम्यक्त्वविद्वैदिकसाधुयोगी
योगीककविद्याभ्यसनानुरक्तः।
सुहृद्विशेषाश्रितसारिवर्णी
माघोद्भवः स्यादनघो मनुष्यः॥
परोपकारी कुशलो दयान्-
र्वतान्वितः कोमलकायशाली।
विलासिनी केलिविलासशीलो
यः फाल्गुने फल्गुवचो विलास.॥

Then the action of a fortnight and that of each of the lunar days are similarly mentioned. One born in full moon becomes—

चश्चिरायुः सुतरां सुशील।
श्रीपुत्रवान् कोमलकायकान्तिः।
सदासदानन्दविनीतकाल
येऽत्र जन्मकालस्तु वलक्षपक्षः॥

The characteristic of one born in Pratipat is thus given—

बहुजनपरिवारश्चारुविद्याविवेकी
कनकमणिविभूषावेशशाली सुशीलः।
अति सुललितकान्तिर्भूमिपालाप्तवित्तः
प्रतिपदि यदि सूतिर्जायते यस्य जन्मीः॥

So on. After this the effects of the Vāras (days) are thus mentioned—

शूरोऽल्पकेशो विजयी रणाग्रे
श्यामारुणः पित्तचयप्रकोपः।
दाता महोत्साहयुतो सतोजा
दिने दिनेशस्य भवेन्मनुष्यः॥
प्राज्ञः प्रशान्तः प्रियवाग्विधिज्ञः
प्रसन्नरेन्द्राश्रयलब्धवर्णी।

सुखे च दुःखे च समस्वभावो
वारे नरः शौरिकरस्य जातः ॥
वक्रोक्तिरत्यन्तरचप्रियः स्या
त्पुरेन्द्रमन्त्री च परोपजीवी ।
सत्वान्वितश्शीघ्रतरस्वभावो
दिने भवेन्नाऽवनिनन्दनस्य ॥
सद्रूपशाली मृदुवाग्विलासः
श्रीमान् कलाकौशलतासमेतः ।
वणिक्क्रियायां हि भवेदभिज्ञः
प्राज्ञो गुणज्ञोऽपदिनोद्भवो यः ॥
विद्वान् धनी सर्व्वगुणोपपन्नो
मनोरमः श्रापतितप्रकालः ।
श्राचार्य्यवर्य्यश्च जनप्रियः स्या-
द्वारे सुराचार्य्यस्य नरस्य जन्म ॥
सुशीलसंकुचितकेशपाशः
प्रसन्नवेशो मतिमान् विशेषात् ।
शुक्लाम्बर प्रीतिधरो नरः स्या-
त्सन्मार्गगो भार्गववारजातः,
अकालसंप्राप्तजराप्रवृत्ति-
र्वलीजृम्भितो दुर्व्वलदेहयष्टिः ।
तमोगुणक्रौर्य्यचयाभिभूतः
शनेर्दिने जातजनुर्मनुष्यः ॥

Then the effects of the Stars, Yogas, and Karaṇas are similarly mentioned. Thus the work is a most interesting one. It discusses all important matters in easy Sanskrit, so that one going through it can easily prepare Janmapatris or Horoscopes.

End. नास्ति ।

Colophon. इति जातकाभरणे नष्टजातकाध्यायः ।

विवरणम्—श्रीढुण्ढिराजविरचितजातकाभरणाभिधः सुप्रसिद्धजातकविषयकोनिबन्धोऽयम् ।

No. 23. **जातकाभरणम् ।** Jātakābharaṇam. Substance, country-made white paper, 12 × 4 inches, bound like a book. Folia, 124, (of which foll. 1—6 are wanting). Lines, 9 in a page. Character, Nāgara. Date, ? Appearance, old. Verse. Generally correct. Incomplete.

Another incomplete copy of the same work having neither a beginning nor an end.

विवरणमत्रापूर्व्वम् ।

No. 24. **जातकषट्प्रक्रमणिका ।** Jātakaṣaṭprakramaṇikā. Substance, country-made white (Kāśmīrī) paper, 12 × 5 inches. Folia, 5. Lines, 3–9 in a page. Character, Nāgara. Date, ? Appearance, old, worm-eaten, and torn in parts. Verse. Not correct. Incomplete.

An elementary treatise on horoscopy for beginners, entitled Jātakaṣaṭprakramaṇikā. Anonymous.

Beginning.

श्रीगणेशाय नमः ।

लग्नस्थितो दिनकरः कुरुतेऽङ्गपीड़ां

पृथ्वीसुतो वितनुते रुधिरप्रकोपम् ।

छायासुतः प्रकुरुते बहुदुःखभाजं

जीवेन्दुभार्गवबुधाः सुखकान्तिदाः स्युः ॥ १ ॥

दुःखावहा धनविनाशकराः प्रदिष्टा

वित्तस्थिता रविशनैश्चरभूमिपुत्राः ।

चन्द्रो बुधः सुरगुरुर्भृगुनन्दनो वा

नानाविधं धनचयं कुरुते धनस्थः ॥ २ ॥

भानुः करोति नीरुजं रजनीकरोऽति-

कीर्त्यान्वितं क्षितिसुतः प्रचुरप्रभावम् ।

सिद्धिं बुधः सुधिषणं सुविनीतवेषं

स्त्रीणां प्रियं गुरुकवी रविजस्तृतीये ॥ ३ ॥

आदित्यभौमशनय: सुखवर्जिताङ्गं
कुर्य्यन्ति जन्मनि नरं सुचिरं चतुर्थे ।
सौमौ बुध: सुरगुरुर्भृगुदेवजात:
सौख्यं स्थिरं नरपतिं यशस: प्रशस्तिम् ॥ ४ ॥

End. नास्ति ।

Colophon. इति नरजातकं । इति जन्मचन्द्र + + लोकनम् ।

विवरणम्—अयमपि जातकविषयको निबन्ध: ।

No. 25. **जातकोदाहरणम् ।** Jātakodāharaṇam. Substance, country-made colourless paper, 12 × 5 inches, bound like a book. Folia, 70. Lines, 5–13 in a page. Character, Nāgara. Date, Saṁvat 1712 ; Śaka 1577. Appearance, very old, worn out, torn, and worm-eaten throughout. Prose and verse. Not correct. Complete.

A commentary with illustrations on Śrīpati's Jātakapaddhati, entitled Jātakodāharaṇa, by Kriṣṇa Daivajña, son of Śrīvallabha Daivajña. The codex contains also passages of the text along with their commentary.

Beginning. श्रीगणेशाय नम: ॥
नत्वा तां श्रुतिदेवतां त्रिसमयज्ञानोर्ज्जितैः कारणं
तत् पादाम्बुज प्रसादविकसद्बोधो बुध: श्रीपति: ।
शिष्यप्रार्थनया विचार्य्य सकलान् होरागमार्थान् स्फुट-
वक्ष्ये जातककर्मपद्धतिमहं होराविदां प्रीतये ॥

व्याख्या—

अहं श्रीपति: श्रीपतिभट्टनामा द्विज: शिष्यप्रार्थनया जातककर्मपद्धतिं वक्ष्ये । जातस्येदं जातकं । जातस्य बालकस्य जन्मान्तरार्जितसदसत्कर्म जनितशुभाशुभफलनिरूपकं शास्त्रं जातकमित्युच्यते । जातकशास्त्रे यानि कर्माणि गणितक्रियास्तेषां पद्धतिं मार्गं क्रमेण निरूपणमित्यर्थ: । किं कृत्वा सकलान् होरागमार्थान् स्फुटार्थान् विचार्य्य । होरा जातक-

शास्त्रं । तदुक्तं सारावल्यां । होरेतिशास्त्रसंज्ञा लग्नस्य तथा राशेश्चेति । होराजातकशास्त्रं तद्रूपा आगमा मूलग्रन्थास्तान् मुहुर्विचार्य्य किं सत् किमसत् किं बहुमतं किं स्वल्पमतं किं भ्रान्त्योक्तं किं निर्भ्रान्तमुक्तमिति पुनः पुनर्विचार्य्य युक्तियुक्तमर्थमङ्गीकृत्य जातककर्म्मपद्धतिं वच्म इत्यर्थः । किमर्थं होराविदां जातकशास्त्रज्ञानां प्रीतये । पुनः किं कृत्वा तां प्रसिद्धां श्रुतिदेवतां नत्वा । श्रुतयः शब्दास्तेषां देवतामधिष्ठात्रीं सरस्वतीं तामित्यर्थः । यद्वा श्रुतयो वेदास्तत्र या देवता मुख्यत्वेन प्रतिपाद्या परमेश्वररूपा तामित्यर्थः । कथंभूतां श्रुतिदेवतां त्रिसमयज्ञानोद्गतेः कारणं त्रयाणां समयानां भूतभविष्यद्वर्त्तमानानां त्रिसमयानां लक्षणया तत्तत्कालीनवस्तूनां यज्ज्ञानं तस्य या उद्गतिरुत्पत्तिः तस्याः कारणं । यस्याः श्रुतिदेवतायाः प्रसादेन त्रिकालदर्शित्वं भवतीत्यर्थः । कथंभूतोऽहं तत्पादाम्बुरुहप्रसादविकसद्बोधः । तस्याः श्रुतिदेवतायाश्चरणकमलप्रसादेन विकसन्बोधः ज्ञानं यस्य स तथोक्तः । पुनः कथंभूतोऽहं बुधः पण्डितः । अथात्र कर्त्तव्यं संक्षेपतः शार्दूलविक्रीडितेन प्रतिजानीते ॥

End. अथ ग्रन्थसमाप्तिं वैतालीयेनाह—

इति जातककर्म्मपद्धतिं गुरुपादाब्जयुगप्रसादतः ।
वरशिष्यजनप्रबोधिनीं कृतवान् श्रीपतिरग्रजाग्रणीः ॥

व्याख्या—

अग्रजेषु ब्राह्मणेषु अग्रणीः श्रेष्ठः श्रीपतिराचार्य्यः गुरुपादाब्जयुगप्रसादतः जातककर्म्मपद्धतिं इति कृतवान् । कीदृशीं जातककर्म्मपद्धतिं वरशिष्यजनप्रबोधिनीं वरः श्रेष्ठो यः शिष्यजनस्तं प्रबोधयितुं शीलमस्या अस्तीति । अथ ग्रन्थश्लोकसंख्याज्ञानार्थं तथा प्रक्षेपज्ञानार्थं च ग्रन्थसंख्यां शालिन्याह—

अध्यायानामष्टके वृत्तसंख्या
सञ्जातास्याः षट् त्रिचन्द्रप्रमाणा ।
प्रोक्तानुष्टुप्छन्दसा ग्रन्थसंख्या
श्लोकैरेकेनाढ्यया हि द्विशत्या ॥

व्याख्या—

षट् त्रिचन्द्रप्रमाणा षट्त्रिंशदधिकं शतं १३६ प्रमाणं यस्यास्तादृशी प्रोक्ता अनुष्टुप्छन्दसा तु एकेन श्लोकेनाढ्यया द्विशत्या ग्रन्थसंख्या प्रोक्ता एतदुक्तं

भवति यानि शतानि निवशानि तानि. षट् त्रिंशदधिकं शतमेव १३६।
यदात् द्वात्रिंशदक्षरात्मकः श्लोकः क्रियते इति संख्यया गणना क्रियते
तदात् शतत्रयमेव श्लोकाधिकं भवतीति।

Colophon. इति श्रीवल्लभदेवज्ञात्मजश्रीकृष्णदेवज्ञविरचिते श्रीपतिभट्टीयजातककर्मपद्धत्युदाहरणे अष्टमोऽध्यायः। सं १७१२ शके १५७७ श्रावण शुक्ल ७ रवौ श्रालिखि राजप्रासादेन॥ श्रीरस्तु। शुभमस्तु॥

विवरणम्—निबन्धोऽयं श्रीवल्लभदेवज्ञात्मजश्रीकृष्णदेवज्ञविरचितजातककर्मपद्धत्युदाहरणाभिधः श्रीपतिभट्टकृतजातककर्मपद्धतिटीकारूपः।

No. 26. जीवप्रकाशोदाहरणम्। Jīvaprakāśodāharaṇam. Substance, country-made white paper, 10 × 7 inches, bound in the form of a book. Folia, 35. Lines, 6–14 in a page. Character, Nāgara. Date, ? Appearance, very old, slightly torn and worm-eaten throughout. Prose. Not correct. Complete.

A commentary on the Jīvaprakāśa, an astrological work, by the author of the text. But as the text is not in hand, the name of the author cannot be found. Passages are quoted from the work of one Jīvaśarman by Varāhamihira, Keśava, etc. It would not be, therefore, too much to think that this Jīvaśarmā is probably the author of the Jīvaprakāśa and its commentary.

Beginning. श्रीगणेशाय नमः॥

अथोदाहरणं जीव प्रकाशस्य प्रतन्यते।
इदं समाप्तिं नयतां श्रीनृसिंहः स्वराट् प्रभुः॥

प्रारिप्सितग्रन्थस्य निर्विघ्नपरिसमाप्तिकामनया विशिष्टशिष्टाचारपरम्पराप्राप्तं नमस्कारस्तवनात्मकं मङ्गलं शिष्यशिक्षायै निबध्नीश्वरार्थेन सम्प्रयोजनं स्वचिकीर्षितं प्रतिजानीते॥ श्रीमन्नृसिंहमिति।

End. अमी सप्तदश्यां रात्रौ सायतास ४।० घटस्य सूर्योदयः तदेतदाह॥ तत्तद्ग्रहाक्रान्तरतुल्यकं वेदिति॥ ११॥ एवं पूर्व्वास्तपश्चिमोदयसाधनं बुधस्याप्येवं विकल्पितत्वात सम्प्रतीनां सलभत्वाच्चेति दिक्॥

Colophon. इति स्वकृतेजीवप्रकाशोदाहरणे नवमप्रघट्टः॥ छ॥ श्रीरामाय कृष्णाय गोविन्दाय नमोनमः॥

विवरणम्—जीवप्रकाशाभिधजातकनिबन्धविशेषटीकारूपोऽयं निबन्धः।

No. 27. बालबोधः। Bālabodhaḥ. Substance, country-made colourless paper, 10 × 4 inches. Folia, 32. Lines, 2–11 in a page. Character, Nāgara. Date, Saṁvat 1709. Appearance, very old, and worn out. Verse. Not correct. Complete.

An elementary treatise on Astrology determining auspicious as well as inauspicious days, etc., for the performance of religious and domestic works, entitled Bālabodha, by Muñjāditya, a Brāhmaṇa. Noticed in the Catalogue of Sanskrit MSS. in the University Library, Leipsic, No. 1035, p. 318.

Beginning. श्रीगणेशाय नमः॥

विश्वेश्वरं नमस्कृत्य (a) देवीं चैव सरस्वतीम्।
गुरूंश्च देवतानाञ्च प्रसादाद्गुरुतीमया॥ १॥
नानाशास्त्रात् समुद्धृत्य क्रियते बालबोधकं।
मुञ्जादित्येन विप्रेण शिष्यार्थे सारसंग्रहः॥ २॥
विदुषां ब्राह्मणानाञ्च गणकानां तथैव च।
एतेषां कार्यसिद्ध्यर्थं बालबोधश्च विस्तरेत्॥ ३॥
उदयाचलपर्य्यन्तं अस्ताचलमहीमिमाम्।
विततोबालबोधोऽयं मुञ्जादित्येन कारयेत्॥

End. अथ त्रिपुष्करं वक्ष्ये सद्यः प्रलयकारकं।
पूर्व्वसागरपर्य्यन्तं पश्चिमोदधिसंयुतम्।
हेलया क्रमते नित्यं स मां पातु दिनेश्वरम् (?)॥

Colophon. श्रीमुञ्जादित्येन विरचितं ज्योतिःषु बालबोधकं समाप्तम्॥ सम्वत् १७०९ शके ११ × ×।

विवरणम्—श्रीमुञ्जादित्यविरचितबालबोधाभिधज्योतिर्निबन्धविशेषः।

(a) The codex noticed in the Catalogue of the University Library of Leipsic reads विघ्नराजं नमस्कृत्य।

No. 28. **ज्योतिर्विदाभरणटीका सुखबोधिका ।** **Jyotirvidābharaṇaṭīkā Sukhabodhikā** Substance, country-made white paper, 15 × 5 inches. Folia, 167. Lines, 4–9 in a page. Character, Nāgara. Date, Saṁvat 1885. Appearance, not very old, but torn and worm-eaten throughout, with different hand-writings. Prose. Not correct. Complete.

A commentary on the Jyotirvidabharaṇa, entitled Sukhabodhikā, or Subodhinī according to the Cat. Cat., by Bhāvamuni or Bhavaratna, pupil of Śrīmahimaprabha Surī, a Jaina.

Beginning. श्रीगणेशाय नमः ॥

श्रीमान् पार्श्वजिनाधिशो वकगणे पादाः प्रभुः पूर्णगो
द्रांक्षिप्रप्रबलत्कुयोगिकभवप्रौढिः प्रजानां पुरः ।
सत्कीर्त्त्यानकनादपूरितजगत्साकल्य इष्टार्थदो
गौर्व्वाणेश्वरसेवितो विजयते विश्वैकचिन्तामणिः ॥ १ ॥
नत्वा गुरुश्चरणपीभमुखश्च वटान्
श्रीकालिदासकविशक्रविनिर्मितस्य ।
ज्योतिर्व्विदाभरणनामवरागमस्य
संतन्यते गुरुकृपं सुखबोधिकेयम् ॥ २ ॥
श्रीपत्तने प्रवरपौर्णिमकाख्यगच्छे
टंकेरपाठकशुभाश्रयमश्रितानां
श्रीयुक्तपूज्यमहिमप्रभसूरिराज्ञा
शिष्येण भावमुनिना मयका यथोचितं ॥ ३ ॥

अथ ग्रन्थारम्भे ग्रन्थकृत्कालिदासकविशक्रो वसन्ततिलकवृत्तेन समुचितेष्टदेवतानमस्काररूपमङ्गलमाचरन्ननुबन्धचतुष्टयमाह—

End. अथ ग्रन्थारम्भसमाप्तिकालं दर्शयति वर्षैरिति सिन्धुरा इस्ती ८ दर्शनानि षट् ६ अम्बरं ख ० गुणास्त्रयः ३ एभिर्वर्षैः ३०६८ सम्मिते प्रमिते कलौ कलियुगे याते गते सति माधवसंज्ञके वैशाखे मासे मया ग्रन्थक्रियोपक्रमः ग्रन्थकरणप्रारम्भो विहित कृतः च पुनः ऊर्ज्जे कार्त्तिकमासे ग्रन्थसमाप्तिर्विहिता कृता कस्मै ज्योतिर्विदां दैवज्ञानां प्रीतये किं कृत्वा नानाकालविधानशास्त्रगदितज्ञानमादरात् विलोक्य दृष्टा अत्र ग्रन्थान्ते मङ्गलमपि दर्शितं यतः ज्योतिर्विदा प्रीता प्रसन्ना चासौ मा लक्ष्मीश्च प्रीतमा तस्याः सम्बोधने हे प्रीतमे हे प्रसन्नलक्ष्मि त्वमसि । २१ । अथ सुखबोधिकाकृत्प्रशस्तिमाह—

व्यक्तैकान्तयदृध्वान्तं स्यात्कारामीतरश्मि स-
द्गुणाभफलार्पितं जयताज्जैनदर्शनम् ॥

श्रीवर्द्धमानात्सुपरंपरायां
पट्टेऽभवत् सूरिवरः श्रियाढ्यः
चन्द्रप्रभाख्योविधुकान्तिकीर्त्तिः
श्रीपौर्णिमीयाभिधयचगच्छे ॥
तत्पट्टं च श्रियायुक्तो धर्मघोषसतो यतः।
खद्विचन्द्रमिताः १२० जाता शाखाः पौर्णिमिकाभिधाः ॥
परम्पराक्रमस्ततः श्रीविद्याप्रभः सूरिवरोऽत्र पट्टं बभूव।
शास्त्रार्थसुधासमुद्रप्रोल्लासने चन्द्रसमानधन्यः ॥
ललितप्रभसूरिकुञ्जरोऽजनि पट्टे तत आश्रितः श्रियं।
विनयप्रभसूरिपुङ्गवोऽजनि पट्टे तत आश्रितः श्रियं ॥
तत्पट्टपूर्व्वाचलभानुमन्तो
जयन्ति श्रीमन्महिमसूरिराजाः।
गम्भवनुमाश्च गुणैरशेषैः
सर्व्वोत्तमः श्रीमहिमप्रभाख्याः ॥
तच्छिष्योभद्रभावरत्नाभिधानः
तत्पादाब्जोपासनासक्तचित्तः।
एतत्कृत्या कालिदासस्य गुर्व्वीं
ज्ञानार्थी यस्तद्गुरोर्ज्ञानलाभिम् ॥
तेनासौ सुखबोधिका सुललिता ज्योतिर्विदां तुष्टये
शास्त्रस्यास्य कृता यथामति मया शोध्या सुधीभिर्यतः।
संश्लिष्टानि पदान्यनेकशः इहैकैकाक्षराख्यान्यपि
काठिन्यं कठिनाद्गिरां समुदितं त्याज्यं खलत्वं पुनः ॥
परिश्रमोऽयं सफलो मम स्यात्
सद्वाच्यमानेन विलेखनेन।
सतां प्रसादाच्च ततो दधाने:
खलैः खलत्वं जगतीह किं स्यात् ॥
संज्जनेभ्यो नमो नित्यं खलेभ्योऽपि नमोनमः।
भवन्त्येके गुणग्राह्य दोषग्राह्यपरे परं ॥
उभयेषां मया दत्ता कृतिर्मे यातु शुद्धितां।
अग्निसारं यथा हेम निर्दोषञ्च विशुद्धितां ॥
श्रीविक्रमार्कादष्टोषट् चन्द्रमिते गते १७६८ + + खलु राधमासे शुक्ले-
तृतीये तिथौ गभस्तिमान्वारे समाप्ता सुखबोधिकेयम् ॥

Colophon. इति श्रीपौर्णिमीयगच्छाधिराजभट्टारकपुरन्दरश्री: ५ श्रीमहिमप्रभसूरीश्वरचरणसरोरुहचञ्चरीकायमानशिष्यभावरत्नविरचितायां श्रीकालिदासकृतज्योतिर्विदाभरणसुखबोधिकायां ग्रन्थाध्यायनिरूपणक्रमश्रीविक्रमार्कनृपवर्णनोनाम द्वाविंशतितमोध्याय: सम्पूर्ण: ॥ २२

गच्छे श्रीमहिमप्रभाख्यसुगुरो: श्रीपौर्णिमीयाभिधे
शिष्य: श्री + + मात्स्वमसुतो यो भावरत्नाभिध: ।
वाह्नां कुक्षिसमुद्भव: स कृतवान् श्रीपत्तने पत्तने
छन्दोव्याकरणाभिधान + + + + लङ्कारयुक्तामिमाम् ॥
श्रीगोत्वाणभद्राश्रीविषयवत्सकरै: सम्मितेविक्रमाब्दे
शुक्ले पक्षे सहस्ये विषयरसुतिथौ वासरेशस्य वारे ।
पुस्तं ज्योतिर्विदालङ्करणविवरणं कमृपिनोपाठनैर्ह
लोचौरामोल्र्लखौदिह सुलिचिचनोज्ञानवेरैरिर्ते ॥
सम्वत् १८८१ पौष शुक्लपक्षे पश्चम्यां रविवासरे ॥

No. 29. **ज्योतिर्विदाभरणम् ।** Jyotirvidābharaṇam. Substance, country-made white paper, 15×5 inches. Folia, 80. Lines, 6–9 in a page. Character, Nāgara. Date of writing, ? Date of composition, after 3062 years of the Kaliyuga. Appearance, very old, worn out, torn, and worm-eaten in most parts. Verse and prose. Not correct. Complete.

A work on astrology, entitled Jyotirvidābharaṇa or an ornament of Astrologers, attributed to Kālidāsa, the best Jewel in the court of king Vikramāditya. See Catalogue by Kielhorn, No. 228, by Buhler, Part 4, No. 138, by Dr. Mitra, Bik. No. 333, by Weber, No. 1743, and also the Catalogue of the India Office Library, No. 2999, p. 1062 B.

Beginning. श्रीगणेशाय नम: ॥ श्रीसाम्बशिवाय नम: ॥

रैभ्याविश्वादितवशिष्ठपराशराद्यै
र्मत्वोदितं जनगणव्यवहारसिद्धै ।
यद्यान्यहं ननु तदेव गिरं यदार्क्ये
ज्योतिर्विदाभरणनाम मनस्य मैवम् ॥ १ ॥

पन्थान्सदुक्तिविहितोडुमपचराशीन्
ग्रन्थानहं विरचयामि वरोक्तियुक्तैः ।
मत्वा वराहमिहिरादिमतैरनेकै
र्ज्योतिर्विदाभरणमप्यनसन्मताढ्यं ॥ २ ॥
सौरञ्च सावनकमैन्दवमार्क्षमानं
पैत्रं गुरोरथ मनोर्मनुमानमनेन ।
मानं त्रिधैव तथाखिलकर्म्मसिद्धे-
र्मानानि मानवकेन सुनिश्चयं स्यात् ॥

End.

तस्मिन् सदा विक्रममेदिनीशे
विराजमाने समवन्तिकायां ।
सर्व्वप्रजामण्डलसौख्यसम्पद्
बभूव सर्व्वत्र च वेदकर्म्म ॥
शङ्क्वादिपण्डितवराः कवयस्त्वनेका
ज्योतिर्विदः समभवंश्च वराहपूर्व्वाः ।
श्रीविक्रमार्कनृपसंसदि मान्यबुद्धि
स्तैरप्यहं नृपसखा किल कालिदासः ॥
काव्यत्रयं सुमतिकृद्रघुवंशपूर्व्वं
+ + + ततो ननु कियच्छ्रुतिकर्म्मवादः ।
ज्योतिर्विदाभरणकालविधानशास्त्रं
श्रीकालिदासकवितोहि ततो बभूव ॥
वर्षैः सिन्धुरदर्शनाम्बरगुणै ३०६८ र्याते कलौ सम्मिते
मासे माधवसंज्ञिके च विहितो ग्रन्थक्रियोपक्रमः ।
नानाकालविधानशास्त्रगदितं ज्ञानं विलोक्यादरा
दूर्ज्जे ग्रन्थसमाप्तिरत्र विहिता ज्योतिर्विदां प्रीतये ॥

Colophon. इति श्रीकविकुलचूडामणिश्रीकविकालिदासोदिते श्रीज्योतिर्विदाभरणे ग्रन्थाध्यायनिरूपणकमनृपश्रीविक्रमार्कवर्णनं नाम द्वाविंशतितमोऽध्यायः ॥ २२ ॥ ॥ संपूर्णोऽयं ग्रन्थः साम्बशिवप्रसादात् स एव शरणं मेऽस्तु ॥ हस्तसंख्या १४२४ सूचग्रन्थसंख्या २४२० ज्येष्ठमासे कृष्णपक्षेऽष्टम्यां भौमवासरे ॥

विवरणम्—श्रीकालिदासविरचितोज्योतिर्विदाभरणाभिधोयं सुप्रसिद्धो ज्योतिर्निबन्धः ।

No. 30. **ज्योतिषरत्नसंग्रह: ।** Jyotiṣaratnasaṁgrahaḥ. **Substance,** country-made white paper, 10 x 5 inches. Folia, 48. Lines, 2-14 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, torn, and worm-eaten throughout. Verse and prose Not correct. Complete.

A collection of useful Vacanas on astrology, entitled Jyotiṣa ratnasaṁgraha, by Govinda Paṇḍita, son of Jaya Paṇḍita Dharmādhikaraṇika.

Beginning श्रीगणेशाय नम: ॥

नत्वा रामं घनश्यामं शारदां च गणेश्वर ।
बालबोधाय गोविन्द' कुरुते रत्नसंग्रहम् ॥ १ ॥

अथ सर्व्वकर्म्मोपयोगितया त्याज्यप्रकरणमुच्यते ॥ तत्र वशिष्ठ: ।

चतुर्दशी चतुर्थी च अष्टमी नवमी तथा ।
षष्ठी च द्वादशी चैव पक्षच्छिद्राख्तिथि: कृता: ॥

End.

कृष्णपक्षचतुर्द्दश्यां प्रसूत. षड्विधं फलम् ।
चतुर्द्दशी च षड्भागा कुर्य्यादादौ शुभं सुतम् ॥
द्वितीये पितरं हन्ति तृतीये मातरं तथा ।
चतुर्थे मातुलं हन्ति पञ्चम वंशनाशनम् ॥
षष्ठे तु धनहानि: स्यादात्मनो वंशनाशनम् ॥

इति व्यवहारसारं ज्योतिषरत्नं समाप्त ॥

Colophon. इति धर्म्माधिकारणिकजयपण्डितात्मजगोविन्दपण्डितकृतो ज्योतिषरत्नसंग्रह: समाप्त: ॥

विवरणम् धर्म्माधिकरणिकश्रीजयपण्डितात्मजश्रीगोविन्दपण्डितविरचितोज्योतिषरत्नसंग्रहाभिधोऽयं निबन्ध. ।

No. 31. **ज्योतिषसंग्रह: ।** Jyotiṣasaṁgrahaḥ. The codex under notice seems to be a fragmentary remnant of some astrological work or works, consisting of country-made white paper, 6 x 4 inches, bound like a book without page marks. It has neither beginning, nor end, and the

Handwriting is not legible in some places. Colophons too are seen of different kinds, such as इति ज्योतिःसारोद्धारः, इति मुञ्जादित्यकृते बालबोधे उपनयनप्रकरणम्, etc. As two different works of the same name by two different authors are mentioned in the Cat. Cat., one by Kāśīnātha and the other by Naracandra, the codex under notice may be one of these.

पुस्तकमिदं खण्डितमाद्यन्तरहितमार्त्तोपनागरमिव प्रतिभाति। अतोऽस्माभिः परित्यक्तमिदम्।

No. 32. ज्योतिर्विवेकः। Jyotirvivekah. Substance, country-made white paper, 10 × 4 inches. Folia, 26. Lines, 9 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, and slightly worm-eaten throughout. Verse and prose. Not correct. Incomplete.

A handbook on astrology, determining auspicious stars, etc., as well as their effects on ritual and domestic business, entitled Jyotirviveka, by Nātha Datta. In this codex the mark of a full stop is generally used in the place of a coma, which is a peculiarity indeed, not to be found in Sanskrit MSS.

Beginning. श्रीमहाविद्यायै नमः॥

अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः॥ १॥
नत्वा देवीं गणपतिं बालानां हितकारकम्।
वक्ष्ये ज्योतिर्विवेकं च नाथदत्तः शिवं क्षतौ॥ २॥

इति मङ्गलम्। तत्रादौ राशिनिर्णयः। यदुक्तं रत्नमाला।
अश्विनी, भरणी, कृत्तिका, रोहिणी मृगशिरा, आर्द्रा, पुनर्वसु, पुष्य, अश्लेषा, मघा, पूर्व्वा, उत्तरा, हस्त, चित्रा, स्वाती, विशाखा, अनुराधा, ज्येष्ठा, मूल, पूर्वाषाढ़, अभिजित्, श्रवण, धनिष्ठा, शतभिष, पूर्व्वभाद्र उत्तरभाद्र, रेवती॥ २८॥ इति नक्षत्रनामानि।

End. नास्ति।

Colophon. इति श्रीज्योतिर्विवेके नाथदत्तकृतौ गर्भाधानप्रकरणम्॥

विवरणम्—ज्योतिर्विवेकाभिधश्रीनाथदत्तविरचितज्योतिर्निबन्धविशेषः।

No. 33. **ज्योतिषसारः।** Jyotiṣasāraḥ. Substance, country-made colourless paper, 12 x 5 inches. Folia, 29. Lines, 15 in a page. Character, Nāgara. Date, ? Appearance, very old, and writing effaced in parts Verse and prose. Generally correct Incomplete.

A treatise on astrology, entitled Jyotiṣasāra, by Nāracandra, a Jaina.

Beginning. ॥ ६४ ॥

श्रीअर्हन्त जिनं नत्वा नारचन्द्रेण धीमता।
सारमुद्ध्रियते किन्तु ज्योतिष चीरनीरधे ॥ १ ॥
सरस्वतीं नमस्कृत्य यन्त्रकोद्धारटिप्पनी।
करिष्ये नारचन्द्रस्य बालानाम्बोधहेतवे ॥ २ ॥

तिथि १ वार २ धिष्ण्य ३ योग ४ राशि ५ शशि ६ तारकाबलं ७ भद्रा ८ कुलिकोदपकुल्मिक ९० । कंटका११र्द्ध प्रहरा १२ ॥ वैकालवेला १३ चास्थदिर १४ शुभा १५ शुभ १६ रव्यु १७ पा १८ कुमार १९ राजादियोग २० गण्डान्ता २१ पञ्चक २२ चन्द्रारस्था २३ त्रिपुष्कर२४ यमल २५ करणानि २६ ॥ इति सामान्यदिनशुति ॥

End. नास्ति।

Colophon. इति विजययोग । इति त्रिपुष्करयमलयोगः। &c.

विवरणम्—श्रीनारचन्द्रविरचितोज्योतिषसाराभिधोऽयं ज्योति शास्त्रीयनिबन्धविशेष'।

No. 34. **ज्योतिषसारसंग्रहः।** Jyotisasārasaṁgrahaḥ. Substance, country-made colourless paper, 15 x 3 inches. Folia, 29. Lines, 4–6 in a page. Character, Bengali. Date, Śaka 1667 Appearance, very old, worn out, and writing effaced in parts. Verse. Not correct. Complete.

A collection of important verses from several astrological works, on auspicious time, etc., for domestic works as well as religious rites, entitled Jyotisasārasaṁgraha, complete in five chapters. Anonymous.

Beginning. श्रीं नमः श्रीसूर्य्याय ॥

जगदीशं रविं नत्वा लोकानुग्रहकारकम् ।
ज्योतिःसारसंग्रहोऽयं तन्यते सुखहेतवे * ॥
रविः सोमोमङ्गलश्च बुधो जीवः सितः शनिः ।
एतेषां नामतो वाराः सप्तैव कथिताः पुनः ॥
शुक्रेन्दुबुधजीवानां वाराः सर्व्वत्र शोभनाः ।
भानुभूसुतमन्दानां शुभकर्म्मसु केष्वपि ॥
नृपाभिषेको नृपतिप्रयाणं
नृपस्य कार्य्यं नृपदर्शनञ्च ।
यज्ञाग्निकार्य्यं भुवि किञ्चिदुक्तं
सर्व्वं तदादित्यदिने प्रशस्तम् ॥
भेदाभिघातं नगरे पुरे वा
सेनापतित्वञ्च तथैव राज्ञाम् ।
व्यायामशस्त्रव्यसनादिसर्व्वं
कुर्य्याद्दिने भूमिसुतस्य सर्व्वम् ॥

इति वारगुणकथनम् ॥

End. अथ वस्त्रवारसंयोगविशुद्धकथनं तद्यथा ।

मन्दमङ्गलपक्षेषु द्वादश्यां शाङ्गीसरे ।
वस्त्राणां वारसंयोगात् दद्यात्समसमं फलम् ॥

अथ परीक्षा ।

शुक्लपक्षे शुभे लग्ने चन्द्रताराादिशोभने ।
रविशुद्धौ गुरोश्चैव शुक्रेनस्तगते तथा ।
सिंहस्थे च गुरौ चैव परीक्षा न प्रशस्यते ॥
ग्रीष्मे शरदि पानीय तुला स्यात् सर्व्वकालिकी ।
न प्रावृषि विषं दद्यात् प्रावृट्काले घटस्तथा ॥
नाष्टम्यां न चतुर्द्दश्यां प्रायश्चित्तपरीक्षणे ।
न परीक्षा विवाहश्च शनिभौमदिने तथा ॥

---

* Over "तन्यते सुखहेतवे", the passage "मधुरेशेन तन्यते" is written in the margin.

Colophon. इति ज्योतिःसारसंग्रहे पञ्चमोऽध्यायः ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥ श्रीरस्तु लेखकं सदा ॥ ० ॥ ० ॥ शकाब्दाः १६६७ ॥ श्रीरामशङ्करदेवशर्मणः पुस्तकेयं ॥ ० ॥ ० ॥ श्रीकाशीनाथः (?) शर्मणा लिखितं ॥ ० ॥ ० ॥ श्रीहरि. श्रीदुर्गा सहायौ ॥

प्रयत्ननिर्म्मितामेतां यो हरेत् पुस्तिकां खलः ।
सर्व्वाङ्गेषु गलत्कुष्ठं तस्य शीघ्रं भविष्यति ॥

ओं नमः सरस्वत्यै ॥ श्रीरामः ॥

विवरणम्—ज्योतिषसारसंग्रहाभिधः शुभाशुभवारनक्षत्रादिनिरूपकज्योतिर्निबन्धविशेषः ।

No. 35. ज्योतिःसागरसारः । Jyotiḥsāgarasāraḥ. Substance country-made yellowish paper, 16 × 3½ inches. Folia, 26. Lines, 6–7 in a page. Character, Bengali. Date, Śaka 1775. Appearance, very old, worn out, torn in parts, and written by different hands. Verse. Generally correct. Incomplete.

A manual of Astrology, entitled Jyotiḥsāgarasāra, complete in five chapters. From the introductory verse, it appears that the author of the work is one Vidyānidhi. A closer examination, however, disclosed the fact that this work and the work noticed last, are one and the same, differing only in title and authorship. Dr. R. Mitra in his Notices, Vol. I, p. 280, mentions a work of this name, by Mathureśa, and in Vol. IX, pp. 247-48, the same work is attributed to Vidyānidhi and noticed as a different work. He did not evidently take the trouble to compare the codices. But on examining our MS., we find that Mathureśa and Vidyānidhi were not different persons. See India Office Catalogue, No. 3005, p. 1067 A.

Beginning. ओं श्रीसूर्याय नमः ।

जगदीशं रविं नत्वा लोकानुग्रहकारकं ।
ज्योतिःसागरसारोऽयं श्रीविद्यानिधिनोच्यते ॥
रवि. सोमो मङ्गलश्च बुधो जीवः सितः शनिः ।
एतेषां नामतो वाराः सप्तैव कथिताः पुरा ॥

शुक्रेन्दुबुधजीवानां वारा. सर्व्वेष शोभना ।
भानुभूसुतमन्दानां शुभकर्म्मसु केष्वपि ॥

End. सर्व्वमेवं सुराचार्य्यशशाविंशत् दिन भग्न ।
शनि सार्द्धत्रय + + + + + + + + + +
सकला· स्वराशी भुञ्जते यथा: ॥
वक्रशीघ्रगतिभ्यां स्यात भौमादिपञ्चकेऽन्यथा ॥

Colophon. इति श्रीमद्गुरैशचक्रवर्त्तिकृते ज्योतिःसागरसारे पञ्चमोऽध्याय ॥ * ॥ * ॥ * ॥ श्रीरस्तु ॥
शरसिन्धुमुनिचोणोमिते शाके शितीयया ।
श्रीमद्राम + + + + + + + सुपुस्तिकाम् ॥ *
यत्नेन लिखिता पुस्ती येन चौरेण नोयत ॥
+ + + + + + + + + + + + +

विवरणम्—श्रीमद्गुरैशचक्रवर्त्ति(विद्यानिधि) विरचितो ज्योतिःसागरसारनामकोऽयं ज्योतिर्निबन्धविशेष । निबन्धोऽय पूर्व्वाल्लिखितज्योतिःसारसमुद्राभिधनिबन्धेन सदृशिन्न एवेति प्रतीयते ।

No. 36. ज्योतिषसारणी । Jyotiṣasāraṇī Substance, country-made white paper, 15 × 7 inches Folia, 300 Lines, 11–19 in a page. Character, Nagara Date, ? Appearance, very old, worn out, torn, and worm eaten throughout Arithmetical figures Incomplete

A table of the movements of the planets during a century, in arithmetical figures, generally used for the preparation of almanacs. The codex under notice, entitled Rāmavinoda Sāraṇī was most probably prepared in the court of Ramasimha, King of Jeypur, in Samvat 1812, Śaka 1677 and contains such tables relating to Śani, Mangala, Vṛihaspati, Budha and Śukra.

Beginning. श्रीगणेशाय नम ॥
श्रीविन्ध्यनिवासिन्यै गौत्रकुलदेव्यै नम सव १८१२, शक १६७७ पञ्चसाधनं ॥
अकबरस्य राज्यारम्भे सवत् १६१२ शक १४७७ एते इष्टशकमध्ये कनिष्ठ-
शेषं २००, एते ४५ शोमा. कार्य्या जातं १६५ यस्मारभ्याद्गतसमा: ।
एते भौमगुणकेन ११।५४ । १।२६ गुणिता: ५११५ । ८२१०।१६ ५।५८४०

भौमक्षेपकेण ४।४७।४०।५५ युताः ५११९।८९५७।२०५।५९९५ चक्राङ्कृताः ५२६८।२२।५ ऊर्ध्वाङ्कः षष्टितष्टः शेषं ४८।०२।५ जातीयमस्मिन् वर्षे चक्रादि ध्रुवकः सारणीतोगुणनं विना भौमध्रुवकसाधनं पूर्व्वतुल्यं भवति सा क्रिया । चन्द्रग्रहविंशदन्तरिताः अधिमाधिमाङ्काः संपादिताः इष्टशकमध्ये पुस्तकीय-शक १६७२ शोधितः शेषं ५ पुस्तकीयशकाधःस्थाङ्काः भौमस्य ३।४।१६।०० शेषाधःस्थाङ्काः ३९।३०।८० योगे जाताः ४३।३४ २४।० एते भौमक्षेपकेण ४।४७।४०।५५ युता ४८।२२।५ एवं ग्रहाणां ध्रुवघटीपलविपलादिकं कार्य्यम् ।

End. नास्ति ।

Colophon. नास्ति ।

विवरणम्—रामविनोदसारणीनामकः कश्चित् सारणीनिबन्धविशेषः ।

No. 37. होरार्णवसेतुः । Horārṇavasetuḥ Substance, country-made white paper, 12 × 5 inches, bound in the form of a book. Folia, 49. Lines, 14–17 in a page. Character, Nāgara. Date, Saṁvat 1842. Appearance, very old, worn out, torn, and worm-eaten throughout. Verse. Generally correct. Incomplete.

A work treating of Horās or auspicious hours for religious rites, etc., as well as times of birth and their effects in the course of life, entitled Horārṇavasetu, or a bridge over the Ocean of Horās, complete in sixty three chapters or pracchāsas, by Raghuvīra, son of Viṭṭala Daivajña, an inhabitant of Benares. The author wrote it in 1558 Śaka.

Beginning. श्रीगणेशाय नमः ।

कर्णास्फालैश्चालितानामलीनां
चञ्चद्गीताकर्णनोद्यत्प्रमोदः ।
मोदायास्तां मोदकोद्यत्कराग्रः
सिन्दूरोद्यत्सिन्धुरास्योगणेशः ॥ १ ॥
सा शारदा शारदमेघशुभ्रा
स्वच्छारदेन्दुप्रभवक्त्रभासा ।
वाचां प्रपञ्चे खविपश्चिदच्छ-
न्माधुर्य्यमाविष्कुरुतादलं मे ॥ २ ॥

काश्यामीशानस्य सोमेन सम्यक्-
देवस्य श्रीविट्ठलस्यात्मजेन ।
होरापारावारपारप्रयाणे
हेतुः सेतुर्बध्यते स्वीयपद्यैः ॥ ३ ॥
होराप्लवाः शुकपराशरगर्गगार्गि
व्यासात्रिकश्यपवसिष्ठमुखैः प्रणीताः ।
होरार्णवो बहुविचारतरङ्गमाल-
स्तैर्दुस्तरस्त्विति समाप्ति निबन्धहेतुः ॥ ४ ॥
मानेन किञ्चिद्रघवीरनाम्ना
संजल्पाते तद्गुरवः चमध्वं ।
समीक्षणः स्वस्य विरोधहेतो-
रर्थं न चान्यस्य तु दूषणाय ॥
शुभाशुभं प्राग्जननान्तरे वै
जन्तुः स्वदेहैः समभर्ज्ययद्यत् ।
व्यनक्ति तत् पक्तिमिदं हि शास्त्रं
तमोगृहे वस्तु यथा प्रदीपः ॥ ५ ॥

At the end of the work, its contents are thus mentioned—

End.

होरा सेतौ प्रोच्यतेऽनुक्रमोऽस्य
प्रोक्तासानां षड्विंसंख्यायुतानाम् ।
होरापारावारसद्रत्नलाभो
येषां नित्यं शीलनात् स्याद्बुधानाम् ॥
शास्त्रावतारोऽपि च राशिभेदो
ग्रहस्वरूपार्थनिषेकसंज्ञः ।
प्रसूतिचिन्ता ग्रहजातरिष्टं
योगोत्थवायुस्त्वथ रिष्टभङ्गः ॥
चतुर्विधायुर्गणना दशानां
शुभाशुभत्वादिविनिर्णयश्च ।
स्त्रीजन्मपत्रीलिखनेऽब्दपूर्व-
फलानि लग्नोत्थफलात्मकानि ॥
ग्रहराशिफलानि भावजाता-
स्थ भावोत्थविचारणा प्रपञ्चः ।

यच्चर्क्षफलानि च प्रकीर्णाः
करणानां सफल: कृतिप्रकारः ॥
खेटद्वयस्यापि युतेः फलाख्य-
स्तथाच खेटत्रययोगजातः ।
सन्यासतत्कर्मविचित्रनाख्यो
नृपालयोगोथ च राज्यभङ्गः ॥
चानिष्टयोगाः प्रव्रज्या पूर्णेन्दुभ्यां च योगकाः ।
चष्टवर्गाभिधश्चक्रप्रपञ्चश्च दशाफलम् ॥
जातकादर्शफलकं दशारिष्टं ततः परम् ।
स्त्रीणमेव जातकं इकरूपं निर्याणसंज्ञकम् ॥
नष्टाख्यं जातकं चानुक्रमाख्यश्चेति संग्रहः ॥
उच्छ्वासानां सन्निबन्धो क्षीरासागरसेतुगः ॥
जयति संगमनेरपुरांबरे-
ऽचिनयनप्रभवामलकीर्तिभाक् ।
त्रिसमयश्रगणायगतां गतो
द्विजवरः खलु बुब्बसमाश्रयः ॥
तस्यात्मजा वेदविदां वरिष्ठा
वेदैर्मिता वेदहरित्प्रतीताः ।
तेषां वरिष्ठोऽथ गुणैर्गरिष्ठः
काशीप्रतिष्ठो गिरिजेशनिष्ठः ॥
श्रीमद्विट्ठलदीक्षितो गुणगणाम्भोधी तदीयात्मजा
वेकः श्रीधरनामकस्तदपरो वीरेश्वराख्योरघः ।
तातात् प्राप्तसमस्तशास्त्रनिकरो क्षीरार्णवीख्याजने
सेतुं तत्र बबन्ध दैवविदुषां प्रीत्यै कनीयान् सुतः ॥
चित्रं नैतद्यद्रघुवीर ईशो
ह्यब्धिरब्धौ प्रबबन्ध सेतुम् ।
क्षीराम्बुधौ यद्रघुवीरशर्म्मा
स्वसूक्तिरत्नैः प्रबबन्ध चित्रम् ॥
शाकेष्टवाणेषुमहीप्रमाणे
काशीनिवासी रघुवीरशर्म्मा ।
बबन्ध सेतुं स्थिरकीर्तिहेतु-
र्भूयादयं प्रीतिकरो बुधानाम् ॥

उच्छ्वासानां नाम संख्यातनामा

श्रीच्छ्वासोऽयं षड्विंशत्यः प्रपूर्णः ॥ छ ॥

समाप्तश्चायं ग्रन्थः ॥ छ ॥ श्रीग्रन्थसुखार्पणमस्तु ॥ छ ॥ सं १८४१

विवरणम्—श्रीमद्विदग्धदैवज्ञात्मज श्रीरघुनाथदैवज्ञविरचितोऽयं होरार्णवसेतुनामकज्योतिर्निबन्धोऽयं षड्विंशति श्वासपूर्णः । एतद्विषयानुक्रमस्तु ग्रन्थकृता स्वयमेव निबन्धान्ते छन्दसा प्रदर्शितः ।

No. 38. **जातकालङ्कारः ।** Jātakālaṅkāraḥ. Substance, country-made white paper, 9 x 4 inches. Folia, 26. Lines, 7-8 in a page. Character, Nāgara. Date, ? Appearance, old, torn, and worm-eaten in parts. Verse. Not correct. Incomplete.

A manual of horoscopy, entitled Jātakālaṅkāra, complete in seven chapters, though the codex under notice contains upto the end of the fifth chapter only, by Gaṇeśa Daivajña, son of Gopāla. Noticed by Dr. R. Mitra in his *Notices* of Sanskrit MSS., No. 2443.

Beginning. श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥

सानन्दं प्रणिपत्य सिद्धिसदनं लम्बोदरं भारतीं
सूर्यादिग्रहमण्डलं निजगुरुं भक्त्या हृदन्तःस्थितम् ।
येषामङ्घ्रिसरोरुहस्मरणतो नानाविधाः सिद्धयः
सिद्धिं यान्ति लघु प्रयान्ति विलयं प्रत्यूहशैलव्रजाः ॥ १ ॥
यत्पूर्वं परमं सुखावगमितं सज्जातकं + + का
रूपं गूढतमं तदेव विशदं कुर्वे गणेशोऽस्म्यहम् ।
दैवज्ञः सुतरां यथासुखमति श्रीवृत्तदं सग्धरा-
वृत्तैश्चारुतया शुभायनमिदं श्रीमच्छिवानुज्ञया ॥ २ ॥
भूयांसः सन्ति भूमौ निजपरमधियां शालिनः शास्त्रगुम्फे
संख्यावन्तस्तथापि प्रचुरपरगुणेऽतीव वन्द्यो भवन्ति ।
यद्वत् पीयूषरश्मः सुरतरुजनकः चन्द्रतः सम्प्रमोदः
सारं रत्नाकरोऽपि व्रजति हि नितरां किन्तु हर्षं सरस्वान् ॥ ३ ॥
देहं द्रव्यपराक्रमौ सुखसुतौ शत्रुः कलत्रं मृति-
र्भाग्यं राज्यपदं क्रमेण गदिताः लाभव्ययौ लग्नतः ।
भावा द्वादश तत्र सौख्यशरणं देहं मतं देहिनां
तस्मादेव शुभाशुभाख्यफलजः कार्यो बुधैर्निर्णयः ॥ ४ ॥

End. नास्ति ।

Colophon. इति श्रीज्ञानभास्करे योगशास्त्रवर्णनोऽध्यायः पञ्चमः ॥

विवरणम्—श्रीमद्ब्रह्मदेवब्रह्मविरचितो ज्ञानभास्कराभिधो ज्ञानविषयको ज्योतिर्ग्रन्थोऽयम् ।

No. 39. ज्ञानभास्करः । Jñānabhāskaraḥ. Substance, country made white paper, 14 × 6 inches. Folia, 53. Lines, 9-10 in a page. Character, Nāgara. Date, ? Appearance, old, worn out, and slightly worm-eaten in parts. Verse. Not correct. Incomplete.

The codex contains only a part of the Jñānabhāskara or the Sun of knowledge, a voluminous work, treating of a good many different subjects relating to Hinduism in the form of a dialogue between Bhāskara (the Sun), and Aruṇa (his charioteer). It is divided into several parts, and each part into several chapters. Dr. R. Mitra in his Bik. Cat., Nos. 853 and 854, p. 398, calls it a Smṛiti digest. The parts noticed by him, treating of expiations of different kinds, might have led him to come to such a conclusion, but we cannot agree with him in this, because the part noticed in the following No., which most probably is the first part of the work, plainly says in its introductory verses that this is a Jyotiṣa work, dealing with both Astronomy and Astrology. Dr. Weber in noticing also the same part in his catalogue, Vol. I, No. 939, p. 287, describes it to be a work on Astronomy, Astrology and Medicine. So it is evident that, in spite of its treating of a good many different subjects, Astronomy and Astrology are the principal ones. The part which this codex contains, is an incomplete one, having upto a portion of the seventh chapter, and professes to treat of the indication of one's past as well as future life from the first letter of one's name, voice, and marks in the body. The first chapter dwells on the Paribhāṣā ; the second is entitled Vargākṣaranāmni Sarvapraśnopayogī-nirupaṇa ; the third treats of the Svarabheda (different kinds of voices) and so on.

Beginning. श्रीगणेशाय नमः ॥

पुंसः स्वरादिकं नाम स्याद्यदाद्यं विनैव तत् ।
गच्छेत्तत् समासेन वेदितव्यं मनस्विना ॥

दम्पतीनामवर्णेन मनुसंख्यां नियोजयेत् ।
विभिन्नैव चरेद्रागं शेषं कर्म्मविभावयेत् ॥
एकेन पुरुषो ज्ञेयो द्वाभ्यां च वस्तु योषितः ।
शून्येन मिलितं ज्ञेयमेवं कर्म्मविभावना ॥

End. नास्ति ।

Colophon. इति ज्ञानभास्करे रोगाधिकारे षष्ठः ।

विवरणम्—ज्ञानभास्कराभिधःसूर्यारुणसंवादरूपोमानवनामाक्षरादिसूचितशुभाशुभफलविषयकोऽयं निबन्धः ।

No. 40. ज्ञानभास्करः । Jñānabhāskaraḥ. Substance, white foolscap paper, 16 × 4 inches. Folia, 88. Lines, 6–9 in a page. Character, Nāgara. Date, ? Appearance, almost fresh. Verse. Not correct. Incomplete.

This evidently appears to be the first part of the work noticed in the preceding number, treating of Astronomy and Astrology. Noticed by Dr. Weber in his Cat., Vol. I, No. 939, p. 287.

Beginning. श्रीगणेशाय नमः ॐ नमः सूर्याय श्रीज्ञानभास्करभारतीभ्यां नमः श्रीगणेशाय नमः ।

आनन्दयन् बुधमनः कमलं शुभारम् (?)
प्राध्यासयन् हृजिनदर्हिनमन्तरय्यम् ।
कान्यान्तरोपचितकर्म्मविलोकहेतुः
सज्ज्ञानभास्कर उदेतु हृदम्बरे नः ॥
सन्दिह्यमाने सन्दिग्धे सन्देह्याने च वस्तुनि
ज्ञानमज्ञानसयमेव जयति ज्ञानभास्करः ॥
गते मयि स्वविषयानवाप्तज्ञानसम्पदी
पुरुषोऽर्कांशसम्भूत प्रविष्टे चार्कमण्डलम् ।
प्रणम्य शिरसा देवं भानुमन्तं कृताञ्जलिः ।
प्रश्नयावनतो भूत्वा अरुणोवाक्यमब्रवीत् ॥

अरुण उवाच ।

अहो मयोमहाभागस्तपसा येन तोषितः ।
भगवानपि विश्वात्मा ददौ ज्ञानमतीन्द्रियम् ॥
तदहं श्रोतुमिच्छामि त्वत्तः कमलवल्लभ ।
यदि श्रव्यं मया स्वामिन्ननुग्राह्योऽस्मि वै तव ॥

सूर्य्य उवाच ।

इदं रहस्यं परमं ज्योतिषं परमाद्भुतम् ।
अद्भुतं हि ते वच्मि सर्व्वशास्त्रोत्तमोत्तमम् ॥
यस्मादिकालसंसिद्धिहेतुभूतं सनातनम् ।
वेदार्थानां च सर्व्वेषां शुभकालप्रसाधनम् ॥

End. नास्ति ।

Colophon. इति श्रीज्ञानभास्करे श्रीसूर्य्यारुणसंवादे ग्रह + + + विचारे औपरित्यागी-त्यन्नाशुभकर्मप्रकाशः ॥

No. 41. ज्ञानभास्करः । Jñānabhāṣkaraḥ. Substance, country-made white paper, 14 × 6 inches. Folia, 120. Lines, 4–10 in a page. Character, Nāgara. Date, Saṁvat 1885. Appearance, almost fresh. Verse. Not correct. Incomplete.

Another part of the work, noticed in No. 39, dealing with the results of actions performed in one's previous births.

Beginning. श्रीगणेशाय नमः । अथ पृच्छकविधिः ।

रविवारे च संक्रान्तौ शुते योगे तथा तिथौ ।
वैधृतौ व्यतिपाते च विप्राणां च महालये ।
देवतायतने चैव नद्याश्च सङ्गमोत्तमे ।
अथ वास्तुगृहे चैव शुते स्नाते विशेषतः ॥
स्नानं समाचरेद्रोगी ह्यपुत्रोऽमतवत्सकः ।
कर्म्मणा पीडितो योऽसौ नारी वा पुरुषोऽथवा ॥
धात्रीफलानि लोध्रञ्च गोमयं सर्षपास्तिलाः ।
वर्त्तिका सप्तकर्पूरं उशीरं पुष्पसंयुतं ।
ओषधीसमुदायेन स्नानं कुर्य्यात् प्रयत्नतः ॥

End. प्रयोजकोऽमली वा यः पुत्रार्थीविधुराङ्गने ।
स्वसा वाऽथ सुता वापि पुत्री वा कारणं विना ।
प्रयोजकं पतिं हित्वा पत्यन्तरमुपैति सा ।
प्रयोजकोऽथवा पत्या जाते सौख्यं यदा तदा ॥
लक्षणैरिति विज्ञातकर्मभिःकृतिमाचरेत् ॥
पूर्वोक्तेन विधानेन तुलसीं विष्णुना सह ।
श्रद्धया सम्यगुद्वाह्य विभद्रःस्ववर्णितया ।
दद्याद्गोयुगलं प्राज्ञं सर्वोपस्करसंयुतम् ।
ब्राह्मणान् भोजयेत् पश्चात् यथाविभवसारतः ॥

Colophon. इति श्रीज्ञानभास्करे सूर्यारुणसंवादे कर्मप्रकाशिके मृतभार्याधिकारे मित भार्याधिगामिनोमृतभार्यस्य कर्मलक्षणनिष्कृतिप्रकाशः समाप्तः ॥ संवत् १८८५ मिति वैशाख शुक्लदशम्यां गुरुवारे लिखितं पुस्तकं कर्मप्रकाशितं मया परस्मार्थं * शुभम् ॥ शरीरम् ॥

कविर्वोधौ यदास्य प्रज्ञया किं प्रयोजनम् ॥
उभौ तौ यदि न स्यातां प्रज्ञया किं प्रयोजनं ॥
छ ॥ छ ॥ छ ॥ छ ॥ श्रीकालिकादेव्यै नमोनमः ।

* विवरणम्—पूर्वोल्लिखितज्ञानभास्कराभिधपुस्तकस्य कश्चिदंशविशेषः ।

No. 42. ज्ञानमञ्जरी । Jñānamañjarī. Substance, country-made colourless paper, 10 × 5 inches. Folia, 10. Lines, 10–16 in a page. Character, Nāgara. Date, ?* Appearance, very old, worn out, torn, and writing injured and slightly effaced in parts. Verse. Not correct. Complete.

A work which professes to indicate stolen properties and foretell the fortune of an individual from his questions, entitled Praśnasāra or Jñānamañjarī. The contents of the work are enumerated in the introductory verses. Anonymous. In Cat. Cat., we find two works of the same name, Jñānamañjarī, one by Ṛṣi Śarman and the other by Somanātha. The former is noticed in Bik. Cat., No. 648, p. 302, and appears to be different from that of ours. The latter is

said to be the same with the former in Ulwer Cat., Nos. 1776-77, but no extracts are given. However, we may point out this as the third work of the same name.

Beginning. नमः शिवाय ॥

नमस्कृत्य शिवं सम्यक् गुरुं नारायणं तथा।
प्रश्नसारमहं वक्ष्ये ज्ञानमञ्जरिकाभिधम् ॥ १ ॥
ज्ञानमञ्जरिकायन्थे अनुक्रमणिकां पुरा।
पृच्छकाश्रितदिग्रेखा पृच्छकस्य परीक्षणम् ॥ २ ॥
दशवारप्रकरणं कालत्रयनिरूपणम्।
पृच्छाकालस्य संकेतः खगचेष्टानिरूपणम् ॥ ३ ॥
नृपराशिवर्गयोनिर्जीवप्रकरणं ततः।
धातुप्रकरणादूर्द्ध्वं मूलप्रकरणं ततः ॥ ४ ॥
चिन्तामनुष्टिका प्रोक्ता मुष्टिज्ञानात् शुभाशुभम्।
प्रश्नकालौ तथा ज्ञेयौ जयाजयविधिक्रमः ॥ ५ ॥

End. उदितो यो ग्रहः प्रश्ने तदधिष्ठानसंख्यया।
भ्रान्तिहीनोयहीतव्यो वर्गो नान्यः कदाचन ॥

Colophon. इति ज्ञानमञ्जरिका ॥

अ ८ आ १६ इ २४ ई ३२ उ ४० ऊ ४८ ए ५६ ऐ ६४ ओ ७२ औ ८० अं ८८ अः ९६ क ७ ख १४ ग २१ घ २८ ङ ३५ च ६ छ १२ ज १८ झ २४ ञ ३० ट ५ ठ १० ड १५ ढ २० ण २५ त ४ थ ८ द १२ ध १६ न २० प ३ फ ६ ब ९ भ १२ म १५। य २ र ४ ल ६ व ८ श १ ष २ स ३ ह ४ च ५ ल १०।

प्रश्नाक्षरमात्रा सङ्घ्यांकान् एकत्र कृत्वा
द्वाभिंशद्भिर्गणयित्वा प्रश्नवाक्यान् ॥

विवरणम्- ज्ञानमञ्जरीनामकोऽयं प्रश्ननिर्णायको निबन्धविशेषः।

No. 43. ज्योतिःसागरः। Jyotiḥsāgaraḥ. Substance, country-made reddish paper, 15 × 3 inches. Folia, 33, (of which foll. 1—10 are wanting). Lines, 6-7 in a page. Character, Bengali. Date, ? Appearance, very old, worn out, and writing slightly effaced in parts. Verse. Generally correct. Incomplete.

This codex contains fragments of the fourth and fifth chapters of the Jyotiṣasāgara, a work treating of the leading topics of Hindu Astronomy and Astrology. Noticed by Dr. R. Mitra in his *Notices* of Sanskrit MSS., No. 2444.

Beginning. नास्ति ।

End. नास्ति ।

Colophon. इति ज्योतिःसागरे चतुर्थोऽध्यायः ।

विवरणम्—पुस्तकेऽस्मिन् ज्योतिःसागराभिधज्योतिर्निबन्धस्य चतुर्थपञ्चमाध्यायौ खण्डितौ वर्त्तेते ।

No. 117. रेखागणितम् । Rekhāgaṇitam. Substance, country-made white paper, 15 × 10 inches, bound like a book. Folia, 315. Lines, 5–19 in a page. Character, Nāgara. Date, Saṁvat 1878. Appearance, very old, worn out, torn and worm-eaten throughout, and writings injured in several places. Prose. Not correct. Complete.

A complete copy of the above-mentioned work.

End. तदा पञ्च समभुजकोणा अपि समाना भविष्यन्ति पञ्च समभुजत्रिकस्य चयस्त्रय कोणा इष्टत्रिकस्य कोणाः स्यु तस्मात इष्टत्रिकस्य कोणा अपि समाना भविष्यन्ति इदमस्माकमिष्टम् ॥ ५ ॥

Colophon. श्रीमद्राजाधिराजप्रभुश्रीजयसिंहस्य तुष्टै द्विजेन्द्रः.
श्रीमत्सम्राट् जगन्नाथ इति समभिधारूढितेन प्रणीते
ग्रन्थेऽस्मिन्नाम्नि रेखागणित सुकोणावबोधप्रदात
य्यध्यायोध्येतृमोहापह इह विरति चतुर्दशोगतोऽभूत् १५ ।
समाप्तोऽयं ग्रन्थ शुभं भूयात् ॥
यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥
भग्नपृष्ठकटिग्रीव कष्टदृष्टिरधोमुख ।
कष्टेन लिखितं ग्रन्थं यत्नेन परिपालयेत् ॥ २ ॥
संवत् १८७८ शाके मीति पौषमासे कृष्णपक्षे द्वितीयायां भौमवासरे ॥
शुभमस्तु ॥

विवरणमनुक्तपूर्वम् ।

No. 118. उकराख्यग्रन्थः । Ukarākhyagranthaḥ. Substance, country-made white paper, 10 × 7 inches, bound in book form. Folia, 54. Lines, 15–24 in a page. Character, Nāgara. Date, Saṁvat 1787; Śaka 1652. (Probably the date of Sanskrit translation) Appearance, very old, worn out, and slightly worm-eaten in parts. Prose. Not correct. Complete.

A work which appears, from the figures given in illustration of its course, to be a treatise on spherical Geometry, entitled Ukarā-

grantha. This was first composed in Yavānī or Greek language and translated into Arabic by several authors. Kustaviviluka bālbhuī had translated upto the fifth figure of the third chapter at the request of Abul Abbās Ahmed, and the remaining portion was translated by others whose names are not given. Sāvita vimkusais corrected the work, and Naisīr made a commentary on it. Then Abid explained the Arabic text to Nayanasakha who translated it into Sanskrit in Samvat 1787.

Beginning. श्रीगणेशाय नमः ॥ अथ उकराख्योयम्. सावजूसयूसकृतो लिख्यते। तत्रास्य त्रयोऽध्याया एकोनषष्टि तुल्यानि ५९ क्षेत्राणि सन्ति। परं च कस्मिंश्चित् पुस्तकेऽष्टपञ्चाश ५८ न्मितान्येव क्षेत्राणि सन्ति तत्र प्रयोजनद्वयस्यैक क्षेत्रमेव कृतम्। इदं यूनानी भाषात अरबभाषायां अबुल अब्बास अहमद-स्याज्ञया कुस्ताविविलुकाबालबहीसंज्ञेन तृतीयाध्यायस्य पञ्चमक्षेत्रपर्यन्त रचित शेषमन्यैर्रचितं इदं सावितविम्कुसैस्संज्ञेन शोधित, नयसीर संज्ञेन टीका कृता। सेयं संस्कृतग्रन्थैर्नयनसुखोपाध्यायैर्निबध्यते। अथ प्रथमाध्याय। तत्र द्वाविंशति क्षेत्राणि सन्ति। आदौ परिभाषा। एक धरातलेन यत् क्षेत्र तथा वेष्टयते यथा तदन्तर्गतमध्यदेशैकचिह्नात्सूत्राणि सूत्राणि आवेष्टकधरातलपर्यन्तं सर्व्वाणि समानानि भवन्ति तस्य गोलक्षेत्र-मिति संज्ञा कृतास्ति। तच्चिह्न गोलस्य केन्द्र भवति।

End. तस्मात् इष्टचाप कलचापस्य सजातीयं भविष्यति तस्मात् इष्टचाप कल-चाप सजातीयस्य वृत्तस्य चापात् अधिकं भविष्यति। पुनर्मतचाप इभ्-चापस्य सजातीयमस्ति। तस्मात् मतचापं इभ्चापसजातीयस्य वृत्तस्य चापादधिकं भविष्यति इदमेवेष्ट। इदमारबीभाषात आबिदसंज्ञे. कथितं नयनसुखोपाध्यायै' संस्कृत रचितं।

Colophon. इत्युकरं सावजूस् यूस् संज्ञस्य समाप्तं। अस्मिन् अध्यायत्रयमेकोनषष्टि ५९ क्षेत्राणि सन्तीति सं १७८७ शाके १६५२ चैत्र वदि १ शनि समाप्तश्चायं ग्रन्थः॥ शुभं भूयात्॥

विवरणम्--निबन्धोऽयं श्रीनयनसुखोपाध्यायेनारबीभाषात' संस्कृतऽनूदित क्षेत्रतत्त्वविषयकरूपः।

NOTE—In this codex we find attached another work containing a part of the Samrāṭ Siddhānta of Jagannātha, of the following description—

सम्राट्सिद्धान्तः। Samrāṭ Siddhāntaḥ. Substance, country-made colourless paper, 10 × 7 inches, bound in book form. Folia, 118. Lines, 20–27 in a page. Character, Nāgara. Date, ? Appearance, very old. Prose. Not correct. Incomplete.

An incomplete part of the Samrāṭ Siddhānta, by Paṇḍita Samrāṭ Jagannātha, a Paṇḍita in the court of Mahārāja Jaya Siṁha of Jaypur, treating of Hindu Astronomy.

Beginning. श्रीमद्गणाधिपतये नमः। श्रीसरस्वत्यै नमः ॥

गजाननं गणाधिपं सुरासुरार्चितं सदा।
समस्तभक्तकामदं शिवासुतं सुखप्रदम्।
वितण्डचण्डयोगिनीसमाजमध्यवर्त्तिनम् ॥
प्रशस्तभूतिभूषितं नमामि विघ्नवारणम् ॥ १ ॥
लक्ष्मीन्दुमिन्दुवदनाम्बुरुहं सुरेशै
र्वन्द्यं सनन्दनजनैर्विनतैर्गुणज्ञं।
वाग्देवतां निखिलमौक्तिकमौलिपद्मां
वन्दे गुरुं गणितशास्त्रविशारदञ्च ॥ २ ॥
श्रीगोविन्दसमाह्वयादिविबुधान् वृन्दाटवीनिर्गतान्
यस्येव निराकुलं प्रचितमनोभावः स्वशक्त्यागमत् ॥
म्लेच्छानमानसमुन्नतान् सततरसा निर्जित्य भूमण्डले
जोधाक्षौण्यधिपश्च देववन्नृपतिः श्रीरजिराजेश्वरः ॥ ३ ॥
करं जनार्दन नाम दूरीकृत्य स्वतेजसा।
भाजते तु सदोऽदीपा यथा शीतोऽदिवाकरः ॥ ४ ॥
राजाधिराजो जयसिंहदेवो
श्रीमन्मरुद्देशाधिपतिश्च सम्राट्।
श्रीरामपादाम्बुजसक्तचित्तो
यज्वा सदादानरतः सुशीलः ॥ ५ ॥
गोलादिकर्मसु नवीनयुक्ति
प्रचारदक्षो गणितागमज्ञ
सत्यप्रियः सत्यरतः कृपालु
र्विख्यातप्रतापी जयति धरायाम् ॥ ६ ॥
येनेष्टं वाजपेयाद्यैर्मखैर्महामानि योऽकृत।
दत्तानि विप्रवर्येभ्यो गोदानविजयाजिनः ॥ ७ ॥

स धर्मपालीगणितप्रवीणम्
ज्योतिर्विदां गोलविचारदक्षान् ।
कारसयाद्दय चकार वेधम्
गोलादियन्त्रैर्मुसदाब भानाम् ॥ ८ ॥
तेन श्रीजयसिंहेन प्रार्थित. शास्त्रवित्तमः ।
करोति श्रीजगन्नाथ सम्राट् सिद्धान्तमुत्तमम् ॥ ९ ॥
अथ वेधोपयोगीनि यन्त्राणि प्रोच्यन्ते ॥

End. नास्ति ।

Colophon. नास्ति ।

विवरणम्—पुस्तकेऽस्मिन् जयपुराधिपमहाराजश्रीजयसिंहसभापण्डितपण्डितसम्राट्जगन्नाथ विरचितसम्राटसिद्धान्ताभिधसङ्कलितनिबन्धस्य भारतीयज्योतिःशास्त्रसम्मतयन्त्रवेधयन्त्रादिनिरूपणोऽऽ प्रथिमोऽसम्पूर्णो वर्त्तते ।

No. 119. सम्राट्सिद्धान्तं । Samrat Siddhantam Substance, country-made yellowish paper, 10 × 7 inches Folia, 288 Lines, 14–23 in a page Character, Nāgara Date, ? Appearance, old. Prose Not correct Incomplete.

This codex contains a Sanskrit translation of the Arabic work Almajest, by Paṇḍita Samrāt Jagannātha, at the request of king Jayasimha, entitled Siddhāntasārakaustubha It has been included in the Samrāt Siddhānta. This codex contains upto the end of the ninth prakarana of the thirteenth or the last chapter.

Beginning. श्रीगणेशाय नमः ॥

The first eight verses are as in the preceding No. Then follow—

ग्रन्थं सिद्धान्तसम्राजं सम्राट् रचयति स्फुटम् ।
तुष्टै श्रीजयसिंहस्य जगन्नाथाह्वयः कविः ॥ ९ ॥
आरबीभाषया ग्रन्थो मिजस्ती नामकः स्थितः ।
गणकानां सुबोधाय गीर्वाण्या प्रकटीकृतः ॥ १० ॥

अस्य ग्रन्थस्य त्रयोदशाध्याया सन्ति एकचत्वारिंशदधिकशतं प्रकरणानि सन्ति ग्रन्थस्तुत्तरशत श्लोकानि सन्ति। अथ प्रथमाध्याय अत्र चतुर्दशप्रकरणानि षोड़शश्लोकानि संति तत्र प्रथमप्रकरणं। लोके विद्यात्रयमस्ति। एका ज्ञानविद्या एकाव्यवहारविद्या च ज्ञानविद्या त्रिविधा एका सच्चिदानन्द ज्ञानस्वरूप भगवदनुभवसाधनभूता द्वितीया गुप्ता दृष्टा च ग्रहनक्षत्र ज्ञानकारिणी तृतीया च दृश्या पाञ्चभौतिक ज्ञानकारिणी। व्यवहार विद्यापि त्रिविधा आचारव्यवहारप्रायश्चित्तरूपा। व्यवहारविद्या सुगमास्ति ज्ञानविद्याऽतिकठिनास्ति तत्रापि प्रथमविद्याऽतिकठिनास्ति, कुत अगो चरत्वात् तृतीयायान्तु विनाशशीलाना पदार्थाना ज्ञानमस्ति। अत द्वितीयाविद्या गोलगणितज्ञानरूपा मध्या प्रयुक्ता।

End. नास्ति।

Colophon.

राजाधिराजप्रभुतोषणार्थं
सम्राट् जगन्नाथकृतं सुशास्त्रं।
सिद्धान्तसारे खलु कौस्तुभेऽस्मि
न्नर्कप्रमाणोविरतिं जगाम

विवरणम्—निबन्धोऽयं माजिष्टाभिधानबोनिबन्धानुवादरूप सिद्धान्तसारकौस्तुभाख्य पण्डित सम्राटश्रीजगन्नाथकृततदीयसम्राट्सिद्धान्तान्तर्गत

No. 120. लग्नचन्द्रिका। Lagnacandrika Substance, country made reddish paper, 13 × 6 inches Folia, 16 Lines, 6 11 in a page Character, Nagara Date, ? Appearance, old, and slightly worm eaten throughout Verse Not correct Complete

An astrological treatise on the influence of planetary conjunctions on the destiny of man, and the most auspicious moments for marriage, etc., complete in four chapters, by Kāsinatha Noticed by Dr. R. Mitra in his *Notices* of Sanskrit MSS., No 836. See also the Catalogue of the India Office Library, No 3099, p. 1106.

Beginning ॥ श्रीं ॥ श्रीगणेशाय नमः ॥

तमिस्राजागरचक्षं योज्योतयति भूतलम्।
त वन्दे परमानन्दं सन्त्रसाक्षिणमीश्वरम् ॥ १ ॥

तनु धनञ्च भ्राता च सुहृत्पुत्रोरिपुस्त्रिय ।
मृत्युश्च धर्मकर्मायुर्व्यया भावा प्रकीर्त्तिता. ॥ २ ॥
विषमोऽथसम. पुंस्त्री क्रूरोऽक्रूरश्च नामत ।
चरस्थिरद्विस्वभावा मेषाद्याराशय स्मृता ॥ ३ ॥

End. परमोच्चफलमाह—

दशांशोर्के त्र्यंशे चन्द्रे भौमेऽष्टाविंशमांशके ।
बुध पञ्चदशांशे च पञ्चमांशे बृहस्पति. ॥
सप्तविंशांशके शुक्रोविंशत्यंशे शनैश्चर. ।
मेषादिकेषु विंशांशे परमोच्चो निगद्यते ॥

परमोच्चानां फलमिदंमधुना यत् पूर्व्वमुक्तम् ।

Colophon. (1) इति सर्व्वशास्त्रविशारद काशीनाथकृतौ लग्नचन्द्रिका समाप्ता ॥ छ । छ ॥ ॥

विवरणम्—श्रीकाशीनाथविरचितलग्नचन्द्रिकाभिधलग्नफलादिनिरूपकोज्योतिर्निबन्धविशेष. ।

No. 121. लघुचिन्तामणि. । Laghucintamaṇiḥ Substance, country made reddish paper, 9 x 4 inches Folia, 4 Lines, 9 in a page. Character, Nagarı Date, ? Appearance, old, worn out, torn and writing injured in most parts Verse Not correct Incomplete

An abridgment of the author's own work, entitled Tithicintāmaṇi or Vrhat Tithicintāmani, on auspicious lunar days, etc., by Ganesa

Beginning. श्रीगणपतये नम. ॥ श्रीगणपतिप्रसाद ॥

यश्चिन्तामणिरत्नकल्पबहुलोप्यान्यक्रियो मत्कृते-
स्तिथ्याद्यावगमप्रदोऽस्य सुधियो ये वीक्षने भीरव. ।
तत्प्रीत्यै लघुमल्पकल्पममलं तिथ्यादिचिन्तामणि
विश्वेशार्कसुतान् प्रणम्य कुरुते श्रीमद्गणेश. कृती ॥ १ ॥
खगयुगमनु १४४० शाक: स्यात् समीपोक्तोऽयं
स्वरखल कुभि १००७ राशी नागसंख्याब्दप ८०० स्यात् ।

---

(1) The colophon in the codex noticed by Dr. R. Mitra reads इति श्रीकाशीनाथकृतौ लग्नचन्द्रिकायाम्चतुर्थ. परिच्छेद: समाप्त: ॥

सुमुख इव कल्पि राज्ञि ४१ इवर्षयुजा'
युति ४ भिरिंदुवसुद्रै ४५ में १७ यैतः सततं ॥

End. नास्ति।

Colophon. नास्ति।

विवरणम्—श्रीगणेशविरचित स्वक्षतिथिचिन्तामणिमतेपभतलघुचिन्तामणि नामकोऽयं ज्योतिर्निबन्ध विशेष'।

No. 122. लघुजातकम्। Laghujātakam Substance country made white paper, 15 × 6 inches Folia, 10 Lines, 8–12 in a page Character, Nāgara Date, Samvat 1855 Appearance, old Verse Not correct Complete

A short manual of horoscopy, entitled Laghujataka or Saṁksiptajātaka, by Varāhamihira. The text of the work has been published from the Berlin MSS. with a German translation by Dr. A. Weber. This work is an abridgment of the Vrihatjātaka. Noticed in the Catalogue of the India Office Library, No. 3057, p. 1094, and also by Dr. R. Mitra in his *Notices* of Sanskrit MSS., No. 812; also in Bik. No. 692, p 321. See also Die Handschriften verzeichnisse Koniglichen bibliothek zu Berlin Von A Weber, No. 858, p. 256.

Beginning श्रीगणेशाय नम ॥

यस्योदयास्तसमये सुरमुकुटनिघृष्टचरणकमलोपि।
कुरुतेऽञ्जलिं त्रिनेत्र स जयति धाम्ना निधि सूर्य ॥ १ ॥
होराशास्त्रं वृत्तैर्मया निबद्धं निरीक्ष्य शास्त्राणि।
यत तस्याप्यार्याभिः सारमहं प्रवक्ष्यामि ॥ २ ।
यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मण प्राप्तिं
व्यञ्जयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव ॥ ३ ॥
शीर्षमुखबाहुहृदयोदराणि कटिवस्तिगुह्यसञ्ज्ञानि।
ऊरू च जानुजङ्घे चरणाविति राश्योऽङ्गानि॥ ४ ॥
कालनरस्यावयवा पुरुषाणां चिन्तयेत् प्रसवकाले।
सदसद्ग्रहसंयोगात् पुष्टान् सोपद्रवांश्चैव ॥ ५ ॥

End. वैलामथ विलग्न च श्रीवा मंशकमिवच ।
पञ्चकीष्वेव ज्ञानीयाग्नष्टजातकसिद्धये ॥ ६ ॥
मस्कार्य नाम्न मात्रा त्रिगुणयाङ्गुलैः समायुक्ता ।
त्रिभवकभक्ता: शेषं नक्षत्रं तज्ञमिष्टादि ॥ ७ ॥
त्रिविंशत्यहर्गणदशतिथिसप्तत्रिगुणाकवाष्टचन्द्रार्का ।
पञ्चदशघ्ना सहितास्वान्वितामधनिष्टादि ॥ ८ ॥

Colophon. इति लघुजातके नष्टजातकाध्याय ॥ १६ ॥ संवत १८५५ फाल्गुनमासे कृष्णपक्षे शिवचतुर्दश्यां शशाङ्क वासरे । राम ।

. विवरणम्—लघुजातकाभिधग्रन्थज्ञातकमारभ्य तज्ज्योतिर्निबन्धविशेष. ।

No. 123. लघुविनोदसारणी । Laghuvinodasāraṇī Substance, country made white paper, 13×6 inches Folia, 78 Lines, 9–11 in a page Mathematical figures Date, Appearance, very old, worn out and worm eaten throughout Complete

This codex contains a Sāraṇī only

पुस्तकेऽस्मिन् काचित सारणिर्विद्यते

No. 124. लघुसंग्रहः । Laghusaṃgrahaḥ Substance, country-made colourless paper, 12×4 inches Folia, 19 (of which foll 1—5 are wanting) Lines, 8 in a page Character Nāgara. Date, ? Appearance, very old, worn out, torn, worm-eaten and injured in parts. Verse Not correct Incomplete.

A primer on Astronomy and Astrology, by Lakṣmīnārāyaṇa. Noticed by Dr. R. Mitra in his Notices of Sanskrit MSS., No. 2875.

Beginning. नास्ति ।

End. नास्ति ।

Colophon. इति लघुसंग्रहे नक्षत्रप्रकरणम् ।

विवरणम्—श्रीलक्ष्मीनारायणविरचितप्रथमज्योतिः शिक्षोपयोगीनिबन्धविशेषोलघुसंग्रहोनाम ।

No. 125. लीलावती । Lilāvati. Substance, country-made colourless paper, 12 x 5 inches. Folia, 14. Lines, 9-13 in a page. Character, Nāgara. Date, ? Appearance, very old, worn out, torn, and worm-eaten throughout, writing also injured in parts. Verse and prose. Not correct. Incomplete.

Lilāvatī is the first part of the well-known mathematical work, Siddhāntaśiromani of Bhāskarācāryya, the son of Maheśvaropādhyāya, who completed his great work in 1075 Śaka (A.D. 1150). It treats of arithmetic only, and has been published in Calcutta and Madras, and also translated into English by Mr. Colebrooke. There are also Hindi and Bengali translations of the work. Noticed in the Catalogue of the India Office Library, No. 2791, p. 1001.

Beginning. श्रीगणेशाय नमः ।

प्रीतिं भक्तजनस्य यो जनयते विघ्नं विनिघ्नन् स्मृत-
स्तं वृन्दारकवृन्दवन्दितपदं नत्वा मतङ्गाननम् ।
पाटीं सद्गणितस्य वच्मि चतुरप्रीतिप्रदां प्रस्फुटां
संक्षिप्ताक्षरकोमलामलपदैर्लालित्यलीलावतीम् ॥ १ ॥

End. नास्ति ।

Colophon. नास्ति ।

विवरणम्—श्रीभास्कराचार्य्यविरचित-सिद्धान्त-शिरोमणिनामक-प्रसिद्धनिबन्धीय-प्रथमांशभूत-पाटीगणितविषयकोऽयं निबन्धः सुप्रसिद्ध एव । निबन्धोऽयं कलिकातादिनगरे मुद्रितः प्रकाशं नीतश्च । निबन्धोऽयं हिन्दीवङ्गाङ्गभाषाभ्यामनूदितश्च ।

No. 126. लीलावती । Lilāvatī. Substance, foolscap paper, 15 x 5 inches. Folia, 55. Lines, 6 in a page. Character, Nāgara. Date, ? Appearance, not fresh. Verse and prose. Not correct. Complete.

This codex contains the complete text of Lilāvatī, noticed in the preceding No.

Beginning already given above.

End. न गुणी न हरी न हृतिर्न घन: पृष्टव्याधि दुष्टानाम् ।
गणितगणकस्तनं स्यात् पातोऽयञ्चमत्वषोऽस्मिन् ॥ १६६ ॥
येषां सुजातिगुणवर्गविभूषिताङ्गी
शुद्धाखिलव्यवहृति खलु कण्ठसक्ता ।
लीलावतीह सरलोक्तिमुदाहरन्ती
तेषां सदैव सुखसम्पदुपैति वृद्धिम् ॥ १६७ ॥ ० ॥

Colophon. इति श्रीभास्कराचार्यविरचितायां लीलावत्यां सिद्धान्तशिरोमणे: प्रथमखण्ड:
सम्पूर्णं गणितपाठ्यां समाप्तमङ्कपाशाधिकार ॥ ० ॥
अष्टौ व्याकरणानि षट् च भिषजां व्याचष्ट ता संहिता
षट् तर्कान् गणितानि पञ्च चतुरो वेदानधीते स्म य: ।
रत्नानां त्रितयं द्वय च बुबुधे मीमांसयोरन्तरं
सद्ब्रह्मैकमगाधबोधमहिमा सोऽस्या: कविर्भास्कर: ॥ १ ॥
लीलावत्यां श्लोकसंख्या २७१ समाप्तोऽयं ग्रन्थ । लिपिकृत दुर्गारामोसी ॥*

विवरणमन्यत्पूर्ववत् ।

No. 127. लीलावती । Līlāvatī Substance, country-made yellowish paper, 10 x 4 inches. Folia, 16 Lines, 11–14 in a page Character, Nāgara. Date, ? Appearance, very old, and worn out. Verse and prose Not correct. Incomplete

Another incomplete copy of the same work.

विवरणमन्यत्पूर्ववत् ।

No. 128. शीघ्रबोध: । Śīghrabodhaḥ. Substance, country-made colourless paper, 12 x 5 inches. Folia, 31 Lines, 9–10 in a page. Character, Nāgara. Date, ? Appearance, old, and worn out. Verse Not correct. Incomplete.

A treatise on astrology, complete in four Prakaraṇas, consisting of 507 ślokas, by Kāśīnātha Bhaṭṭācāryya Noticed in the Catalogue

of the India Office Library, No. 3015, p. 1071. See also Dr. Weber's Berlin Catalogue, No. 884, p. 266.

Beginning. श्रीमद्भागवपतये नमः ॥

भासयन्तं जगद्भासा नत्वा भास्वन्तमव्ययम् ।
क्रियते काशीनाथेन शीघ्रबोधाय सग्रहः ॥ १ ॥
रोहिण्युत्तररेवत्यो मूलं स्वातिमृगोमघाः ।
अनुराधा च हस्तश्च विवाहे मङ्गलप्रदाः ॥ २ ॥

इति विवाहनक्षत्राणि ।

माघे धनवती कन्या फाल्गुने सुभगा भवेत् ।
वैशाखे च तथा ज्यैष्ठे पत्युरत्यन्तवल्लभा ॥ ३ ॥
आषाढे कुलहन्त्रि. स्यादन्ये मासाश्च वर्ज्जिता. ॥
मार्गशीर्षमपोच्छन्ति विवाहं केऽपि कोविदाः ॥ ४ ॥

End. नास्ति ।

Colophon. इति काशीनाथकृते शीघ्रबोधे मुहूर्त्तप्रकरणं द्वितीयम् ॥ २ ॥

विषयाः—श्रीकाशीनाथकृतशीघ्रबोधाभिधज्योतिःसंग्रहनिबन्धविशेषः ।

No. 129. शुद्धिदीपिकाप्रभा । Śuddhidīpikāprabhā. Substance, foolscap paper, 16 × 5 inches. Folia, 40. Lines, 3–8 in a page. Character, Bengali. Date, ? Appearance, not old. Prose. Not correct. Incomplete.

A commentary on the Śuddhidīpikā, entitled Prabhā, by Krisṇāçāryya. The codex contains up to the end of the fifth chapter.

Beginning. ओँ नमः सवित्रे ॥

प्रणम्यापारसंसारपारावारतरिं हरिम् ।
कृष्णाचार्य्यो वितनुते दीपिकायाः प्रभामिमाम् ॥

ग्रन्थारम्भे निर्व्विघ्नसमाप्तिकामाः सदाचारपरम्परानुमितवेदबोधितकर्त्तव्यतार्कं मङ्गलमाचरन्ति । तदयमपि श्रीनिवासपण्डितः ज्योतिःशास्त्राधिकृतस्य भगवतः श्रीसूर्य्यस्य सङ्कीर्त्तनरूपं कुर्व्वन्नध्यापकस्याध्यासङ्गेनुयानुसङ्गतोऽपि मङ्गलनिर्व्वाहाय क्रियमाणदीपिकाख्यग्रन्थादौ निबध्नाति—

तृष्णेति तरणिःसूर्य्यो वो युष्मान् पातु तृष्णासंसाराम्भोधिलंङ्घने तरणिर्वहित्र-रूपः।

End. शीघ्रगत्या स्वभोगकालातिक्रमणान्तु शीघ्रचार एवं विपरीतो वक्रगतित्वात् एवं भूते जीवेऽस्तमुपगते च व्रतोद्याहौ न कुर्व्वीत कृते दोषमाह जायते मरणं ध्रुवमिति तत्रातिचारेण गुरौ राश्यन्तरसञ्चरणएव दोषस्त्रिकोणजातेत्यादि-परश्लोकै तदितरेषु सामान्यविशेषवचनेषु राश्यन्तरप्रमाणानुवादात्तथैव स्वरलोपसम्भवादिति टीकाकारकृत: ॥ * ॥

Colophon. इति श्रीकृष्णानन्दाचार्य्यविरचितायां शुद्धिदीपिकाटीकायां पञ्चमोऽध्याय: ॥०॥ ० ॥ ● ॥ ० ॥ ० ॥ ● ॥

विवरणम्—श्रीकृष्णानन्दाचार्य्यविरचितशुद्धिदीपिकाटीकाभूतप्रभाभिधनिबन्धोऽयम्।

No. 130. शुद्धिदीपिका। Śuddhidīpikā. Substance, foolscap paper, 15 x 5 inches. Folia, 37. Lines, 7-8 in a page. Character, Bengali. Date, Śaka 1749. Appearance, almost fresh. Verse. Not correct. Complete.

An astrological work treating of auspicious and inauspicious days &c., entitled Śuddhidīpikā, complete in eight chapters, by Śrīnivāsa. Noticed by Dr. R. Mitra in his *Notices* of Sanskrit MSS., No. 325. See Aufrecht's, Cat. Bodl. No. 792, p. 386, and also the Catalogue of the India Office Library, No. 3007, p. 1068.

Beginning. ओं नमः श्रीसूर्य्याय ॥

तृष्णातरङ्गदुस्तरसंसाराम्भोधिलङ्घने तरणिः।
उदयवसुधाधरारुणमुकुटमणिः पातु वस्तरणिः ॥
[illegible] तत्रति मिथ्विरेऽतिमलिनदोषाकुले च गौविभवे।
[illegible] शुद्धिग्रहणार्थं दीपिका क्रियते ॥
[illegible] नाणि [illegible] नम्।
स [illegible] ॥

इति श्राः [illegible]

मुहूर्त्ततिथिनक्षत्रऋतवश्चायनानि च।
सर्व्वाण्येवानुकूलानि स्युर्न स्यात् साम्वत्सरो यदि॥
इति दैवज्ञप्रशंसा।

तमस्तोमावृते विश्वे जगदेतच्चराचरं।
राशिग्रहोडुसंघातं सृजन् सूर्य्योऽभवत्तदा॥
इति रव्याद्युत्पत्तिः।

ततः प्रभृति जन्तूनां सदसत्कर्म्मसूचकः।
होराख्यो वर्त्तते कालो ग्रहोरात्रेऽस्य लोकतः॥
इति कालोत्पत्तिः।

शीर्षमुखबाहुहृदयोदराणि कटिवस्तिगुह्यसंज्ञकानि।
ऊरूजानुकजङ्घे चरणाविति राशयोऽजाद्याः॥
इति अजादिराशिभिः कालनयस्याङ्गविभागः। मेषवृषमिथुनकर्कटसिंह-कन्यातुलावृश्चिक धनुरथ मकरकुम्भौ मीन इति राशयः कथिताः॥

End. विबुधपितृपतिनरकाक्षगुरुदहुनसिताङ्गवसूकङ्ग्यमौ।
रिपुरंध्रे व्रंशक्रूपा नयन्ति चास्ता विनिधनस्थाः (१)॥
इति मृतदेवलोकादिगतिनिर्णयः।

Colophon. इति मच्छिन्तापणीयसत्पण्डितश्रीश्रीनिवासविरचितायां शुद्धिदीपिकायां यात्रानिर्णयो नामाष्टमोध्यायः समाप्तः॥ ० ॥ * ॥ ० ॥ शुभमस्तु शकाब्दाः १७४८॥ पौषस्य पञ्चविंशतिदिवसे अर्कवारे सितपक्षे एकादश्यां तिथौ वेला चतुर्थदण्डे समाप्तोऽयं ग्रन्थः॥ ० ॥ ० ॥ यथा दृष्टं तथा. लिखितं॥ यत्नेन लिखितं ग्रन्थं यत्नतः परिपालयेत्॥ ० ॥ ० ॥ ० ॥ ०.॥ ० ॥ ० ॥ ० ॥ ० ॥०॥

विवरणम्—श्रीश्रीनिवासपण्डितविरचितशुद्धिदीपिकाभिधशुभाशुभदिनादिनिरूपणज्योतिर्निबन्धविशेषः।

---

(1) After this, the following verse is found in the codex noticed by Dr. R. Mitra.

सुविस्तरे ज्योतिषि यत्नतः कृतां
समस्तकर्म्मव्यवहारदर्शिकां।
श्रीश्रीनिवासेन समाहृतामिमा-
ममत्सराः पश्यत शुद्धिदीपिकाम्॥

This verse is also quoted and explained in the codex noticed below.

No. 131. शुद्धिदीपिकाटीका अर्थकौमुदी। Śuddhidīpikāṭīkā Arthakaumudī Substance, foolscap paper, 15 × 5 inches Folia, 106. Lines, 8 in a page Character, Bengali Date, ? Appearance, not fresh Prose Not correct Complete

A commentary on the Śuddhidīpikā, entitled Arthakaumudī, by Govindananda Kavikankana, son of Ganapati Bhaṭṭa. Noticed in the Catalogue of the India Office Library, No. 3010, p. 1069.

Beginning. श्री नम श्रीकृष्णाय।

गोपीमोहनमन्त्री रतिकलकण्ठीकङ्कण
श्रवणकरीन्द्रानन्दमुरारपुर्न्दलीध्वनिर्जयति।
जगति ख्यातगुणाघो हरिरवतीर्णाऽत्र पृथिव्यां च।
श्रीमद्गणपतिभट्टो ज्योतिर्विद्याग्रमार्त्तण्ड॥
कविकङ्कणपण्डित स्तिया सहितस्तस्य सुतोऽर्थकौमुदी।
तनुते किल शुद्धिदीपिकाखिलतत्त्वार्थविवेचनाविधिम्॥

ग्रन्थारम्भेऽभिमतसिद्धये शास्त्रज्ञ श्रीमान् श्रीनिवासपण्डितो ज्योतिःशास्त्राधिकारिणं ग्रहाधिराज भुवनाह तमर्चति।

End. यस्माद ग्रहादतीतजन्मग्राम स चेत्
तुङ्गो तदा तस्मिन् लोके श्रेय आसीत्।
तद्भ्रमात् सुमित्रचैत्रस्थत्वे सम
नीचमध्यगृहस्थत्वे निकृष्ट इति॥

उपसंहारमाह स्वविस्तर इति।

इ श्रमतसरा. श्रीश्रीनिवासपण्डितेन सर्वशास्त्रात् समाहृतां शुद्धिदीपिकामिमां पश्यत जानीत इत्यर्थ। सकलकर्मज्ञानहेतुत्वात्।

कविकङ्कणपण्डितेन यत्नाल्लिखितेयं विषमार्थकौमुदी।
वचनामृतसारधारया गुणगृह्या परिषिच्यतां बुधा॥
एतां शुद्धिविधावतिप्रणयिनो श्रीदीपिकां सर्वदा
शास्त्रादिभिरितस्तत प्रतिहतामालोक्य मूलान्विताम्॥
श्रीमत्तातपदारविन्दविलसद्धूलीभराद्दैवत
श्रीगोविन्दविपश्चिता विरचितामनामनाक् कौतुकात्॥
अस्या. प्रसाद क्रियतां जगन्मङ्गलै:॥

Colophon. इति श्रीलश्रीगोविन्दानन्दकविकङ्कणाचार्य्यकृतायां शुद्धिदीपिकायामर्थकौमुद्यां यात्रादिनिर्णयो नामाष्टमोऽध्याय.॥ ०॥ ०॥

विवरणम्—श्रीगौविन्दनन्दकविकङ्कणविरचितार्थकौमुदीनामशुद्धिदीपिकाटीकाख्योऽयं निबन्धः।

No. 132. शुद्धिदीपिकाटीकार्थकौमुदी। Śuddhidīpikāṭīkārtha kaumudī. Substance, foolscap paper, 15 × 5 inches. Folia, 128. Lines, 8 in a page. Character, Bengali. Date, ? Appearance, almost fresh. Prose. Not correct. Complete.

Another copy of the above mentioned work.

विवरणन्तु पूर्व्ववत्।

No. 133. षट्पञ्चाशिका। Saṭpañcāśikā.

A little work consisting of fifty-six verses on various subjects. This is a work of the Kāvya class, and would be noticed in our appendix. There is indeed an astrological work of the same name as noticed in our next number. This identity in the name might have misled to its being placed among Jyotiṣa works.

No. 134. षट्पञ्चाशिका सटीका। Saṭpañcāśikā Saṭīkā. Substance, country-made colourless paper, 12 × 5 inches. Folia, 17. Lines, 10–13 in a page. Character, Nāgara. Date, Saṁvat 1872; Śaka 1617. Appearance, old, worn out and torn in parts. Verse and prose. Not correct. Complete

This codex contains Saṭpañcāśikā, a little work consisting of fifty-six verses, treating of foretelling one's fortunes from questions, entitled Saṭpañcāśikā, by Pṛithuyaśas, son of Varāhamihira, with a commentary, entitled Saṭpañcāśikāvivṛiti, by Bhaṭṭotpala. The text has been noticed in the Catalogue of the India Office Library, No. 2992, p. 1058 B., in Weber's Berlin Cat., No. 257, and in Bik. Cat. No. 337, and the commentary in the Bik. Cat. No. 338.

Beginning *of the Commentary* श्रीगणेशाय नमः ।

कैशाशार्कनिशाकरभितिजविज्ञीवाक्भुजितसूर्यजान्
विघ्नेशं स्वगुरुं प्रणम्य शिरसा देवीञ्च वागीश्वरीम् ।
प्रश्नज्ञानविधौ वराहमिहिरज्ञानस्य तत्सूनुनि
लोकानां हितकाम्यया विजवरष्टीकां करोत्युत्पल ॥ १ ॥

कानीह शास्त्रे सम्बन्धाभिधेयप्रयोजनानि भवन्तीत्युच्यते । चारसचादि-
विनि सृतमिद मेदमिति सम्बन्ध । लग्नद्रेक्काणनवमांशकादिना सहन्नानद-
र्शनेन च समागमजयपराजयलाभालाभहृतनष्टादिपरिज्ञानमभिधेयं सर्वेष
शुभाशुभकथनादिह लोके प्रसिद्धिरिह प्रयोजनं । किमेभिरुक्तैरित्येतत्
प्रोच्यत ।

सिद्धि श्रोतप्रवृत्ताना सम्बन्धकथनाद यत ।
तस्मात् सर्व्वेषु शास्त्रेषु सम्बन्ध पूर्व्वमुच्यते ॥
सर्व्वस्यैव हि शास्त्रस्य कर्म्मणो वापि कस्यचित् ।
यावत् प्रयोजन नोक्तं तावत् केन न गृह्यत ॥

इति कस्मिन् शास्त्रेऽधिकार उच्यते द्विजस्यैव ।

Beginning *of the Text*

प्रणिपत्य रविं मूर्द्ध्ना वराहमिहिरात्मजेन सद्यशसा ।
प्रश्ने कृतार्थगहनापरार्थमुद्दिश्य पृथुयशसा ॥ १ ॥
चुदिर्विलग्नाद्धिबुकाश्च हृद्धि
र्मध्यात् प्रवासीऽस्तमयान्निवृत्ति ।
वाच्य ग्रहैः प्रश्नविलग्नकाला
ग्रहे प्रविष्टो हिबुके प्रवासी ॥ २ ।

End *of the Text*

चरकाजन्मायते द्रव्य द्रेक्काणैस्तस्करा कृता ।
राशिभ्य कालदिग्देशा वयो जातिश्च लग्नपात ॥ १६ ॥

End *of the Commentary.*

लग्नपाश्च लग्नस्वामिनस्तोरस्य वय. प्रमाणं जातिं च वदेत् । तथाच
सहितायां

वयांसि तेषां तनया सूत्रात्मजतच्चिता यौनमभ्यवृद्धा ।
अतीवृद्धा इति चन्द्रभौमबुधशुक्रजीवार्कशनैश्चराणाम् ॥

इत्येवं चन्द्रलग्नपती शिशुः ।

भौमे बुधे ब्रह्मचारी आद्यमाद्य । गुरौ जीवनीपेत: विरुद्धवर्षे वा, शाचि'म द्रव्य । गुरौ मध्यवया पश्चाद्दद्य: । सूर्ये वृद्ध: समवय: । शौरे तथैव वृद्ध: समतेरधिकश्चेति अथवा प्रथममेवोक्तमेव स्यात् पुरुषेष्विति । जाति: ब्राह्मणादि । जीवसितौ विप्राणां चन्द्रारीणाम् । चन्द्रो विप्रां । शूद्राधिपश्चशिसुत: शनैश्चर: संकरभवानामिति । जातिनिर्णयकार्थ इति ।

Colophon. इति श्रीभट्टोत्पलविरचितायां पञ्चाशिकाविवृतौ मिश्रकाध्याय: सम्पूर्ण: । संवत् १८८२ शके १६६० आश्विन शुक्लषष्ठीमन्दवासरे लिखितं स्वार्थे परार्थे वा । श्रीविश्वेश्वराय नम. । लिखितं महारामेण काश्यां मध्ये ।

श्रीजर्चे पुरुषांशकेषु बलिविलग्नार्कगुर्विन्दुभि
पुंजन्म प्रवदेत् समांशकगते युग्मेषु तैर्योषिता ।
गुर्वर्कौ विषमे नर शशिसितौ वक्रश्च युग्मे स्त्रियं.
द्व्यंगस्था बुधवीक्षणाच्च यमलं कुर्वन्ति पक्षे स्वके ॥ १ ॥
विषमराशौ पुरुषनवांशके लग्नार्कगुरवः प्रश्ने तदा पुंजन्मप्रदो भवति ।
एको योगःलग्नार्कगुरुचन्द्रै . समराशौ समनवांशे तदा ।

योषितां जन्मेति द्वितीययोग ।

गुरुसूर्यौविषमे विषमराशौ च तदा पुंजन्मनि तृतीययोग: ॥
चन्द्रशुक्रभौमा: युग्मे समराशौ च तदा कन्याजन्मेति तुरीययोग: ।
गुरुसूर्यौ द्विस्वभावे बुधेन दृष्टा पुत्रद्वयजन्म ।
चन्द्रशुक्रभौमा: द्विस्वभावे तदा कन्याद्वयजन्मेति षट् योग: ।

श्रीगोपीजनवल्लभाय नम ॥

वि[illegible]म् - पुस्तकेऽस्मिन् सटीकषट्पञ्चाशिकाभिधज्योतिर्निबन्धविशेषो वर्त्तते ।

No. 135. षट्पञ्चाशिकाविवृति: । Satpañcāśikāvivṛitiḥ. Substance, country made white paper, 12 x 5 inches Folia, 4. Lines, 13–15 in a page Character, Nāgara Date, 1724 Appearance, old, slightly worm-eaten throughout and torn in parts. Prose. Generally correct. Complete

This contains only the commentary of Bhaṭṭotpala, entitled Saṭpañcāśikāvivṛiti, as noticed above.

विवरणम्—पुस्तकेऽस्मिन् श्रीभट्टोत्पलकृतषट्पञ्चाशिकाटीकामात्रं वर्त्तते ॥

No. 136. षष्टिसंवत्सरप्रकरणम् । Sastisamvatsara Prakaranam. Substance, country made white paper, 12 × 6 inches. Folia, 24. Lines, 9-15 in a page. Character, Nagari. Date, Samvat 1833. Appearance, old, and worm eaten in parts. Verse. Not correct. Complete.

A work describing the effects of sixty years, twenty of Brahmā, twenty of Viṣṇu and twenty of Rudra, in the form of a dialogue between Mahadeva and Parvati, entitled Sastisamvatsara Prakarana. Anonymous.

Beginning. श्रीगणेशाय नम. ॥ अथ साटिक लिख्यति (?) ॥ पार्वत्यै नमः ॥

अथातः संप्रवक्ष्यामि यथोक्तं शिवभाषितम् ।
येन विज्ञातमात्रेण साटकं गुणा उच्यते ॥
पार्वत्युवाच ।
देवदेव महादेव सृणु त्व पतिरात्मन ।
अहं पृच्छामि भव त्वा च पृथिव्याशुभाशुभम ॥
देवदेव जगन्नाथ भवनेश मम प्रभो ।
स समाग्र कथत्व शुभाशुभा च वतमर. (?) ॥
कथित पृथिवीशत्व ज्योतिषां ज्योतिरुत्तमम ।
गुढार्थगोपना विद्या त्वया कथ्य मम प्रभ. ॥
ईश्वर उवाच ।
यदि पृच्छसि मा देवि चिराद्गर्वपविल्ल्जा ।
तदह सप्रव-ध्यामि भवत्य नात संशयः ॥

End. क्वचित स्वस्था. । क्वचिदभग्नं अन्यथा नेव कथ्यते । एतत परतरं ल्लोके गौप्यम् । इति द्वयफलम । ततश्चस्मादपवाच्य ब्रह्मा युग द्वादशम ॥ १ ॥ द्वादशयुगर्योह... ।

Colophon. इति ब्रह्माविंशतिक २० विष्णुविंशतिक २० रुद्रविंशतिक २० वर्ष षष्ठ्यब्द-फलं समाप्त । फलाफलप्रस्तावः समाप्तम् ॥ शुभमस्तु ॥

मासि मासि भवत्युद दुर्भिक्षगोगविप्लवाः ॥
यो यस्य भवते स्वामी तत स-ज्ञायते (?) ॥
आदौ मज्जनचोरहारतिलक नेत्राञ्जनं कुण्डलं
नासामौक्तिक केशविन्यास शुभ्रकुसुमं ल्कार यानं वरंगतः (?) ।
चन्दनलेपनं नूकमति. चद्रावलीघण्टिकान् ।
ताम्बुल करकङ्कणं चतुरता शृङ्गारभक्ती दश ॥

रूपमेव परं स्त्रीणां प्रथमं भूषणं मुने ।
शीलमेव द्वितीयं स्यात् तृतीयं वाक्यमेव च ।
औदार्य्यन्तु चतुर्थं स्यात् पञ्चमं पुष्पमुत्तमं ।
मधुरत्वं तथा षष्ठ शूद्रत्व (?) सप्तमं महत् ॥
अष्टमञ्च पतिसौख्यं शुश्रूषा नवम तथा ।
सहिष्णुता च दशम रतिरेकादशं तथा ।
पतिव्रत च विप्रेन्द्र द्वादशाभरणा स्त्रियः (ः ?) ॥ शुभमस्तु
यादृशं पुस्तकं दृष्ट तादृशं लिखित मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥

सम्वत्सर १८३३ । लिखितं कुशालरामब्राह्मण काशीचेत्रे गङ्गातटे
विश्वेश्वरसमीपे मानमन्दिरमध्ये सोमेश्वरसन्निधौ नारदेश्वरसन्निधौ ॥
रामचन्द्राय ॥

विवरणम्—षष्टिसम्वत्सरफलकथनविषयकोऽयं निबन्धः ।

No. 137. सत्कृत्यमुक्तावली । Satkrityamuktāvali. Substance, country-made yellow paper, 10 × 4 inches. Folia, 11. Lines, 6 in a page. Character, Bengali. Date, Appearance, old, and writing effaced in most parts. Verse. Not correct. Incomplete.

A compilation of all the leading facts regarding astronomy and astrology and the performance of auspicious domestic rites such as marriage etc., entitled Satkrityamuktāvali, by Raghunātha Sārvabhauma Bhaṭṭācaryya, noticed by Dr. R. Mitra in his *Notices* of Sanskrit MSS., No 1664. Two MSS. of this work are to be found in the Library of the Asiatic Society, Bengal, Calcutta. This codex has been printed.

Beginning. श्रीगणेशाय नमः ।

नत्वा भानुगणेशशम्भुगिरिजा ज्ञात्वा मुनीनां मतं
ज्योतिःसंग्रहसंहितार्थमवधार्य्याचार्यवाक्यन च ।
सारं तत्तु निगृह्य माघवतो प्रज्ञावतामाज्ञया
संक्षिप्ता रघुनाथेन रचिता सत्कृत्यमुक्तावली ॥ १ ॥

राश्यादिनिर्णयविवाहनिषेकमुख्य
सीमन्तजातकशुभाशुभनामधेय ।
अन्नाशचौलपठनश्रुतिवेधयत्न-
सूत्रप्रमाणसवनादिकमत्र वाच्यम् ॥ २ ॥

अथ राश्यादिनिर्णयः ।

मेषवृषमिथुनकर्कटसिंहा. कन्यातुलावृश्चिकभम् ।
धनुरथमकरकुम्भौ मीन इति च राशयः कथिताः ॥ ३ ॥

राशिस्वरूपकथनम् ।

अश्विन्या सह भरणी कृत्तिकापादश्च कीर्त्तितो मेष. ।
वृषभः कृत्तिकाशेष रोहिण्यर्द्धञ्च मृगशिरसः ॥ ४ ॥
मृगशिरोऽर्द्धञ्चार्द्रा पुनर्वसोस्त्रिपाद मिथुनम् ।
पाद. पुनर्वसोरन्त्यः पुष्याश्लेषा च कर्कटः ॥ ५ ॥
सिंहोऽथ मघा पूर्व्वफल्गुनीपाद उत्तरायाः ।
तच्छेष हस्ता चित्रार्द्धञ्च कन्यकाख्या ॥ ६ ॥
तौलिनि चित्रार्द्ध स्वाती विशाखायाः पादत्रयम् ।
आलिनि विशाखापादस्त्वनुराधान्विता ज्येष्ठा ॥ ७ ॥
मूल पूर्व्वाषाढ़ा प्रथमश्चाप्युत्तराशके धन्वान् ।
मकरतस्तत्परिशेषः श्रवणा चार्द्ध धनिष्ठायाः ॥ ८ ॥
धनिष्ठार्द्ध शतभिषा पूर्व्वभाद्रत्र्यं कुम्भः ॥
पूर्व्वभाद्रपदाशेषस्त्वथोत्तरा रेवती मीनः । ९ ॥

End. नास्ति ।

Colophon. नास्ति ।

विवरणम्—श्रीरघुनाथसार्व्वभौमभट्टाचार्य्यविरचितसत्कृत्यमुक्तावल्यभिधज्योतिर्निबन्धोऽयं मुद्रितः प्रकाशतां नीतश्च ।

No. 138. सत्कृत्यमुक्तावली । Satkrityamuktavalī. Substance, country made colourless paper, 15 × 3 inches Folia, 63. Lines, 5–6 in a page. Character, Bengali. Date, Śaka 1689. Appearance, very old, worn out and writing slightly effaced in many parts. Verse. Generally correct. Complete

A complete copy of the same work.

End.

शनिचक्रं नराकारं लिखित्वा सौरिभावितः ।
नाम ऋक्ष भवेद्यत्र फलं तत्र शुभाशुभम् ॥
एवं मुखे दक्षहस्ते चत्वारि षट् पदद्वये ।
हृदि पञ्च करे वामे चत्वारि मस्तके त्रयम् ॥
द्वयं नेत्रद्वये गुह्ये द्वयं तत्र न्यसेद् बुधः ॥
मुखे हानिफलं जयो दक्षे भ्रमः पादे स्त्रियो हृदि ।
वामे भीर्मस्तके राज्यं नेत्रे सौख्यं मृतिर्गुदे ।
यस्य पीडाकरः सौरिस्तस्य चक्रे त्विदं फलम् ॥
शनिसञ्चारफलम् ॥ ० ॥ * ॥
धीराः प्रणम्य भवतो विनिवेदयामि
श्रीकामदेवधरणीतलवासवस्य ।
आज्ञामवाप्य रचितो रुचिरो निबन्धो
दोषो न ·· वलवत्विह यत्नो विज्ञाः ॥

Colophon. इति रघुनाथसार्व्वभौमभट्टाचार्य्यविरचिता सत्कृत्यमुक्तावली समाप्ता ॥००॥
लिखितेयं श्रीरघुनाथदेवशर्म्मणा शकाब्दाः १६८८ ॥

विवरणमनुक्तपूर्व्वम् ।

No. 139. सत्कृत्यमुक्तावली । Satkrityamuktāvali. Substance country made yellow paper, 12 × 6 inches. Folia, 83. Lines, 2–7 in a page. Character, Bengali. Date, ? Appearance, not fresh. Verse. Not correct. Complete.

A third copy of the same work.

विवरणमनुक्तपूर्व्वम् ।

No. 140. सत्कृत्यमुक्तावली । Satkrityamuktāvalī. Substance, country made yellowish paper, 18 × 3 inches. Folia, 73 (of which foll. 2, 4, 5, and 6 are wanting). Lines, 5–6 in a page. Character, Bengali. Date, ? Appearance, old. Verse. Not correct. Incomplete.

The same work.

विवरणमनूक्तपूर्व्वम् ।

No. 141. **सर्व्वविचारमाला ।** Sarvavicāramālā. Substance, country-made colourless paper, 10 × 1 inches. Folia, 18. Lines, 9 in a page. Character, Nāgara. Date, ? Appearance, very old, and worn out. Verse. Not correct. Incomplete.

A work on astrology, treating of the effects of planets and stars on human destiny, entitled Sarvavicāramālā. Anonymous.

Beginning. ओं नमः सूर्याय ।

आदित्यचन्द्रभौमबुधजीवशुक्रसौराः । एते मम ग्रहाः । एषां देवतानि हुतवहः वरुणः षडाननः केशवः शक्रः शचो प्रजापतिश्चेति । अथोपग्रहाः राहुः केतुर्ध्रुवोऽगस्त्यश्चेत उपग्रहाः । एषां देवतानि गणपतीश्वरौ धर्म्मो यमश्च ।

End. नास्ति ।

Colophon. नास्ति ।

विवरणम्—ग्रहादिस्वरूपादिनिर्णयविषयको ज्योतिर्निबन्धविशेषः ।

No. 142. **सर्व्वार्थचिन्तामणिः ।** Sarvārthacintāmaṇiḥ. Substance, foolscap paper, 10 × 8 inches; bound like a book. Folia, 118. Lines, 11 in a page. Character, Nāgara. Date, ? Appearance, rather old, and slightly worm eaten throughout. Verse. Not correct. Complete.

A treatise on astrological calculations, by Venkaṭeṣa Śarmaṇ, son of Appaya. Noticed by Dr. R. Mitra in his *Notices* of Sanskrit MSS., No. 2870. See also the Catalogue of the India Office Library, No. 3108, p. 1109.

Beginning. श्रीगणेश भजे ॥

श्रीमच्छेषगिरिस्थटाधिनिलयं श्रीवेङ्कटेशं गुरुं
नत्वा वेङ्कटनायकं त्वनुदिनं जातोऽप्यग्रार्थान् सुधीः ।

ज्योतिःशास्त्रमुखाब्धिपारगमने वक्ष्यामि पौताप्रकं
ज्योतिःशास्त्र + + विविधविदुषां सर्व्वार्थचिन्तामणिम् ॥ १ ॥
गौराम्बुदरुचिं देवं सकृद्यान्ति मनोरथम्।
देवाः प्रणम्य य सर्व्वे तं नमामि गजाननम् ॥ २ ॥
वाग्विभूतिप्रदा देवी या श्वेताम्बुरुहस्थिता।
गौरीरधवलाकारा स्वयं तिष्ठतु वाचि मे ॥ ३ ॥
कषादिराश्रयः सर्वे दिनेशप्रमुखा ग्रहाः।
ये च लोकोपकर्त्तारः पान्तु मामिह सर्व्वदा ॥ ४ ॥

End. एवं चिन्तामणौ प्रोक्तं वेङ्कटेशेन धीमता।
गोचभागादियोगार्थं राजयोगादिकं फलम् ॥

Colophon. नास्ति।

विवरणम्--सर्व्वार्थचिन्तामणिनामकज्योतिर्निबन्धविशेषः श्रीवेङ्कटेशशर्म्मविरचित।

No. 143. समयप्रदीपः। Samayapradīpaḥ. Substance, country-made yellow paper, 18 × 3 inches Folia, 35. Lines, 5 6 in a page. Character, Bengali Date, 1758 Appearance, not fresh. Verse. Not correct. Complete.

A work treating of appropriate astral conjunctions and times for the performance of rites and ceremonies, by Harihara Ācāryya. Noticed by Dr. R. Mitra in his *Notices* of Sanskrit MSS., No. 1088, and a manuscript of this work is be found in the Library of the Asiatic Society, Bengal, No. 1 A. 64. In Cat. Cat., we find different works of the same name by different authors, such as Vittala and Śrīpati Datta, of which the latter is quoted by Raghunandana and Vācaspati Misra, etc.

Beginning. श्री नमः सूर्य्याय ॥

अनायासेन समयं कर्म्मणां यो विवित्सति।
तदर्थं ज्योतिषः श्लोकान् करिष्यामि यथामति ॥ १ ॥
ज्योतिर्ग्रन्थकलापानां वचनान्याकृष्य शिष्यबोधाय।
समयप्रदीपनामकं कुरुते श्रीहरिहराचार्य्यः ॥

नाचीन्न ये ज्योतिषपुस्तकानि
विधिन्नवः नर्मकलापकामम् ।
गच्छन्तु ते मे समयप्रदीपम्
भवेद् यतोऽज्ञानतमोनिरासः ॥

तत्रादौ चन्द्रशुद्धिः ।

सर्व्वकर्म्मसूपादेया विशुद्धिश्चन्द्रतारयोः ।
तच्छुद्धादेव सर्व्वेषां ग्रहाणां फलदातृता ॥
ममस पञ्चमाद्यस्तचन्द्रः दर्व्वत शोभनः ।
शुक्लपक्षे द्वितीयस्तु पञ्चमो नवमस्तथा ॥
समाद्यचन्द्रे ध्रुवमर्थलाभ.
षष्ठे तृतीये धनभोगमायु. ।
सर्व्वार्थसिद्धिं दशमे वदन्ति
एकादशे सर्व्वसुखानि चैव ॥

अथ वामवेधेन चन्द्रशुद्धि ।

सितशनिबुधजीवार्कास्त इन्दुर्नराणां
व्ययसुखनवमस्थोपीष्टदाताथ तेषाम् ।
खसुतनिधनपञ्चेम्मृत्युपञ्चार्थगोऽपि
प्रचुरशुभ-फलः स्याद्वामवेधेन शुद्धिः ॥

End. अथ यथ्वं ।

अथ मसाष्ट स्वप्फाङ्ग चतुर्थे दशमे विधौ ।
त्रिजन्मनि त्रिनिधने न कुर्य्याद्राड्दर्शनम् ॥
द्वितीये तृतीये षष्ठे पञ्चमेकादशे विधौ ।
त्रिजन्म च त्रिनिधनं हित्वा पश्येद् वि शुदम् ॥
नेऽविद्वांस कर्म्मकार्मे तदर्थं
ज्योति.शोका संग्रहीता क्रियन्तः ।
अज्ञानाभाविष्कृतं मे यदि स्यात्
तच्छीमन्तः पण्डिताः शोधयन्तु ॥ ८ ॥

Colophon. इति श्रीहरिहराचार्य्यविरचितः समयप्रदीपः समाप्तः ॥
शाके वारणबाणसैषविमिते (१७५८)वैशाखमासे(१४)मधौ
पक्षे चन्द्रसुते दिने दिनकृतो व्याख्यात्रियुग्मं गुरोः ।

पाठार्थं मधुसूदनस्य कृतिना सार्द्धञ्च तेनैव हि
सद्‌ग्रन्थं समयप्रदीपमखिलदुर्गाप्रसादी द्विजः ॥
अयि गुरौ त्वयि मे विनता मनः ।

विवरणम्—श्रीहरिहराचार्य्यविरचितः समयप्रदीपाभिधो ज्योतिर्निबन्धविशेषः ।

No. 144. समयप्रदीपः । Samayapradīpaḥ. Substance, country made red paper, 15 × 3½ inches Folia, 20. Lines, 6–7 in a page Character, Bengali Date, ? Appearance, very old, and worn out Verse Generally correct Incomplete

Another incomplete copy of the same work.

विवरणम् पूर्ववत् ।

No. 145. समयप्रदीपः । Samayapradipah Substance, country made red and white paper, 18 × 5 inches Folia, 17 Lines, 6–9 in a page Character, Bengali Date, ? Appearance, very old Verse Generally correct Incomplete

A third incomplete copy of the same work.

विवरणम् पूर्ववत् ।

No. 146. समयप्रदीप । Samayapradīpaḥ Substance, country made foolscap paper, 18 × 6 inches Folia, 32 Lines 7–8 in a page Character, Bengali. Date, ? Appearance, almost fresh Verse Generally correct. Complete

A complete copy of the same.

विवरणम् पूर्ववत् ।

No. 147. समरसारः सटीकः । Samarasārah Satīkaḥ. Substance, country-made white paper, 15 × 6 inches. Folia, 16 Lines, 5–11 in a

page. ·Character, Nāgara Date, ? Appearance, not fresh. Prose and verse. Not correct Complete

A versified treatise on supernatural diversions, supposed to ensure success in warfare, by Rāmacandra Vājapeyin, son of Sūryya Dāsa, entitled Samarasāra, with a commentary, entitled Saralā, by Bharata, the brother of the author, in both the margins. See the Catalogue of the India Office Library, No 3117, p 1115 and also No. 3118, p. 1116. The text is noticed by Dr. R. Mitra in his *Notices* of Sanskrit MSS. ii, p 204

Beginning *of the Commentary*

श्रीगणेशाय नमः ।

अपि वन्द्य रामचन्द्रं गुरु तत्कृतं स्वरग्रन्थम् ।

विवृणोमि यथाप्रज्ञ तदभिप्रायानुसारेण ॥ १ ॥

तत्र श्रीरामचन्द्रनामा ग्रन्थकृतप्रारिप्सितग्रन्थपरिसमाप्तिपरिपन्थिप्रत्यूहवारी-णाय शिष्टाचारपरिपालनाय गुरुप्रणाम प्रतिजानीते । भवि स्वरशास्त्राणि बहुयामलादीनि । युद्धशब्द उपलक्षणार्थं । तेन वादौ (?) प्रतिपादितभट युतकन्यादीनामपि जयपराजयप्रतिपादकत्वमस्य ग्रन्थस्य । धार्मिकाणा-मिति ग्रन्थाप्रामाण्यशङ्कानिवारणाय श्री नम ॥

Beginning *of the Text.*

नत्वा गुरु समालोक्य स्वरशास्त्राणि भरिश ।

वक्ष्ये युद्धजयोपायौ धार्मिकाणां मनोचितान् ॥

बहुधा विदधेऽत्र सदाशिव स्वरतन्त्राणि तु ।

तदिकवाक्यतान्तु भगवानयमवेद सम्यक्

गुरुमार्गागत परम् लोक ॥ २ ॥

End *of the Text.* इति प्रकृतम् ।

सकल स्वरशास्त्रसारमतत

परिसृचिष्य मयाम्वगादि सर्व्वं ।

गुरुभक्तिपुर्णेऽग्र धर्म्महृत्से.

स्फुरतादेतदभीप्सितार्थसिद्धेर ॥ ८ ॥ ङ ङ ङ ङ ॥

वंशे वत्समस्य मुनीश्वरस्यैवदासुदप्याटकव्यातित'

समाकृष्टिविदाप यस्य जनक श्रीसूर्य्यदासी जनिम् ।

यस्मात्तुर्यश्रमा द्विश्री दश विश्रालाख्या वसथा व्यधात्
स प्राज्यस्वरग्रासमसारविचिकित रामी वसन्तैमिषे ॥ ८ ॥

Colophon. इति श्रीरामवाजपेयिविरचित: समरसागराख्यो ग्रन्थ: समाप्त: ॥

End *of the Commentary.*

अथ ग्रन्थकृत् स्वगोत्रोत्कोर्त्तनपूर्व्वक स्वपूर्व्वनामकथनपूर्व्वकं सम्बन्धमाह वंशे वत्सगुनीश्वरस्येति वत्सगुनीश्वरस्य वंशे उक्तनरप्रसिद्ध: श्रिवदासा-ख्यात् यस्य जनक समाट् हक्स्पतिसवगर्भवाजपेययाजित्वात् चयिचित् सुवर्णचितिकारित्वात् श्रीसूर्यदासनामा जनि जन्म यथाश्रमात् यस्मात्तु-विंशालाख्या यश्रसा पातिव्रत्यादभूतेन दश दिश्री धवचिता धवलिता: स रामनामा सोमयाजी कवि. नैमिषारण्ये वसन् स्वरशास्त्रं तस्य य: सारोऽस्य-युक्ताश्रस्तस्य विचिति सञ्चयं व्यधादकरोदित्यन्वय । .

गुरूदितार्थस्य सुबोधिताय
परोपकाराय तथा व्यधा यम् ।
ग्रुभं समितसारसस्यग्रन्थस्य
टीकाकृतौ तं ह्यरयऽर्पयामि ॥
ग्रन्थकृता रामस्य भ्राता भरतो लघुर्विद्वान् ।
टीकाभनामकरात् तदग्रन्थार्थप्रकाशिकां सरलाम् ॥

Colophon *of the Commentary.*

इति श्रीरामचन्द्रसोमयाजिविरचितसमरसागरग्रन्थटीका भरतकृता समाप्ता ॥

विवरणम्—पुस्तकेऽस्मिन् श्रीरामचन्द्रवाजपेयिकृत. समरसाराभिधो भरतकृतसरलाख्यटीका-सहितो वर्त्तते ।

No. 148. समरसारटीका सरला । Samarasāraṭīkā Saralā. Substance, country-made colourless paper, 10 × 4 inches. Folia, 31. Lines, 10-13 in a page Character, Nāgara Date, ? Appearance, old, and slightly worm eaten in parts Prose Generally correct. Complete.

This codex contains the commentary on Samarasāra, entitled Saralā, by Bharata, as noticed above.

विवरणमुक्तपूर्व्वम् ।

No. 149. समाविवेकटीका। Samāvivekaṭīkā. Substance, country-made white paper, 15 × 5 inches. Folia, 17. Lines, 4–8 in a page. Character, Bengali. Date, ? Appearance, almost fresh. Prose. Not correct. Complete (as regards a part).

A commentary on the Samāviveka or Varṣatantra, entitled Śiśubodhinī, by Mādhava, son of Govinda. The codex contains only a part of the work called Dvādaśa Bhāva Vicāraṇa.

Beginning. श्रीगणेशाय नमः।

गणनायकं हृदयवाञ्छितपदं प्रणिपत्य तातपादपद्ममपि बुधमाधवः।
प्रकुरुते विवृतिं प्रमिताक्षरांशरविभावततेः॥ १॥

अथ द्वादशफलाख्यायं वक्तुकामः प्रथमादिक्रमे कारणाभावात् प्रथमभावप्रकरणं वदन् सामान्यतः समस्तभावफलादेशं युगपदेवानुष्टुभा ब्रूते भाव इति भावो नामस्थानविशेषः स्वामी क्रूरसौम्यो वा सौम्यशुभयुक्तः विचक्षणमुपलक्षणं यत सौम्येनासौम्याद्यः सौम्यैर्वा स्वामिना वा यो भावो दृष्टोपपन्ना समन्वितो वा स्यात्तदायं भाव एव मे वर्द्धते एव हृष्टो यो भावः स्वामिव्यतिरिक्तेन ग्रहेण दृष्टोयुतो वा समन्वितो वा स्यात्तदा तस्य भावस्य नाश मित्रः सौम्यः पापैश्च विमुक्तो दृष्टो वा यो भावो भवति तद्भावस्य मित्रं शुभमशुभफलं वदन्।

End. ग्रन्थस्यार्य्याच्छन्दोनिर्म्मितत्वेन पाठस्य दुष्करत्वात् दुर्ब्बोधत्वाच्च तत्र सतामसन्तोषं इदन्तु नानाविधरिन्द्रवज्राप्रभृतिभिश्छन्दोभिर्निर्म्मितत्वेन सुपाठ्यं सुबोधञ्च निर्म्मितमिति सता तोषो युक्त एवान्यच्चरणत्रयं व्याख्यातमेव व्यधादिति व्यधामिति चानयोः पूर्ववत् प्रक्रियेति शिवम्॥ १०॥

विश्वद्दैवज्ञगणसेवितपादपद्म-
गोविन्दसंज्ञसुतमाधवनिर्म्मितायां
श्रीवर्षतन्त्रविवृतौ शिशुबोधिनीति-
तन्वादिभावविवृतिः परिपूर्त्तिमागात्॥

Colophon. इति श्रीविश्वद्दैवज्ञमुकुटभूषणगोविन्दज्योतिर्वित्सूनुमाधवज्योतिर्विद्विरचितायां समाविवेकटीकायां शिशुबोधिन्यां तन्वादिद्वादशभावविचारणं समाप्तिमगात॥ ०॥ ०॥ ०॥ ०॥

विवरणम्—श्रीमाधवज्योतिर्विद्विरचितश्रीवर्षतन्त्रापरपर्य्यायसमाविवेकटीकारूपः शिशुबोधिनीनामधेयः प्रबन्धो वर्त्तते।

No. 150. सारसंग्रहः। Sārasamgrahaḥ. Substance, country-made white paper, 16 × 5 inches. Folia, 9. Lines, 8 in a page. Character, Bengali. Date, ? Appearance, almost fresh. Verse. Not correct. Complete.

A short compilation of astrology, entitled Sārasamgraha, by Hṛidayānanda Vidyālaṅkāra, treating of auspicious times for marriage, impregnation ceremony, naming ceremony, Annaprāśana, etc., as enumerated at the beginning quoted below. This work has not been properly described elsewhere.

Beginning. श्रीं नमः शिवाय ॥

वन्देऽहं परमानन्दमज्ञानतिमिरापहम्।
भवसागरपाराय गीतं वेदान्तगैर्गुरुः॥
विद्यालङ्कारविख्यातहृदयानन्दशर्म्मणा।
ज्योतिःशास्त्रं समालोक्य क्रियते सारसंग्रहः॥
पण्डितैर्ज्ञायते सर्व्वं तदर्थं न परिश्रमः।
संक्षिप्तविशदो ग्रन्थो बालकैर्गृह्यतां मुदा।
अत्र वाच्या विवाहश्च निषेकनामनी तथा।
अन्नप्राशनचूडे च कर्णवेधोपवीतकं।
गृहस्थानं गृहारम्भो गृहसंस्कार एव च।
हलसर्यो(?)जनबीजवपनं धान्यकर्त्तनम्।
नवान्नजातके यात्रा विद्यारम्भौ प्रकीर्णके।
प्रायो लोकाहृता एते गौरवान्नेतरे मताः॥

End. सूर्य्याद्यशेषशान्त्यै धार्य्याणि भुजेन ताम्रशङ्खविद्रुमकाञ्चनमुक्ता रजतलौहितराजपट्टानि। अन्यच्च

मूलं धार्य्यं त्रिशूल्याः सवितरि विगुणे चौरिकामूलनिष्ठौ
जिह्वा इन्द्रेऽपि पुत्रे रजनिकरसुते वृद्धदारस्य मूलम्।
तार्क्ष्यौ जीवेऽथ शुक्रे भवति शुभकरं सिंहपुच्छस्य मूलं
वाच्या(च्या ?)लक्ष्मार्कपुत्रे तमसि मलयजं केतुदोषेऽश्वगन्धम्॥ ० ॥

Colophon. इति श्रीविद्यालङ्कारकृतः सारसंग्रहः समाप्तः॥ ० ॥ ० ॥

विवरणम्—श्रीहृदयानन्दविद्यालङ्कारविरचितसारसंग्रहाभिधविवाहादिदृष्टसत्कर्मविषयकः कश्चिज्ज्योतिर्निबन्धविशेषः।

No. 151. सम्राट्सिद्धान्तः । Samrāṭsiddhāntaḥ.

The codex contains a copy of the Samrāṭsiddhānta which appears to have been recently copied most probably under the principalship of Mahāmahopādhyāya Nīlamaṇi Mukherjee Nyāyālankāra, and has neither a beginning nor an end. The folia in most parts are in a disordered state. We find three lots of them (1) numbered 1–106, (2) 251–227, (3) 326–420, each having consecutive page marks indeed. The rest are absolutely wanting. The copies do not give figures but leave vacant spaces for them.

विवरणमत्रूक्तपूर्व्वम् ।

No. 152. सम्राट्सिद्धान्तः । Samrāṭsiddhāntaḥ. Substance, country-made white paper, 17 × 8 inches. Folia, 325 (of which foll. 151–297 are wanting). Lines, 12 in a page Character, Nāgara. Date, ? Appearance, fresh. Prose. Not correct. Incomplete.

This is also an incomplete copy of the Samrāṭsiddhānta recently copied by the college authorities during Mahāmahopādhyāya Nīlamaṇi Nyāyālaṇkāra's principalship. It contains the beginning of the work but not the ending or some of the intervening portions.

विवरणमत्रूक्तपूर्व्वम् ।

No. 153. स्वप्नाध्यायः । Svapnadhyāyaḥ. Substance, foolscap paper, 15 × 3½ inches. Folia, 4 Lines, 6–8 in a page. Character, Bengali. Date, ? Appearance, almost fresh. Verse. Generally correct. Complete.

A chapter of the Sāmudṛika, (or the Science of foretelling the fortunes of a man from various signs), narrating the meanings of dreams. In the Catalogue of the India Office Library two works of the same name and treating of the same subject are noticed in two consecutive numbers 3144 and 3145, p. 1125, but they seem to be two different versious only of this work.

Beginning. ओं नमः श्रीकृष्णाय ।

स्वप्नाध्यायं प्रवक्ष्यामि यथोक्तं पद्मयोनिना ।
प्रत्यक्षमिव स्वप्नेन यथाकालं शुभाशुभम् ।
स्वप्नन्तु प्रथमे यामे फलदो वत्सरादपि ।
द्वितीये चाष्टभिर्मासैस्त्रिमासैश्च त्रियामके ।
चतुर्थे चार्द्धमासेन फलं स्यान्नात्र संशयः ॥
अरुणोदयवेलायां दशाहेन फलं लभेत् ॥
पैत्तिकं श्लेष्मजं स्वप्नं वातजञ्च निरर्थकम् ।
अत ऊर्द्ध्वं प्रवक्ष्यामि पुण्यात् पुण्यतमं शृणु ॥

End. कबन्धाः परिनृत्यन्ति वल्मीकं स्फोटयन्ति च ।
दौर्ब्बल्यञ्च भवेत्तस्य देशश्चैव विनश्यति ॥
सत्यानि धारयेद यस्तु स्वल्पं वा यदि वा बहु ।
तादृक् भवच्च तस्य पीडां वापि विनिर्द्दिशेत् ॥
चाण्डालं दर्शने भीते व्याधिभिः परिपीडिते ।
शोकाकुले च दुःखे च कथन निष्फलं भवेत् ॥
देवता यत्र नृत्यन्ति विवर्त्तन्ति हसन्ति च ॥
धावतोऽधावतो वापि देशस्तस्य विनश्यति ॥
रक्तचन्दनकाष्ठानि घृतमोदकमेव च ।
साकल्यानां सहस्रेण होमाच्छान्तिर्विधीयते ।
गायत्र्याश्च सहस्राणि जप्ता शान्तिर्विधीयते ॥
अग्निवर्यं त्रीणि च पुष्कराणि वय यदुक्तं विपदां निषेधः ।
इदं त्रिनेत्रं विपदाञ्च गङ्गां स्मरामि दुःस्वप्नविनाशकारिणीम् ॥
स्वप्नाध्यायमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
सर्व्वदोषोपशमनं कुरुते तस्य भास्करः ॥

Colophon. इति सामुद्रिकग्रन्थे स्वप्नाध्यायः समाप्तः ।

विवरणम्—सामुद्रिकग्रन्थान्तर्गतस्वप्नशुभाशुभफलविषयकोऽध्यायविशेषः ।

No. 154. स्वप्नाध्यायः । Svapnādhyāyaḥ. Substance, country-made colourless paper, 8 × 4 inches. Folia, 7. Lines, 5–7 in a page.

Character, Nāgara Date, ? Appearance, very old, and slightly worm-eaten in parts Verse Generally correct Complete.

Another version of the same work

Beginning. श्रीगणेशाय नम ॥

स्वप्नाध्याय प्रवक्ष्यामि यथोक्त गुरुभाषितम् ।
फल विज्ञायते यन नित्यमेव शुभाशुभम् ॥
जाय । प्रथम याम वत्सरेण फलप्रदम् ।
द्वितीये चाष्टभिर्मासै त्रिभिर्मासैस्त्रियामके ।
चतुर्यामे च य स्वप्नो मासेन फलद स्मृत ॥
अरुणोदयवेलाया दशाहेन फल लभेत् ।
वातिके पैत्तिके च श्लेष्मार्त्तितया युतम् ।
पुरुष प्रत्यय स्वप्नं प्रत्यय न लभेत क्वचित् ॥
आरोहणं गोवृषकुञ्जराणां
प्रासादशैलाग्रवनस्पतीनाम् ।
विष्ठानुलेपो रुदित मृत च
स्वप्न स्ववाग्यागमन च धन्यम ॥
• चारिणं फलितं वृत्त चैकाकी योधिरोहति ।
नवस्थस्य विबुध्येत फल शीघ्रमवाप्नुयात ॥

End. व्याधि न सन्तोकेन चिन्तायुक्तन चैव हि ।
कामकामात्मकेनैव दृष्टे स्वप्ने फल न हि ॥
द स्वप्नो दृश्यते येन पुनर्निद्रा च कारयेत ।
ततो न स्यात् फलं तस्य शुभमेव भविष्यति ॥
रक्तचन्दनकाष्ठानि प्रताकानि च होमयेत् ।
गायत्र्यष्टसहस्राणि तेन सर्व्वं शुभ भवेत् ॥
